ISSN-2231-0800

# गोमती
# GOMATI
## (A JOURNAL FOR INDOLOGICAL RESEARCH)

योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्

## राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः), लखनऊ-परिसरः
NAAC द्वारा 'ए' श्रेण्यां प्रत्यायितः
विशालखण्डः-4, गोमतीनगरम्, लखनऊ-226010 (उत्तरप्रदेशः)
दूरभाषः 0522-2393748, फैक्स- 0522-2302993

सन् 2019

राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद

विश्वविद्यालय अनुदान आयोग का स्वायत्त संस्थान

**NATIONAL ASSESSMENT AND ACCREDITATION COUNCIL**

*An Autonomous Institution of the University Grants Commission*

# Certificate of Accreditation

*The Executive Committee of the*
*National Assessment and Accreditation Council*
*on the recommendation of the duly appointed*
*Peer Team is pleased to declare the*
*Rashtriya Sanskrit Sansthan (Deemed to be University)*
*Institutional Area, Janakpuri, New Delhi as*
*Accredited*
*with CGPA of 3.25 on four point scale*
*at A grade*
*valid up to July 04, 2017*

*Date : July 05, 2012*

*Director*

[illegible]

ISSN-2231-0800

# गोमती

# GOMATI

(A JOURNAL FOR INDOLOGICAL RESEARCH)

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः), लखनऊ-परिसरः

NAAC द्वारा 'ए' श्रेण्यां प्रत्यायितः

विशालखण्डः-4, गोमतीनगरम्, लखनऊ-226010 (उत्तरप्रदेशः)

दूरभाषः 0522-2393748, फैक्स- 0522-2302993

**सन् 2019**

ISSN-2231-0800



# राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः), लखनऊ-परिसरः
NAAC द्वारा 'ए' श्रेण्यां प्रत्यायितः
विशालखण्डः-4, गोमतीनगरम्, लखनऊ-226010 (उत्तरप्रदेशः)
दूरभाषः 0522-2393748, फैक्स- 0522-2302993

ISSN-2231-0800

# गोमती
# GOMATI
## A JOURNAL FOR INDOLOGICAL RESEARCH

**संरक्षकः**

**प्रो. परमेश्वरनारायणशास्त्री**

कुलपतिः

**प्रधानसम्पादकः**

प्रो. विजयकुमारजैनः

प्र. प्राचार्यः

**सम्पादकाः**

प्रो. भारतभूषणत्रिपाठी

डॉ. पवनकुमारः

डॉ. गुरुचरणसिंहनेगी

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः) लखनऊपरिसरः

विशालखण्डः-4, गोमतीनगरम्, लखनऊ-226010 (उत्तरप्रदेशः)

ISSN-2231-0800

# गोमती

# GOMATI

(A JOURNAL FOR INDOLOGICAL RESEARCH)

© Rashtriya Sanskrit Sansthan (Deemed University),
Lucknow Campus, Lucknow

**संरक्षकः** प्रो. परमेश्वरनारायणशास्त्री, कुलपतिः

**प्रधानसम्पादकः** प्रो. विजयकुमारजैनः, प्राचार्यः

**सम्पादकाः** प्रो. भारतभूषणत्रिपाठी
डॉ. पवनकुमारः
डॉ. गुरुचरणसिंहनेगी

**प्रकाशकः** प्रो. विजयकुमार जैनः
प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम् (मानित-विश्वविद्यालयः)
लखनऊ-परिसरः, विशालखण्डः-4, गोमतीनगरम्,
लखनऊ-226010, उत्तरप्रदेशः

**Publisher:** Principal
Rashtriya Sanskrit Sansthan (Deemed University)
Lucknow Campus, Vishal Khand-4, Gomti Nagar,
Lucknow-226010 (U.P.)

मुद्रकः महेश्वरी एंड संन्स, मोतीनगर, लखनऊ

# प्रधान-सम्पादकीयम्

शास्त्रादि प्रबोधने प्रचारे प्रसारे च कृतसंकल्पो राष्ट्रिय-संस्कृतसंस्थानस्य लखनऊपरिसर: सत्रेऽस्मिन् परिसरीयां गोमतीं पत्रिकां प्रकाशयन् गौरवमनुभवति।

अस्यां पत्रिकायां विविधा: विषया: दरीदृश्यन्ते। यथा वेद-व्याकरण-साहित्य-ज्योतिष-बौद्धदर्शन-शिक्षाशास्त्रप्रभृतिसम्बद्ध विषया: इति। संस्कृताध्ययनाय शास्त्रप्रवेशाय नूतनतथ्यानामाविष्करणाय शोधपरम्परायां प्रावीण्यप्राप्तये लेखनस्य महती भूमिका वर्तते। अत एव एषा पत्रिका अस्माभि: प्रकाश्यते। अस्यां छात्राणां, शोधच्छात्राणां, प्राध्यापकानां च लेखा: वर्तन्ते। इयं गोमती पत्रिका परिसरस्य प्रतिभाया: लखनऊनगरस्य उत्तरप्रदेशस्य च गौरवं सम्वर्द्धयति।

लेखसंग्रह: सम्पादनञ्च श्रमसाध्यं कार्य वर्तते। अत: सम्पादकमण्डलेभ्य: धन्यावादा: समर्प्यन्ते। शोधलेखकेभ्यश्च साधुवादा: प्रदीयन्ते। यै: यथाश्रमम् निबन्ध: विलिख्य प्रस्तुत:।

प्रत्यक्षपरोक्षरूपेण वा पत्रिकाप्रकाशने ये कार्यकर्तार: ते सर्वे सत्क्रियन्ते।

''भवतु सब्ब मंगलं'' इति कामनया विरमति अयं जन:

- प्रो.विजयकुमारजैन:

प्राचार्य:

रा.सं.सं.लखनऊपरिसर:

# सम्पादकीयम्

भारतीयशास्त्रपरम्परायां अनेकानि शास्त्राणि विद्यन्ते। यथा दर्शनशास्त्रं पुराणशास्त्रं तन्त्रागमादिशास्त्रं साहित्यशास्त्रं आधुनिकशास्त्रमित्यादि। सर्वेषां शास्त्राणामाधारभूताः वेदाः वर्तन्ते। तत्र चत्वारो वेदाः ऋग्यजुस्साम–अथर्वभेदात्, एतेषां शाखादिभेदेन महतीव्यापकता वर्तते, यथा भाष्यकारेणोक्तं– **''महाञ्शब्दस्य प्रयोगविषयः। सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्ना एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः एकविंशतिधा बाह्वृच्यं नवधाऽऽथर्वणो वेदो वाकोवाक्यम् इतिहासः पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः।''**

तथापि यथाशक्ति भारतीयशास्त्रपरम्परामवोधयितुं राष्ट्रियसंस्कृतसंस्थानेन अनेकविधप्रकल्पाः आचरिताः। येन विविधज्ञानविज्ञानादिविषयाणां सम्वर्द्धनं तस्य प्रचारः प्रसारश्च जायेत। संस्थानस्य विविधपरिसरेषु तस्मिन् सन्दर्भे अनेकविधसंरचनात्मकप्रक्रिया प्रवर्तते। यया माध्यमेन ज्ञानं वर्धेत। आदौ ज्ञानं भवति ततः इच्छा जागर्ति तस्यां सत्यां कृतिर्जायते ततः प्रवर्तते। तत्र प्रवृत्तेः आदिभूतकरणता ज्ञाने विद्यते। अत एव प्रथमं ज्ञानमर्जयेत। ज्ञानप्राप्तये बहुविधसाधनानि भवन्ति। तेषु लेखनक्रमः अन्यतमः भवति। शतं वद मा लिख इति आचार्यणामुक्तिः वस्तुतः लेखनात् पूर्वं स्वाध्याये प्रेरयति।

सम्यग् ज्ञानानन्तरं परीक्षणानन्तरं यदस्माभिः विचिन्त्य परिष्कृत्य लिख्यते तत्र भवति कश्चन नूतनाविष्कारः। ते लेखाः सर्वेषां कृते महते उपकाराय भवन्ति। तेषां लेखानां संग्रहः पत्रिकासु क्रियते। पत्रिकायाः प्रकाशनात् बहूनां नितरां महानुपकारो भवति। इति धिया लखनऊपरिसरेण 'गोमती' इति वार्षिकी पत्रिका प्रकाशयते। तस्यां संस्कृतस्य अन्यविषयस्य च विविधलेखाः भवन्ति। अस्यां पत्रिकायां लेखाः संस्कृतहिन्दीभाषाक्रमेण वर्तन्ते।

अस्याः पत्रिकायाः संरचनायै सर्वविधसाहाय्यं परिकल्पितवद्भ्यः परिसरप्राचार्येभ्यः प्रो. विजयकुमारजैनः वर्येभ्यः कार्तज्ञ्यम् समर्पयामि। अस्यां पत्रिकायां शोधलेखकेभ्यः आचार्येभ्यः, छात्रेभ्यः शोधच्छात्रेभ्यः सर्वेभ्यः साधुवादाः प्रदीयन्ते। एषा पत्रिका भवतां समेषां महते उपकाराय स्यात्। इति कामयामहे।

सम्पादकाः

प्रो. भारतभूषणत्रिपाठी

डॉ. पवनकुमारः

डॉ. गुरुचरणसिंहनेगी

# विषय-सूची

## संस्कृतखण्डः


| | | |
|---|---|---|
| 1. भाषाकौशलानां शिक्षणप्रस्तावा: | प्रो. लोकमान्यमिश्रः | 1 |
| 2. भाषाशिक्षणाय शिक्षावेदांगस्योंपयोगिता | डॉ. प्रदीपकुमारपाण्डेयः | 9 |
| 3. साहित्यमीमांसा | डॉ. मनमोहन तिवारी | 15 |
| 4. जगदीशाभिमताख्यातार्थविमर्शः | डॉ. नीरजकुमारभार्गवः | 20 |
| 5. माध्यमिकबौद्धमते भावानां स्वभावनिषेधः | डॉ. गुरुचरणसिंहनेगी | 30 |
| 6. भाषायाः उद्गमे विविध सिद्धान्ताः | डा. विचित्ररंजनपण्डा | 32 |
| 7. वैदिकसाहित्येषु मूल्यशान्तिस्थापनायाश्च विमर्शः | डॉ रुद्रनारायणनरसिंहमिश्रः | 38 |
| 8. परीक्षणस्यर प्रबन्धः, तस्य निर्माणञ्च | डॉ. बि.वेङ्कटलक्ष्मीनारायणः | 41 |
| 9. वाल्मीकिरामायणे सामाजिकचेतना | डॉ. मञ्जू त्रिपाठी | 46 |
| 10. वाल्मीकिरामायणे प्रकृतिचिन्तने गङ्गा | डॉ. बृजेश चन्द्र उपाध्याय | 48 |
| 11. वाल्मीकीरामायणे लोकोपयोगिनी शिक्षा | डॉ. गोकुलानन्द तिवारी | 54 |
| 12. संस्कृतस्य कृते विज्ञानक्षेत्रे उद्योगावसराः | डॉ. ललित मोहन तिवारी | 58 |
| 13. दर्शनान्तरीयसिद्धान्तविवेचनपुरस्सरं शाब्दिकदिशा प्रमाणविमर्शः | गोविन्दशुक्लः | 64 |
| 14. आचार्य ज्ञानसागरस्य काव्येषु साहित्य-सौष्ठव-समीक्षणम् | शैलेन्द्रकुमारः | 68 |


## हिन्दी खण्ड


| | | |
|---|---|---|
| 15. नाट्यशास्त्र उत्पत्ति एवं आचार्य परम्परा की समीक्षा | डॉ. नीरज तिवारी | 74 |
| 16. अरविन्द की दृष्टि में वाल्मीकीय रामायण | डॉ. हेरम्ब पाण्डेय | 82 |
| 17. महाकवि अश्वघोष | डॉ. मोहन मिश्र | 86 |
| 18. जातकों और उनकी अट्ठकथाओं का महत्त्व | डॉ. अतुल कुमार श्रीवास्तव | 90 |
| 19. बौद्धधर्म में निहित मानवीय मूल्यों की सार्वभौमिकता | माया उपाध्याय | 97 |

| | | |
|---|---|---|
| 20. जैनधर्म और पर्यावरण की पगडण्डियाँ | सुमेरीलाल | 102 |
| 21. वास्तुशास्त्र में वैदिक सन्दर्भ | मगरू प्रसाद विश्वकर्मा | 108 |
| 22. बौद्ध धर्म में नैतिक शिक्षा के मूल तत्त्व: एक दृष्टि | प्रियंका | 112 |
| 23. माध्यमिकदर्शन की दृष्टि में पञ्चस्कन्ध की अवधारणा | कृष्णा कुमारी | 119 |
| 24. भारतीयसौन्दर्यशास्त्र (काव्यशास्त्र के विशेष सन्दर्भ में) | रमेश चन्द्र नैलवाल | 124 |
| 25. पञ्चस्कन्ध : बौद्ध धर्म के सन्दर्भ में | डॉ. सोनल सिंह | 132 |
| 26. कालिदास के ग्रन्थों में प्रकृति के विविध स्वरूप | प्रवीक्षा दुबे | 140 |


**आंग्ल भाषा**


| | | |
|---|---|---|
| 27. Future of Education: Autonomous Learning | Prof. Avanish Agrawal | 144 |

# भाषाकौशलानां शिक्षणप्रस्तावा:

**- प्रो. लोकमान्यमिश्र:**

मानवजीवने भाषाया: स्थानमन्यतमं भवति। पशुमानवयोर्भेदोऽपि भाषाकारणादेव भवति। भाषामन्तरा सभ्यताया: संस्कृतेश्च परिकल्पनापि असम्भवा प्रतीयते। भाषा वस्तुत: प्रकृते: अनुपमं चमत्कृतियुतञ्चावदानं वर्तते। भाषाया: आधारेणैव मानव: सामाजिकप्राणी वर्तते। समाजे परस्परसम्पर्काय माध्यमरूपेण भाषा प्रयुज्यते। समाजादेव शिशु: भाषामधिगच्छति। तस्मादेव स सामाजिकाचरणस्य शिक्षणं प्राप्नोति।

सभ्यताया: इतिहासो वस्तुत: भाषाया इतिहासोऽपि वर्तते। सामान्यरूपेण कथ्यते यत् यस्मात् साधनात् वयं स्वकीयान् भावान् विचारान् वा अन्यान् प्रति प्रेषयाम: सा भाषेति। अत एव भाषा वस्तुत: सार्थकाणां ध्वनिप्रतीकाणां सा व्यवस्था वर्तते यस्या: माध्यमेन एतस्या: प्रयोक्ता श्रोता च परस्परं विचाराणाम् आदानप्रदानं कुर्वन्ति। अनुकरणेन अभ्यासेन च भाषावगम्यते। भाषा सदैव परिवर्तनशीला भवति परं भाषाया: मूलस्वरूपं न कदापि नश्यति।

'भाषा'व्यक्तायां वाचि धातो: अङि टापि च सति भाषापदं निष्पद्यते। सम्भाषणार्थे भाषा प्रयुज्यते। भाषापदम् आङ्ग्लभाषाया: 'LANGUAGE' इति पदस्यानुवादभूतं भवति। LANGUAGE इति पदम् 'लेटिन्' इति शास्त्रीयभाषाया: 'LINGUA' पदात् निष्पन्नं जिह्वा ध्वनि: इति (Toungue] Speech] Language) अर्था: भवन्ति एतस्य। सम्भाषणस्य प्रक्रियाया: सम्बन्धो मानवानामस्तित्वेन वर्तते। आरम्भिकावस्थायां मानवा: सङ्केतै: अस्पष्टाभिश्च ध्वनिभि: स्वकीयं भावम् आवश्यकतां वा सूचयन्ति स्म। सभ्यताया: विकासे मानवो यदा परिवारे, समुदाये समाजे वसतौ वा निवासं प्रारभत्, तदा एतादृशं संसाधनं परमावश्यकमासीत् येन विचाराणां भावानां च परस्परविनिमयो जायेत। एषैवावश्यकता भाषाया: प्रादुर्भावस्य कारणभूता सञ्जाता। आवश्यकतानां पूर्तये जातानां भावानां विचाराणाञ्च विनिमये भाषाया: विकासोऽभवत्।

भाषापदं यथा सरलं प्रतीयते तथैव गाम्भीर्यमपि धारयति। एषा भाषा मनुष्यैर्विरचिता आहोस्वित् ईश्वरप्रदत्ता वर्तते इति विषये विदुषां मते वैविध्यं दरीदृश्यते। भाषाया आविर्भाव: कस्मिन् कालखण्डे जात: उत वा भाषा अनादिर्वर्तते अथवा क्रमश: विकसिता जाता इत्येते मता: प्रचलन्ति। भाषाविचारयो: मिथ: घनिष्ठ: सम्बन्ध: वर्तते। एषा हि समर्जिता सम्पत्तिर्वर्तते। भाषाया: सम्बन्ध: परम्परया वर्तते। एषा एतस्मात् वंशात् अन्यस्मिन् वंशे गृह्यते। एतदेव कारणं यत् भाषाया: मूले परिवर्तनं भवितुं न शक्नोति।

**भाषाकौशलानि**

भाषाया: प्रयोगो व्यवहारे विधातुं विद्यालयै: बालकेषु श्रवणस्य भाषणस्य पठनस्य लेखनस्य चौतेषां कौशलानां विकासो विधीयते। शिक्षाशास्त्रे एतानि श्रवणकौशलम्, भाषणकौशलम्, पठनकौशलम्

लेखनकौशलं चेति अभिधीयन्ते। श्रवण-भाषण-पठन-लेखनक्रमेष्वेव कौशलानामेतेषां विकासः क्रियते। आदौ श्रवणकौशलम् अथवा भाषणकौशलम् एषः प्रश्नः वस्तुतः "आदौ कुक्कुटी अथवा आदौ अण्डः" इति सदृशः वर्तते। एतस्य निर्णयः दुस्साध्यो वर्तते। बृहदनुसन्धानेनैव एतस्य निर्णयः सम्भवति। प्रश्नोऽयं बौद्धपरम्परायाः अव्याकृतप्रश्न इव परित्याज्यो न भवति। वस्तुतः कौशलानामेतेषां परिचयः श्रेयस्करः प्रतीयते।

**श्रवणकौशलम्**

भाषाकौशलेषु इदं प्रथमतया परिगण्यते श्रवणकौशलं नाम। श्रवणं हि आजन्मतः मृत्युपर्यन्तं प्रचलति। ज्ञानप्राप्तेराधारः श्रवणमेव। जाग्रदवस्थायाः सर्वाधिककालो मानवः श्रवणेनैव व्यतीयते। श्रवणस्य साक्षात् सम्बन्धो भाषणेन पठनेन च भवति। तीव्रमतिः बालकः श्रेष्ठः श्रोता अपि भवति। यो हि सावधानतया शृणोति स एव सावधानतया पठितुमपि शक्नोति। अनेनैव प्रकारेण श्रेष्ठः श्रोता एव सुवक्ता सञ्जायते।

श्रवणं हि प्रकृतिप्रदत्ता शक्तिः कला चेति वर्तते। सामान्यरूपेण श्रवणं ध्वनेः वार्तालापस्य वाद्यस्य सङ्गीतस्य च श्रवणेनैव स्वीक्रियते। भाषाकौशलसन्दर्भे श्रवणकौशलं श्रवणेन, श्रुतस्य अर्थस्य भावस्य वा ग्रहणेन सम्बद्धं भवति। श्रवणक्रिया हि मानसिकी क्रिया भवति। श्रवणाय भाषायाः ध्वनीनां शब्दानां च बोधः परमावश्यकः। अत्र तत्परता रुचिः उत्साहश्च अपेक्ष्यते। विद्यालये श्रवणस्य सर्वाधिकाः प्रयासाः कक्षाशिक्षणे विधीयन्ते। पाठ्यसहगामिक्रियाणामयोजनेऽपि कौशलमेतत् सक्रियतामाचरति।

**भाषणकौशलम्**

भाषणकौशलकारणकारणादेवभाषायाः नामकरणं भाषेति वर्तते। वस्तुतः भाषाया आधारो भाषणमेव। विचाराभिव्यक्तिरेका कला वर्तते। एतस्याः जीवनस्य प्रत्येकं क्षेत्रे आवश्यकता भवति। वाणी एव विशिष्टाभूषणं नाम। उक्तं च भर्तृहरिणा -

**वाण्येका समलङ्करोति पुरुषं .......**
**वाग्भूषणं भूषणम्॥**

वस्तुतः भाषैव मानवानां कृते एकमात्रम् आभूषणम् अलङ्करणं वेति वर्तते। स्थूलाभूषणानि तु नश्वराणि भवन्ति। भाषणं हि चतुर्षु भाषाकौशलेषु विशिष्टं कौशलं भवति। अस्माकं सामाजिकव्यवहाराः भाषणमाध्यमेनैव सम्पाद्यन्ते। भाषणेनैव विचाराणां विनिमयो भवति। प्राचीनभारते श्रुतिपरम्परायां विद्यार्थिनः विद्यार्जनं भाषणमाध्यमेनैव कुर्वन्ति स्म। लेखनात् पूर्वं भाषणमेव ज्ञानस्य आधाररूपेण आसीत्। वर्तमानजीवने भाषणेनैव साफल्यं प्राप्यते। भाषणे शुद्धोच्चारम् अपेक्ष्यते।

**वर्णोच्चारणम्**

वर्णोच्चारणप्रक्रिया वैज्ञानिकरीत्या संस्कृतग्रन्थेषु प्रतिपादिता वर्तते। तत्रादौ उच्चारणपदं हि उत् उपसर्गात् 'च' (चरणे) धातोः णिचि प्रत्यये सति निष्पन्नं भवति। एतस्यार्थो भवति उच्चौर्गमनमिति। पाणिनीयशिक्षेति वेदाङ्गग्रन्थे प्रतिपादितं यत् वस्तुतः वक्ता यदा किमपि प्रतिपादितुं वाञ्छति तर्हि स्वबुद्धौ सः कथ्यं स्थापयति, ततः वक्तुमिच्छा जागर्ति। एतेन शरीरे विद्यमानायाम् अग्नौ आघातो

भवति। आघातमेतत् शरीरे विद्यमानं वायुं प्रेरयति। वायुस्तु जठरात् उर:स्थलात् वा उपरि सम्प्राप्य कण्ठे समागच्छति। कण्ठात् ऊर्ध्वे प्रक्षिप्तो वायु: मूर्धाम् आगच्छति। तस्मात् स्थलात् वायोरुपरि भागे प्रसृता भवति। एतेन स्वर–काल–स्थान–आभ्यन्तरप्रयत्न–बाह्यप्रयत्नप्रभृतिकारणात् वायु: तद् तद् वर्णान् उत्पादयति। एवं वर्णानामुच्चारणाय ध्वनिरुद्भवति।

वर्णोच्चारणप्रक्रियायां वैदिकसंहितायां प्रतिपादितं वर्तते यत् वाक् इत्यस्य अधिष्ठानं ''आस्यं'' इति वर्तते। आशयोऽयं यत् वाक् आस्ये समुद्भवति। निरुक्तग्रन्थे यास्काचार्येण एतस्योत्पत्ति: 'अस्' प्रक्षेपणे इति धातो: 'आ' उपसर्गात् 'स्यन्द्' धातोश्च निरूपिता वर्तते। महर्षि: पतञ्जलि: मनुते यत् आस्यमाध्यमेन वक्ता वर्णानां प्रक्षेपणं विदधातीति। पतङ्गप्राजापत्यऋषिर्मनुते यत् मनस: सङ्कल्पमेव उच्चारणेन द्योतितं भवति। कवयस्तु तस्याभिव्यक्त्या तं परिरक्षयन्तीति। दीर्घतमस् औचथ्यऋषिर्मनुते यत् वाक् इत्यस्य तिस्र: अवस्था: उच्चारणात् पूर्वं भवन्ति। एता: हि गोपनीया: नाम। मनीषया एव एतानवगच्छन्ति। उच्चारणं तु वाक् इत्यस्य चतुर्थावस्था वर्तते। एतस्यैव ऋक्मन्त्रस्य व्याख्यायां सायणभाष्ये वाण्या: परा–पश्यन्ती–मध्यमा–वैखरीति चत्वारो भेदा: सन्तीति सलक्षणं प्रतिपादितवान्। विश्वामित्रगाथिनऋषिमते तु धीरा: कवय: स्वकीयं कथ्यं मनसि सम्यक् विचार्य उन्नयन्ति वर्णयन्ति वेति। अगस्त्यमैत्रावरुणिऋषेर्कथनमस्ति यद् उच्चारणानन्तरं वाक् द्यावा पृथिव्या: मध्ये अर्थात् आकाशे परिव्याप्ता भवति। वस्तुत: वाक् इत्यस्य सर्वविधव्यापार: अर्थाभिधानाय भवति।

भाषणे वक्ता श्रोता च उभौ अपेक्षितौ भवत:। अत्र विद्यार्थी श्रवणीयशब्देषु भाषणस्य योग्यताम् अर्जयन्ति। अत्र सन्दर्भानुरूपं गति: शारीरिकमुद्रा च अनुप्रयुक्ता भवति। विरामादीनाम् अवधानमत्र करणीयं भवति । भाषणे व्याकरणनिष्ठा भाषा प्रयुज्यते । भाषणकाले अर्थानुसारं शब्दानां पदबन्धानां वाक्यांशानां च क्रम: निर्धायते । भाषणे भावानाम् अभिव्यक्ति: स्पष्टतया सरलतया प्रभावोत्पादकतया च विधीयते ।

**भाषणकौशलपक्षा: –**

1. शुद्धोच्चारणम् – शिक्षितव्यक्ते: लक्षणं तस्य शुद्धोच्चारणं भवति । वक्तु: उच्चारणस्य प्रभावो नूनमेव श्रोतृषु भवति। तालव्यादिसकाराणाम्, नकारस्य णकारस्य, क्ष इत्यस्य, त्र इत्यस्य द्य–प्र–प्रभृतिव्यञ्जनानां ऋकारादिस्वराणाञ्च अशुद्धोच्चारणम् उपहासस्य कारणं भवितुमर्हति। एवं प्रत्येकं वर्णस्य शुद्धोच्चारणं महत्त्वपूर्णं भवति।

2. प्रवाह: – अत्र बालकानां भावाभिव्यक्ते: संकोचो दूरीक्रियते। एतदर्थं कक्षायां समये समये बालान् सम्भाषणाय प्रेरणा दास्यते।

3. गति: – भाषणे गति: भिन्ना भवति। एषा गति: समान्या एव अभीष्टा भवति न तु तीव्रा मन्दा वा।

4. बलाघात: – स्वकीये कथने प्रामुख्यं विधातुं वक्ता कस्मिंश्चित् वाक्ये अक्षरे पदे वा बलं प्रददाति येन श्रोता तत्र गाम्भीर्यं स्वीकरोति। अक्षरे शब्दे वा बलप्रदानस्य प्रक्रियैषा बलाघात इति कथ्यते।

5. अनुतानः - वाक्यस्य उच्चारणकाले भावानुसारं स्वरस्य अरोहावरोहप्रक्रिया अनुताननाम्ना कथ्यते। एतेन शब्दार्थे वाक्यार्थे वा परिवर्तनं जायते। अत्र सामान्यकथनम् आश्चर्ययुतं प्रश्नं च पृथक् प्रतीयते।

**पठनकौशलम्**

पठनं हि विशिष्टं भाषाकौशलं वर्तते। पठने लिखितानाम् अमूर्तध्वनीनां सार्थकत्वं प्रदीयते। पठने वर्णानां कण्ठताल्वादिस्थलानां पालनपुरसरं शुद्धोच्चारणं विधीयते। भारतीयसंस्कृतवाङ्मये उच्चारणसम्बन्धिनिदर्शनानि अतिप्रसिद्धानि सन्ति। यथा हि -

**व्याघ्री यथा हरेद्वत्सान् दंष्ट्राभ्यां न च पीडयेत्।**
**भीता पतनभेदाम्यां तद्वद्वर्णान् प्रयोजयेत्॥**

अर्थात् व्याघ्री स्वकीयं शिशुं मुखे स्वीकृत्य यत्र तत्र स्थापयति। सा न तु दन्तैः पीडामुत्पादयति नैव च स्वसुतं पातयति। एवमेव वर्णानामुच्चारणं सुस्पष्टतया विधेयमिति। पातञ्जलमहाभाष्येऽपि -

एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुक् भवति।

अर्थात् एकस्यापि शब्दस्य सम्यक् प्रयोगः ज्ञानञ्च न केवलं अस्मिन् लोके प्रत्युत स्वर्गे लोकेऽपि कामनानां पूर्तिं विदधति। शुद्धोच्चारणाय एतद् अत्यन्तं प्रेरणास्पदं वर्तते इति।

लिखितभाषायाः ध्वन्यात्मकं पठनमेव वस्तुतः पठनं नाम। अत्र अर्थग्रहणमपि अपेक्षितं भवति। भाषाशिक्षणे पठनं विशिष्टं महत्त्वं धारयति । पठनमेतत् साक्षरतायाः पर्यायरूपेण भवति। आदौ पठनं शिक्षते ततः लेखनं प्रारभते। अवकाशकालस्यसदुपयोगः पठनेन भवितुमर्हति। पठनं मनोरञ्जनस्यापि साधनभूतं भवति । पठनमाध्यमेन मानवेषु जिज्ञासानाम् उपशमनं जायते । व्यक्तित्वविकासाय पठनं महत्त्वपूर्णं भवति। वस्तुतः भारतीयसंस्कृतवाङ्मये प्राचीनकालादेव अर्थग्रहणयुक्तस्य पठनस्यैव मान्यता वर्तते। यास्काचार्यो निरुक्ते-

**यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते।**
**अनग्नाविव शुष्कैन्धो न तज्ज्वलति कर्हिचित्॥**

निरूप्य अर्थग्रहणयुतं पठनमेव निर्दिष्टवान्।शिक्षावेदांगे पाठकलक्षणं प्रतिपादितं वर्तते।यथा हि-

**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।**
**धैर्यं लयसमर्थञ्च षडेते पाठकाः गुणाः॥**

अर्थात् मधुरता, अक्षराणां स्पष्टता, पदच्छेदपूर्वकम्, सुस्वरयुतम्, धैर्यपूर्वकम् लयबद्धं च पठनं विधेयमिति।

**पठनप्रकाराः -**

1. वैयक्तिकपठनम् - अत्र एकाकी एव पठनं करोति ।

2. सामूहिकपठनम् - अत्र अनेके जनाः एकस्यैव पाठ्यांशस्य समवेतभावेन पठनं कुर्वन्ति । अत्र गतिः स्वरश्च समा एव भवति ।

कक्षाशिक्षणदृष्ट्या पठनस्य प्रकारद्वयं भवतः-

1. आदर्शपठनम्-पठनकौशले आदौ आदर्शरूपं छात्राणां पुरतः उपस्थापनीयं भवति। तेनाधारेण एव छात्राः अनुकर्तुम् अनुसर्तुं च शक्नुयुः। परं पठनकौशलविषये तु आदर्शपठनम् अत्यन्तं प्रन्धान्यम् आवहति। अतः शिक्षकः आदर्शवाचनं स्वयमेव कुर्यात्। कक्षायां सम्यक्तया स्थित्वा शुद्धोच्चारणपूर्वकं सुस्पष्टं विराम-गति-आरोहावरोहादिनियमान् अनुपालयन् विषयं प्रस्तुतीकरोति। प्रस्तुतीकरणसन्दर्भे विषयाध ारितैः विविधाभिनयैः आदर्शवाचनं करोति।

2. मौनपठनम्- आदर्शपठने स्वरयन्त्रस्य उपयोगात् परिश्रमः अधिको भवति। अतः मौनपठनस्य अभ्यासः छात्राणां कृते अत्यन्तम् आवश्यकः। मौनपठनं नाम पाठस्य शान्तिपूर्वकं तथा च मननपूर्वकं पठनम्। मौनपठनद्वारा वाचनगतेः वर्धनं भवति। अर्थग्रहणगतौ द्रुतत्वसम्पादनाय मौनपठनम्मुपयुक्तं भवति। स्वाध्यायं कर्तुमिदं अतीवापेक्ष्यते। ज्ञानार्जाय आधारो भवति मौनपठनम् ।

**लेखनकौशलम् -**

वाचिकक्रियायाः वर्णरूपमेव लेखनं भवति। यद्यपि लेखनस्य कौशलेषु अन्तिमं स्थानं भवति, तथापि अस्य प्राधान्यम् अधिकमेव। यतः लेखनेन एव भाषायां सम्पूर्णाधिकारः प्राप्तुं शक्यते। अनेन छात्राणां लेखनशक्तेः वर्धनं जायते ।लेखनगतौ वेगस्य वर्धनं भवति।संस्कृतध्वनीनां प्रत्यभिज्ञानेन वर्णभेदज्ञानम।भाषायाः शुद्धं, स्पष्टं, सुन्दरं च लेखनाभ्यासः अपेक्ष्यते। लेखनेनएकाग्रतायाः स्मरणशक्तेश्च विकासः भवति। अत्र विरामादिचिह्नानां प्रयोगज्ञानं क्रियते।उक्तविषयस्य लिपिबद्धरूपेण लेखनसामर्थ्यं छात्रेषु भवति।

लेखनकौशले वर्णानां शब्दानां वाक्यानां च ज्ञानं समाविशति। एतानि एव लिखितभाषायाः तत्त्वानि भवन्ति। वर्णानां शुद्धेषु लिपिचिह्नेषु परिवर्तनं, व्याकरणसम्मतता विचाराणां सुसम्मतता, सुस्पष्टस्य सुन्दरस्य च लेखनं शिक्षते।

कस्याश्चिदपि भाषायाः वर्णानां सूची एव वर्णमाला भवति। संस्कृतभाषायाः लिपिः देवनागरीति आक्षरिकालिपिः वर्तते। क्रमबद्धता, लिपिसंकेतानां पूर्णता, वर्णविभाजनस्य वैज्ञानिकता देवनागरीलिपेः विशेषता भवन्ति। अनया लिप्या विश्वस्य समस्तानां भाषाणां लेखनं सम्भवति। अस्यां लिप्यां यथा लिख्यते तथैव पठ्यते । एषा लिपिः मात्रा दृष्ट्या परिपूर्णा वर्तते । अत्र संयुक्ताक्षराणि सारल्येन विलिख्यन्ते । लेखनकौशले चित्ताकर्षकतया लेखनस्य प्रयासाः विधीयन्ते ।

**कौशलविकासप्रस्तावाः**

**श्रवणकौशलम्-**

भाषाशिक्षाविदः श्रवणकौशलस्य विशेषेण वैशिष्ट्यं प्रतिपादयन्ति। श्रवणकौशल एव अन्येषां कौशलानां साफल्यं निर्भरं भवति। एतस्मिन् कौशले शुद्धता सुस्पष्टता च नूनमेव परिपालनीया भवति। छात्राः तस्यैव श्रवणं विधेयुः यद्धि संस्कृतं परिशुद्धं वा स्यात्। ध्वनीनां शुद्धरूपाणामुच्चारणं संरक्षणीयम्। दूरदर्शनादिमाध्यमेनापि विशुद्धानां प्रयोगाणामेव प्रसारणं भवेत्।

संस्कृतशिक्षणे परस्मैपदानाम् अत्मनेपदानाञ्च शुद्धतया प्रयोगपूर्वकं विशिष्टविदुषामुद्बोधनानां प्रत्यक्षाप्रत्यक्षतया छात्राणां कृते श्रवणव्यवस्था विधेया। विदुषां परिचर्याः काव्यपाठाश्च विद्यालयेष्वायोजनीयाः।

भारतीयशिक्षाप्रणाल्यां लेखनकैशले अतिरिक्तमहत्त्वकारणात् श्रवणकौशलं सर्वदा उपेक्षितं दरीदृश्यते। एतस्य कारणं यत् श्रवणकौशलस्य स्थानं मूल्याङ्कनप्रक्रियायां तिरस्कृतं वर्तते। मूल्यांकने श्रवणकौशलस्यसमावेशः अपरिहार्यो वर्तते। वस्तुतः समेषां मूल्याङ्कानानामाधार एव श्रवणकौशलं भवेत। एतदर्थं शिक्षाशास्त्रिणः भाषावैज्ञानिकाः सञ्चारमाध्यमानां च वेत्तारः एवंविधानां मूल्याङ्कनोपकरणानां विकासं विधेयुः येन मूल्याङ्कनं वस्तुनिष्ठं वैधं विश्वसनीयं च जायेत।

**भाषणकौशलम्**

भाषणकौशलस्य विकासे शुद्धोच्चारणम् अतीवमहत्त्वपूर्णं भवति। शुद्धोच्चारणस्य शिक्षायै वैदिकग्रन्थेषु शिक्षा वेदांगग्रन्थाः प्रातिशाख्यग्रन्थाश्च निदर्शनभूताः सन्ति। एतेषु ग्रन्थेषु विविधस्वराणां व्यञ्जनानां च शुद्धोच्चारणं पशुपक्षिभिः विविधावस्थासु जायमानानां ध्वनीनां निर्दिष्टं वर्तते। यद्यपि शिक्षाग्रन्थानां प्रवर्तनं वेदमन्त्राणां शुद्धोच्चारणस्य शिक्षायै विहितं तथापि वर्तमानसमयेऽपि प्रचलितानां वर्णानां शुद्धोच्चारणाय वेदाङ्गग्रन्थानां साहाय्यं स्वीकरणीयमेव। एतदस्माकं कृते भागधेयं यत् संस्कृतवाङ्मये उच्चारणशिक्षायै पृथक् रूपेण ग्रन्थाः विलसन्ति। एतेषामुपयोगः भाषणकौशलस्य विकासाय अवश्यमेव विधेयः। विद्यमानस्य ज्ञानस्य अवहेलना कथं कर्तुं शक्यते। भाषाशिक्षणशास्त्रस्य विद्यमानग्रन्थेषु भारतीयवाङ्मयस्य ग्रन्थानां निदर्शनानि नूनमेव देयानि।

**पठनकौशलम्**

भाषाकौशलेषु पठनकौशलं विशिष्टं महत्त्वं बिभर्ति। अत्रापि शुद्धोच्चारणस्य तानि एव तत्त्वानि गृहीतव्यानि यानि हि भाषणकौशले विलसन्ति। वर्तमानसमये पठने अर्थग्रहणं समाविश्य शिक्षाशास्त्रिणः गौरवमनुभवन्ति। पठने अर्थग्रहणतत्त्वं पाश्चात्यैः समागतमिति भूरिशः प्रतिपादयन्ति। परं भारतीयवाङ्मये तत्त्वमेतत् पुरा युगेऽपि स्वीकृतमासीदिति प्रतिपादनीयम्। भारतीयवाङ्मये श्लोकेषु समुपलब्धानां पठनविवरणानां समावेशः भाषाशिक्षणशास्त्रे नूनमेव विधेयः। एतदर्थं विविधानामुपकरणानां निर्मितिः अपेक्ष्यते। येन शुद्धोच्चारणस्य शिक्षा सम्भवेत्। पठनस्य मूल्यांकनाय विविधोपकरणानां निर्माणमपि विद्वद्भिर्विधेयम्।

**लेखनकौशलम्**

भारतीयशिक्षाव्यवस्था हि लेखनाधारिता नाम। लेखनस्य वर्तनीगतसमस्यानां निराकरणाय आवश्यकोपायाः अभ्यासाश्च अन्वेषणीयाः। देवनागरीलिप्यां वर्णमालायाः लेखनं शिक्षितुं वयोनुसारम् उपायविषये व्यापकस्तरे अनुसन्धानमपेक्ष्यते। वर्णमालायाः क्रमविषये सरलात् कठिनं प्रति इति शिक्षणसूत्रानुसारं वर्णानां निर्धारणं विधेयम्। एतत्कृतेऽपि समृद्धस्य शोधस्य आवश्यकता वर्तते।

देवनागरीलिप्यां संस्कृते विविधभाषासु प्रचलितानां विरामचिह्नानां प्रयोगः यथारूपम् विधीयते। संस्कृतवाङ्मयं हिपद्यबद्धं नाम। तत्र श्लोकान्ते पूर्णविरामद्वयं स्थाप्यते। अद्यावधिं यावत् एतस्य विरामस्य समुल्लेखः न कुत्रापि प्राप्यते। भाषावैज्ञानिकाः व्याकरणशास्त्रज्ञाः भाषाशिक्षाशास्त्रिणश्च सम्भूय एतस्य चिह्नस्य नामकरणं "श्लोकान्तचिह्नम्, छन्दःपूरकचिह्नम्, पद्यान्तचिह्नं"वेति कर्तुं शक्नुवन्ति। ततः एतस्य चिह्नस्य विद्यमानता व्याकरणग्रन्थेषु विधेया।

लेखनशिक्षणे आरम्भिकावस्थासु वर्तनीगतत्रुटीनां परिष्कारः अपेक्ष्यते। येन आगामिनिकक्षासु त्रुटीनां न्यूनीकरणं सम्भवेत्। लेखने परिष्काराय अभ्यासानां विकासः अनुसन्धानैर्विधेयः। संशोधिताभ्यासानां सन्निवेशः छात्राणां पाठ्यचर्यायां करणीयः। तदैव छात्राः अभ्याससम्पादने रुचिपूर्वकं भागं गृहिष्यन्ति। मौलिकतायाः विकासाय बहुविकल्पीयप्रश्नानां समावेशः भाषाशिक्षायाम् अल्पमात्रायामेव करणीयः।

भाषाकौशलानां शिक्षणं भाषाशिक्षणे गुरुतरं महत्त्वं धारयति। एतेषां शिक्षणं सवधानतया विधेयम्। व्यापकस्तरे अनुसन्धानस्य प्रयासाःसमायोजनीयाः।अनुसन्धानस्य परिणामानां प्रचारः प्रसारश्च तेषां कार्यान्वनाय अपेक्ष्यन्ते। एतेन शैक्षिकानुसन्धाने भाषाशिक्षणक्षेत्रे व्यापकतायाः सन्निवेशः भवितुमर्हति भाषाशिक्षणे च प्रवाहः आगमिष्यति।भाषाशिक्षणं समृद्धिं प्रति प्राप्स्यति।

**आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥**
**मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्।**
**कण्ठे.....................शीर्षन्यम्......................॥**
**सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्यमारुतः।**
**वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः॥**
**स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः।** - पाणिनीयशिक्षा, 6-10

दधामि ते द्युमतीं वाचमासनम्। -ऋग्वेदः, 10/98/2
आस्यमस्यते। आ-स्यन्दत एतदन्नमिति वा। - निरुक्तम्, 1/9
अस्यत्यनेन वर्णान् इत्यास्यम्। अन्नमेतदास्यन्दत इति वाऽऽस्यम् - महाभाष्यम्, 1/1/9
पतङ्गो वाचं मनसा बिभर्ति तां गन्धर्वो अवदत् गर्भे अन्तः।
तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो नि पान्ति॥ - ऋघ्वेदः, 10/177/2
चत्वारि वाक्परिमिता पदानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचि मनुष्याः वदन्ति॥ -ऋग्वेदः, 10/64/45

अपरे मातृकाः प्रकारान्तरेण प्रतिपादयन्ति- परा पश्यन्ती मध्यमा वैखरीति चत्वारीति। एकैव नादात्मिका वाङ् मूलाधारा युतिता सती परेत्युच्यते। नादस्य च सूक्ष्मत्वेन दुर्निरूपत्वात् सैव हृदयगामिनी पश्यन्तीति उच्यते। योगिभिर्द्रष्टुं शक्यत्वात्। सैव बुद्धिं गता, विवक्षां प्राप्ता मध्यमेत्युच्यते। मध्ये हृदयाख्य उदीयमानत्वान् मध्यमायाः। अथ यदा सैव वक्त्रे स्थिता ताल्वोष्ठादिव्यापारेण बहिर्निर्गच्छति तदा वैखरीत्युच्यते। एवं चत्वारि वाचः पदानि परिमितान्।

**युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः।**
**तं धीरासः कवयः उन्नयन्ति स्वाध्यो मनसा देवयन्तः॥**
**पुनन्ति धीराः अपसो मनीषा देवया विप्र उदियर्ति वाचम्।** -ऋग्वेदः, 3/8/4-5
**क्रन्ददश्वो नयमानो सवद् गौरन्तर्दूतो न रोदसी चरद्वाक्।** -ऋग्वेदः, 1/173/3

## सन्दर्भग्रन्थसूची

1. मिश्रः, लोकमान्यः; साहित्यशिक्षणविधिः, मृगाक्षीप्रकाशनम्, ५/११३, विरामखण्ड, गोमतीनगर, लखनऊ, २०१०.

2. रा., देवनाथः; उपाध्यायः, भुवनेशः; व्याकरणशिक्षणविधयः, प्रथमं संस्करणम्, भारतीयविद्या संस्थान, वाराणसी, १९९२.

3. पाण्डेयः, इन्दिराचरणः; संस्कृत शिक्षण समीक्षण, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, प्रकाशनविभागः, १९९२.

4. उपाध्याय, राजेश्वर एवं वशिष्ठ श्रीधर; संस्कृत एवं सूक्ष्म शिक्षण प्राविधिकी, प्रथम संस्करण, भारतीय विद्या संस्थान, वाराणसी।

5. चौबे, विजयनारायण; संस्कृत शिक्षण विधि, उत्तरप्रदेश हिन्दी संस्थान, लखनऊ , १९८५.

6. माथुर, एस. एस. शिक्षणकला, शिक्षण तकनीक एवं नवीन पद्धतियाँ, विनोद पुस्तक मन्दिर, आगरा।

7. सफाया, रघुनाथ; संस्कृत शिक्षण, हरियाणा ग्रन्थ अकादमी, १९९०.

8. पाण्डेय, रामशकल, संस्कृत शिक्षण, विनोद पुस्तक मन्दिर, आगरा।

9. शर्मा, सी.एच.एल.एन.; सिंह फतेहश्च, संस्कृतशिक्षणं नवीनप्रविधयश्च, राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः।

10. संस्कृत आयोग का प्रतिवेदन (अलखनिरञ्जनपाण्डेयकृत हिन्दी अनुवाद), सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी, १९७९.

11. Bokil, Vinayak Pandurang A New Approach to Sanskrit, Chitrashala Prakashan, Poona. 1956.

12. Bhandarkar, Ram Krishna First book and Second book of Sanskrit] Keshav Bhikaji Dhavle Publications, Bombay, 1864.

13. Percivial WrenThe Indian Teacher's Guide to the Theory and Practice of Mental, Moral and Physical Education Bombay, (1910).

आचार्यो विभागाध्यक्षश्च<br>
शिक्षाशास्त्रविभागः<br>
राष्ट्रियसंस्कृतसंस्थानम्<br>
लखनऊपरिसरः, लखनऊ।<br>
दूरभाषः- 09451170646

# भापाशिक्षणाय शिक्षावेदांगस्योपयोगिता

- डॉ. प्रदीपकुमारपाण्डेयः

स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते, उपदिश्यते वा सा शिक्षा इति सायणाचार्यस्य ऋग्वेदभाप्यभूमिकायामुक्तम्। तदनुसारं तच्छास्त्रं शिक्षानाम येन वेदमन्त्राणामुच्चारणं सम्यक् सम्पाद्यते। वेदे स्वरस्य प्राधान्यमस्ति, स्वरज्ञानं च वेदाधा३३रितम्। को नाम वेद इति जिज्ञासा अपि समुत्पद्यते। संस्कृतवांमयस्य प्राचीनतमो ग्रन्थो वेद एवाभिवर्तते। वेदो विश्वस्य सर्वाधिकं प्राचीनं समृद्धं च साहित्यमस्ति। वैदिकसाहित्यमत्युन्नतं विलक्षणं चास्ति। साहित्यसमालोचकैः मन्त्रसंग्रहरूपाः संहिताः, ब्राह्मणानि, आरण्यकानि, उपनिपदाः, वेदांगानि च वैदिकसाहित्ये अंगीकृतानि। संहितायां ऋग्वदिसंहिता, यजुर्वेदसंहिता, सामवेदसंहिता, अथर्ववेदसंहिता च वर्तन्ते। वेदानामाख्यानभूतानि ब्राह्मणानि, ब्राह्मणग्रन्थानां परिशिप्टानि आरण्यकानि, आरण्यकानां च परिशिप्टाः ब्रह्मविद्यासरोवररूपाश्च उपनिपदाः कथ्यन्ते। वेदशब्दस्यार्थप्रतिपादनक्रमे अस्य व्युत्पत्तिलभ्यार्थाः प्राप्यन्ते। तदनुसारं विद्यन्ते, ज्ञापयन्ते धर्मार्थकाममोक्षाः अनेनिति व्युत्पत्त्या निप्पन्नो चतुर्वर्गज्ञानसाधनभूतो नाम वेद। इप्टप्राप्यानिप्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः। वेदभाप्यभूमिकायां सायणाचार्येणाभिहितम्-

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।
एनं विन्दन्ति वेदेन तस्मात् वेदस्य वेदता।।

सायणाचार्येण तत्रैव उक्तम्- 'विदन्ति-जानन्ति, विद्यन्ते-भवन्ति, विन्ते-विचारयन्ति, विन्दते-लभन्ते, सर्वे मानवाः सत्त्वविद्यां यैर्येपु वा विद्वांसश्च भवन्ति ते वेदाः॰। विद् ज्ञाने इति धातोः घग्ि प्रत्यये कृते सति वेदशब्दः निप्पद्यते। धातुपाठे अन्ये३पि बहवो 'वेद्॰ धातवः पठिताः। तद्यथा- विद् सत्तायाम्, विद् ज्ञाने, विद् लृलाभे, विद् विचारणे, विद् चेतनाख्याननिवासेपु च। वेदेप्वेतेपां सर्वेपामपि धातूनां तेपामर्थानां च सार्थकता वर्तते। 'सर्वं वेदे प्रतिप्ठितम्ष इति प्रसिद्धिं गतस्य वेदस्य पर्यायाः सन्ति श्रुतिः, आम्नायः, अनुश्रवः, आगमादयश्च। एवं वेदो नाम ज्ञानबोद्धकः, धर्मस्याधारः, संस्कृतेः जनकः, पुरुपार्थचतुप्टयस्य सम्पादकः, सुखशान्तिसाधकः, कर्तव्याकत्तव्यबोध कश्च। विविधविधानाम्, सकलशास्त्राणाम्, सर्वधर्माणाम्, विश्वसंस्कृतिनाम्, विभिन्नानां कमनीयकलानां च स्रोतांसि वेदेपु प्राप्यन्ते।

वेदानामाविर्भावविपये विदुपां विविधाः विसंवादाः विद्यन्ते। केचिदस्मात् कालात् लक्षत्रयवर्पपूर्वम्, अपरे इस्वीसंवत्सरात् पंचविंशतिसहस्रपूर्वम्, अन्ये पंचशताधिकचतुस्सहस्रवर्पपूर्वम् इतरे च पंचशताधिकद्विसहस्रवर्पपूर्वं वेदानामाविर्भावकालः सम्भाव्यते। स्वदेशसंस्कृतगौरवाभिमानिनः तत्र भवन्तः श्रीमन्तः सायन-दयानन्द-सातवेलकरादयो वेदविद्याविशारदाः मनीपिणः सृप्टिरचनाकालादेव वेदाविर्भावं स्वीचक्रुः। सृप्ट्यादौ परमेश्वरकृपया निर्मलान्तःकरणैः चिरन्तनैः ऋपिभिः वेदानां मन्त्रद्रप्टारः। प्राचीनभारतीयविद्वांसः वेदान् अपौरुपेयमिति वदन्ति। किन्तु प्रामाणिकरूपेण विपये३स्मिन् किमपि वक्तुं नैव शक्यते। पुरुपसूक्तानुसारं वेदानामुत्पत्तिः परमेश्वरादभवत्। यथोक्तम्-

तस्मात् यज्ञात् सर्वहुतः ऋचः सामानि यज्ञिरे।
छन्दांसि यज्ञिरे तस्मात् यजुस्तस्मादजायत्।।

चतुर्विधपुरुपार्थप्राप्त्यर्थं वेदानां व्यापकप्रभावो दृश्यते। वेदाः मानवमर्थकामौ प्रत्यासक्तिः सुदृढम्, व्यावहारिकम्, कर्मनिष्ठं च कुर्वन्ति, धर्ममोक्षौ प्रति च परोपकाराय प्रेरयन्ति। 'वेदानधीत्य वेदंचापि यथाक्रमम्श इति स्मृत्यादिनिर्देशात् चत्वारो वेदाः अध्येतव्याः। यदि सर्वेपां वेदानामध्ययनं कर्त्तुमक्षमः तर्हि त्रयो वेदाः, द्वौ वेदौ, एक वेदो वा अध्येतव्यः। तैतिरीयारण्यकोपनिपदि लिखितमस्ति- 'स्वाध्यायोऽध्येतव्यःश। स्ववेदेनात्र स्ववंशपरम्परायां यस्य कस्याप्येकवेदस्य सहजरूपेण पठनं निर्दिप्टम्। तात्पर्यमस्ति यदन्येपां वेदानामध्ययनं कर्तुं यदि नैव शक्यते, तर्हि स्वपरम्परानिर्वाहयितुं स्वकीयवेदस्याध्ययनं तु कर्तव्यमेव। वेदाध्ययनं ब्राह्मणस्य परमं तपः उच्यते-

वेदमेव सदाभ्यस्येत्तपस्तप्यन् द्विजोत्तमः।
वेदाभ्यासो हि विप्रस्य तपः परहितमोच्यते।।

मनोकामनापूर्त्यर्थमपि वेदाध्ययनमनिवार्यम्। तदर्थं सर्वजनहिताय वेदशब्दस्यार्थज्ञानाय च केपांचन शास्त्राणामावश्यकता वर्तते। तान्येव आवश्यकशास्त्राणि वेदांगत्वेन ज्ञायन्ते। येन साधनेन कस्यापि वस्तुनः स्वरूपज्ञाने प्रोत्साहनमायाति तदंगमुच्यते। शिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतिपरूपाणि पड्वेदांगानि पाणिनीयशिक्षायामुक्तानि। तद्यथा-

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिपामयनं चैव वेदांगानि पडैव तु।।

वेदांगानां निमार्णं वैदिककालस्योत्तरार्धे सम्भाव्यते। एतेपामुल्लेखो गोपथब्राह्मण-बौद्धायनधर्मसूत्र-गौतमधर्मसूत्र-रामायण-महाभारतादिपु ग्रन्थेपु उपलभ्यते। बुधैः बुद्धावतारात् प्राग्वर्तीकाल उत्तरवैदिककालत्वेन निर्धार्यते। पतंजलिना पाणिनीयशिक्षायां वेदपुरुपस्यांगनिर्धारणमपि क्रियते-

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिपामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् सांगमधीत्यैव ब्रह्मलोके महीयते।।

वेदनां सम्यगर्थबोधनार्थं पडवेदांगानि रचितानि। यथा मानवशरीरे पडंगानि सन्ति तथैव वेदपुरुपस्यापि पडंगात्मकं शरीरमकल्पयन्। तेपु शिक्ष्यते वर्णस्वराद्युच्चारणविधि यया सा शिक्षा। यथा घ्राणं बिना मानवशरीरं न शोभते, तथैव शिक्षां बिना वेदपुरुपोऽपि न शोभते। कल्प्यते समर्थ्यते यज्ञयागादिप्रयोगाः यस्मिन् तत्कल्पसूत्रम्। कर्मकाण्डविधिविपयकाः ग्रन्थाः कल्पसूत्रेण ज्ञायते। वेदांगस्य मुखत्वेन व्याकरणं कल्पितम्। व्याकरणस्याध्ययनेन वेदमन्त्राणां सुष्ठूच्चारणं सम्यग्व्याख्यानं च कर्तुं शक्यते। शुद्धोच्चारणेन परिष्कृतभापामाध्यमेन च जनाः विद्वत्समाजे अग्रसरो भवन्ति। निरुच्यते निःशेपेणोपदिश्यते निर्वचनविपयः यस्मिन् तत्पदं निरुक्तमुच्यते। निरुक्तोऽयं वेदपुरुपस्य श्रोत्रत्वेनावगम्यते। छन्दोऽपि संस्कृतसाहित्ये महत्वपूर्णं स्थानं भजति। अयं भावं छादयति, दोपान् संवृणोति समाह्लादयति च। पदाभ्यां बिना यथा पदात् पदमपि चलितुं न शक्यते तथैव छन्दसां बिना वेदेपु अवगाहनमशक्यम्। ज्योतिपं कालज्ञापकं शास्त्रम्। कः यागः कदा अनुष्ठेयः कस्मै यजमानाय च कस्मिन् समये विहितः यागो

शुभफलदायकः इत्यादिविपयानां निर्णयमस्मिन् शास्त्रे भवति। यथा चक्षुःसम्बन्धेन सर्वस्यापि वस्तुजातस्य साक्षात् दर्शनं भवति तथैव ज्योतिपशास्त्रेणात्र दर्शिततया पद्धत्या दैवज्ञेन भूतम्, वर्तमानं भविष्यं च साक्षात् क्रियते।

भापाशिक्षणाय शिक्षावेदांगस्योपयोगिता प्रतीयते, यतोहि स्वरस्य प्राधान्यं वेदे अवलोक्यते स्वरज्ञाने च शिक्षायाः महत्वपूर्णं स्थानं विद्यते। स्वरज्ञानं बिना शिक्षाकार्यं सुदुर्लभम्। यदा उच्चारणमेव अशुद्धं तर्हि शब्दार्थज्ञानमपि असम्भवम्। अतएव शुद्धोच्चारणार्थं मन्त्रोच्चारणार्थं वा शिक्षाशास्त्रं वेदांगत्वेन प्रामुख्येन सम्पादितम्।

शिक्षाशास्त्रस्योपयोगिताविपये तैतिरीयोपनिपदि विवरणमवलोक्यते। तदनुसारं वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तान इत्युक्तः शिक्षाध्यायः। तत्र वर्णो अकारादि, स्वरो उदात्तादि, मात्रा ह्रस्वादि, बलं स्थानप्रयत्नौ, साम निपातादि, सन्तानो विकर्पणादि च। तत्र वर्णस्याभिप्रायः अक्षराणि सन्ति। भापाज्ञानाय वेदतत्वार्थज्ञानाय वा संस्कृतवर्णमालायाः ज्ञानमावश्यकम्। पाणिनीयशिक्षायां त्रिपष्ठि-६३, चतुष्पष्ठि-६४ वा वर्णाः निर्धारिताः सन्ति। इयं संख्या न केवलं संस्कृतभापार्थमेव अपितु वैदिककाले प्रयुक्तं प्राकृतभापार्थमपि नियता आसीत्। स्वरस्याभिप्रायः उदात्तानुदात्तस्वरितैः सह विद्यते। मात्राशब्दस्याभिप्रायः उच्चारणसापेक्षसमयः वर्तते। मात्रा ह्रस्व-दीर्घ-प्लुतभेदैः त्रिधा विभज्यते। एकमात्रो भवेद् ह्रस्वः, द्विमात्रो दीर्ध उच्यते, त्रिमात्रो च प्लुतसंज्ञकः। बलस्य तात्पर्यं स्थानप्रयत्नयोः ज्ञानमस्ति। स्वरव्यंजनयोः उच्चारणसये ताल्वादि यत्स्थानस्य वायुना स्पर्शो भवति तद् स्थानम्। प्रयत्नो द्विधा विभज्यते आभ्यन्तरबाह्यभेदाभ्याम्। सामशब्दस्यार्थः दोपरहित अनुदात्तमाधुर्यादिगुणयुक्तमुच्चारणम्। सन्तानस्याभिप्रायः संहिता वर्तते। पदानामतिशयसन्निधिः संहिता कथ्यते। पदेपु प्रथमं संहिता भवति अनन्तरं च सन्धिः।

एतेपां पड्शिक्षांगानामवबोधनमेव शिक्षाशास्त्रस्योपयोगिता वर्तते। भापाशिक्षणे वेदपठनक्रमे वा शुद्धोच्चारणं स्वरक्रिया च युक्ता काम्येते। अशुद्धोच्चारणयुक्तो भ्रष्टस्वरश्च वेदपाठो महद्दुष्फलं जनयति। यथा भगवान पतंजलिः कथयति स्म-

मन्त्रोहीनः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह।<br>
स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतो३पराधात्।।

शिक्षायाः साहित्यमत्युन्नतमतिप्राचीनं च वर्तते। सत्यकेतुविद्यालंकारमतानुसारेण जैगीसव्यस्य शिष्यः बाभ्रव्यः शिक्षाशास्त्रं प्रणीतवान्। शिक्षासंग्रहनामके ग्रन्थे द्वात्रिंशत शिक्षाग्रन्थानामुल्लेखो वर्तते। जगदीशचन्द्रमिश्रस्य वैदिकवांगमयस्येतिहासे पंचविंशति शिक्षाशास्त्राणां संक्षिप्तपरिचयो प्राप्यते। एतेपां शिक्षाशास्त्राणामभिधानं यथा-

१ः व्यासशिक्षा

२ः भारद्वाजशिक्षा

३ः पाणिनीयशिक्षा

४ः याज्ञवल्क्यशिक्षा

५ः वाशिष्ठीशिक्षा

६ः कात्यायनीशिक्षा

७ः पाराशरीशिक्षा

८ः माण्डव्यशिक्षा

९ः अमोघानन्दिनीशिक्षा

१०ः माध्यन्दिनीशिक्षा

११ः वर्णरत्नप्रदीपिकाशिक्षा

१२ः केशवीशिक्षा

१३ः मल्लशर्मशिक्षा

१४ः स्वरांकशिक्षा

१५ः षोडशश्लोकीशिक्षा

१६ः अवसाननिर्णयशिक्षा

१७ः स्वरभक्तिलक्षणशिक्षा

१८ः प्रातिशाख्यप्रदीपशिक्षा

१९ः नारदीयशिक्षा

२०ः गौतमीशिक्षा

२१ः लोमेशीशिक्षा

२२ः माण्डूकीशिक्षा

२३ः क्रमसंधानशिक्षा

२४ः गलदृक्शिक्षा

२५ः मनःस्वारशिक्षा च।

भाषाशिक्षणाय उपरोक्तशिक्षाग्रन्थाः महदुपयोगी वर्तन्ते। उपरोक्तानां शिक्षाग्रन्थानां विभाजनं पंचभागेषु कर्तुं शक्यते- १ः ऋग्वेदस्य शिक्षाग्रन्थः। २ः यजुर्वेदस्य शिक्षाग्रन्थाः। ३ः सामवेदस्य शिक्षाग्रन्थाः। ४ः अथर्ववेदस्य शिक्षाग्रन्थः। ५ः अन्यशिक्षाग्रन्थाश्च। भाषाशिक्षणाय शिक्षावेदांगस्योपयोगिता प्रकाशनार्थमेतेषां ग्रंथानां संक्षिप्तपरिचयमपेक्षितम्-

१ः ऋग्वेदस्य शिक्षाग्रन्थः - पाणिनीयशिक्षाग्रन्थः ऋग्वेदान्तर्गतमायाति। अस्याः शिक्षायाः प्रणेता दाक्षीपुत्रः पाणिनिः वर्तते। नाम्नानुसारमेव अस्याः अभिधानं पाणिनीयशिक्षा अजायत्। इयमतीव विख्याता लोकप्रिया चास्ति। ग्रन्थेऽस्मिन् श्लोकेषूच्चारणविधिसम्बद्धविषयाणां विवरणमवलोक्यते। भाषाशिक्षार्थीणां कृते, लौकिकानां कृते, वैदिकानां कृते च इयं पाणिनीयशिक्षा महदुपयोगि विद्यते। ग्रन्थस्यास्य अनेके टीकाः वर्तन्ते। अनेन सारगर्भितग्रन्थस्यास्य अनुशीलनेन सुष्ठु भाषाज्ञानं प्राप्यते।

२ः यजुर्वेदस्य शिक्षाग्रन्थाः - वेदस्यास्य चत्वारः शिक्षाग्रन्थाः सन्ति। शुक्लयजुर्वेदे याज्ञवल्क्यशिक्षा, वाशिष्ठीशिक्षा, माण्डव्यशिक्षा च। कृष्णयजुर्वेदस्य भारद्वाजशिक्षा प्राप्यते। शुक्लयजुर्वेदस्य याज्ञवल्क्यशिक्षा विशाला परिपूर्णा च। अस्यां शिक्षायां द्वात्रिंशदुत्तरद्विशतं-२३२ श्लोकाः सन्ति। अस्यां वैदिकस्वराणामुदाहरणैः विस्तृतं ज्ञानं समुपलभ्यते। तत्र आगम-लोप-विकार-प्रकृतिभावानां चतुर्विधानां सन्धीनां च विवेचनमवलोक्यते। वर्णानां विभेद-स्वरूप-साम्य-वैषम्यादीनां वर्णान्यपि वर्तन्ते। अस्याः शिक्षायाः सम्बन्धः शुक्लयजुर्वेदीयवाजसनेयीशाखया

सह विद्यते। वाशिष्ठीशिक्षायाः सम्बन्धो अपि तत्रैव सुनिश्चितः। अस्यां शिक्षायां ऋक्मंत्राणां यजुर्मन्त्राणां च विस्तृतं वर्णनं पृथक् पृथगवलोक्यते। माण्डव्यशिक्षायां वाजसनेयीसंहितायामागतानां नामौष्ठ्यवर्णादीनां संग्रहो अस्ति। भारद्वाजशिक्षायाः सम्बन्धः कृष्णयजुर्वेदीय तैतिरीयसंहितया सह वर्तते। अस्याः शिक्षायाः अन्याभिधानं संहिताशिक्षा अस्ति। संहितापदानां शुद्धिकरणमस्याः लक्ष्यम्। एतदर्थमत्र अनेकेषां नियमानामुल्लेखो द्रष्टुं शक्यन्ते।

३ः सामवेदस्य शिक्षाग्रन्थाः - वेदस्यास्य त्रयः शिक्षाग्रन्थाः सन्ति। नारदीयशिक्षा, गौतमीशिक्षा, लोर्मेशीशिक्षा च। नारदीयशिक्षा सामवेदीयस्वराणां रहस्यं ज्ञातुमुपयोगीति प्रतीयते। अस्याः शिक्षायाः विस्तृतव्याख्या श्रीशोभाराममिश्रमहोदयेन कृतः। मिश्रस्यास्य इयं व्याख्या प्रौढा प्रसिद्धा च। सामवेदीये द्वे अन्ये शिक्षे विषये न किमपि ज्ञातुं शक्यते।

४ः अथर्ववेदस्य शिक्षाग्रन्थः - अस्य वेदस्य एका एव शिक्षा श्रूयते माण्डूकीशिक्षानामधेया। अस्यां शिक्षायां नवसप्तत्यधिकशतं-१७९ श्लोकाः सन्ति। स्वराणां व्यंजनानां च सम्यगर्थबोद्धनाय माण्डूकीशिक्षायाः महती उपयोगिता वर्तते। एतदर्थमेव भाषाशिक्षणाय अपि ग्रन्थोऽयमत्यन्त उपयोगीति कथयितुं शक्यते।

५ः अन्यशिक्षाग्रन्थाः - अन्यशिक्षाग्रन्थेषु प्रायः स्वतंन्त्ररूपेण विरचिताः ग्रन्थाः समायान्ति। एतेषां सम्बन्ध ाः प्रायः चतुर्वेदेभ्यः सह नास्ति। एतेषु व्यासशिक्षायाः व्याख्या महामहोपाध्यायपण्डितवेंकटरामशर्मातैजसनाम्नी प्रणीतः। कात्यायनीशिक्षायां त्रयोदशश्लोकाः सन्ति। अस्याः व्याख्याकारः कश्चिद् जयन्तस्वामि अस्ति। पाराशरीशिक्षायां सन्धिस्वरादीनां वर्णनमस्ति। अमोघानन्दिनीशिक्षायां त्रिंशदधिकशतश्लोकाः सन्ति। तत्र स्वराणां सूक्ष्मविवेचनमवलोक्यते। माध्यन्दिनीशिक्षायां द्वित्वनियमानां विवेचनम्। वर्णरत्नप्रदीपिकायाः रचयिता भारद्वाजवंशीयः कश्चन् अमरेशनामको विद्वानासीत्। अस्यां शिक्षायां वर्णस्वरसन्धीनां वर्णनमवलोक्यते। केशवीशिक्षायाः प्रणेता आस्तिकमुनेः वंशजो गोकुलदैवज्ञस्य पुत्रः केशवदैवज्ञः वर्तते। मल्लशर्मशिक्षायाः प्रणेताऽस्ति मल्लशर्मा। कान्यकुब्जब्राह्मणोऽयमुपमन्युगोत्रीय होत्रिणः खगपतेः पुत्रः आसीत्। अस्यां मल्लशर्मशिक्षायां पंचषष्टिश्लोकाः सन्ति। स्वरांकशिक्षायाः रचयिता जयन्तस्वामि वर्तते। षोडशश्लोकीशिक्षायाः प्रणेता श्रीरामकृष्णः विद्यते। अस्यां शिक्षायां स्वरव्यंजनयोः विवरणमायाति। अवसाननिर्णयशिक्षायां वैदिकव्याकरणविषयपदप्रयोगनियमानां ज्ञानाय स्वरवर्णादीनां विवेचनमवलोक्यते। स्वरभक्तिलक्षणशिक्षायाः रचना स्वरभक्तिप्रयोगनियमज्ञानार्थं कात्यायनेन कृतम्। प्रातिशाख्यप्रदीपशिक्षाग्रन्थस्य रचना सदाशिवपुत्रेण बालकृष्णेन कृतः। तत्र स्वरव्यंजनादिसमग्रविषयानां सांगोपांगवर्णनमवलोक्यते। ग्रन्थेऽस्मिन् कतिपयानि व्याकरणप्रयोगपराणि ग्रन्थान्तरात्पद्यानि समुधृतानि। शिक्षाग्रन्थोऽयं परिमाणे गरिष्ठो प्रतीयते। एवमेव याज्ञवल्क्यमुनेः क्रमसन्धानशिक्षा-गलदृक्शिक्षा-मनःस्वारशिक्षाग्रन्थाश्च दृष्टिपथमायाति।

एतेषां शिक्षाग्रनामध्ययनेन भाषाशिक्षणं सुकरं संजायते। शिक्षावेदांगस्योपयोगितासाधनार्थं वेदांगस्यास्याध ययनमनिवार्यम्। मानवजीवनं समुन्नतिमारोहणाय वेदस्याध्ययनमपि कर्तव्यम्। अस्याध्ययनं बिना लोकमंगलकराणां कार्याणां सिद्धिः न सम्भवति। वेदाध्ययनेन मानवजीवने सद्गुणानामाधानं संजायते। गृहस्थाश्रमे प्रवेशकारिणी नारी ऋग्वेदानुसारेण सौम्यदृष्टवती, पतेर्जीवनसंवर्धिका, पशुपक्षीणां कृते कल्याणकारिणी, स्वच्छमनस्वती, कान्तिमती, वीरपुत्रानां जनयित्री, भगवद्भक्तिसम्पन्ना सुखदात्री च भवति। लौकिकसमृद्धिरपि अनेन समायाति। विषयेऽस्मिन् उक्तमपि-

इह एव ध्रुवा प्रतितिष्ठशाले, अश्वावती गोमयी सूनृतावती।
उर्जस्वती धृतवती पयस्वती उच्छ्रयस्व महते सौभाग्याय।।

एवमेवास्योपयोगिताविषये तैतिरीयारण्यकेऽपि विस्तृतविवेचनं द्रष्टुं शक्यते। तत्र अवलोक्यते यथा-

यं यं कर्तुमधीते तेन तेनस्येष्टं भवति।
अग्नेर्वायोरादित्याय सायुज्यं गच्छति।।

वस्तुतः वैदिकवांगमये विपुलज्ञानमभिलक्ष्यते। विपुलज्ञानलभ्यर्थमस्मभिः संहिता-ब्राह्मण-आरण्यक-उपनिषदग्रन्थाश्च अध्येतव्यः। तत्र ब्राह्मणभागे यज्ञस्वरूपस्य प्रतिपादनम्, आरण्यके यज्ञस्याध्यात्मिकं स्वरूपम्, उपनिषदे च ब्रह्मबोधकं मोक्षसाधनमस्ति। अयमेव भागः वेदस्यान्तरूपतया 'वेदान्तष इत्युच्यते। एवमेव ब्राह्मणभागोऽयं गृहस्थानामुपयोगी, आरण्यकभागः वानप्रस्थानामुपयोगी, उपनिषदभागश्च सन्यस्तानामुपयोगीत्यपि कथयितुं शक्यते।

प्रसंगानुसारं भाषाशिक्षणाय शिक्षावेदांगस्योपयोतिा शिक्षाशास्त्राणां विवेचनेन स्पष्टम्। भारोपीयभाषाविषये मैकडोनलमहोदयः स्वविचारं स्थापितवान्। तदनुसारं भारोपीयभाषाभाषिजनेषु भारतीयैरेव वैदिकधर्मो नाम महान् राष्टधर्मः अवलोक्यते। अस्य प्रतिपक्षी बौद्धधर्मो नाम सार्वभौमिकधर्मः प्रतीयते। अप्रदर्शितधर्मविषयोपयज्ञैः जनान्तरैरपि अयं प्रशंसितः। स्वोपयज्ञानि विविधदर्शनप्रस्थानानि अपि भारतीयसन्ततानि महती मननशक्तिमभिव्यंजयन्ति। भारोपीयभाषावर्गे वैदिकवांगमयमेव अतिप्रचीना, वरिष्ठा गरिष्ठा च विद्यते। यथा तमिल-तेलगु-मलयालम-कन्नडरूपं भाषाचतुर्वर्गं प्रायः सम्पूर्णभारतीयभाषा प्राच्यां तथैव प्रायः सम्पूर्णयूरोपीयभाषाः प्रतीच्यां वैदिकसंस्कृतिसमन्विताः। भाषावर्गोऽयं भारोपीयभाषावर्गः प्रोच्यते। वांगमयेऽस्मिन् भारोपीयवर्गस्य प्राचीनसाहित्यस्य स्मृतयः सुरक्षिताः सन्ति। वेदांगानां परमोपादेयत्वादतिशयमहत्वात् च वेदांगरक्षणाय महर्षयः सर्वमुपायं चक्रुः। शिक्षावेदांगस्याध्ययनेन भाषाज्ञानं समृद्धिमवाप्नोति नैतिकचिन्तनं च संजायते, यतोहि नैतिकदर्शनरूपेण आचारशिक्षादृष्ट्या वा शिक्षावेदांगस्योपादेयता वर्तते। कर्तव्याकर्तव्ययोः उद्बोद्धरूपेण अपि अस्याः उपादेयता अवलोक्यते।

एवमवलोक्यते यत् भाषाप्रशिक्षणे शिक्षावेदांगस्याध्ययनमनिवार्यम्। अनेन स्वर-व्यंजन-प्रयत्न-सन्धि-उच्चारणप्रभृतिसंशोधनेन भाषाशुद्धिः संजायते। भाषापरिमार्जनेन वक्ता कुशलप्रवक्ता भवितुं शक्यते। कुशलसाहित्यकारनिर्माणेऽपि अस्याः शिक्षायाः उपयोगिता विद्यते। एवमेव शिक्षावेदांगस्य शिक्षार्थी कुशलप्रशिक्षकः, सुदृढसंचालकः, सामरिकसामाजिकः, सफलराजनीतिज्ञश्च भवति। वस्तुतः वैदिकवांगमये भारजीयदर्शनस्य, धर्मस्य संस्कृतेश्च संजीवनी विद्यते। अध्यात्मदर्शनस्य रहस्यमपि तत्रैव अवलोक्यते। तत्र ज्ञानविज्ञान-दर्शन-सांस्कृतिक-नैतिक-सदाचार-सामाजिक-राजनैतिकप्रभृतीनां विषयानां विवरणमपि समुपलभ्यते। अत्र व्यावहारिकगुणस्यान्वेषणमपि सुकरम्। वैदेशिकैः विभिन्नभारतीयशिक्षावेदांगाधारितविषयाणामुपरि शोद्धकार्याणि कृतानि। अनेन अपि वेदांगस्यास्य महत्वमवलोक्यते। एवं स्पष्टं भवति भाषाशिक्षणाय शिक्षावेदांगस्योपयोगिता। एवं वैदिकवांगमयस्य विस्तृतसाहित्यमवलोक्य मनुना उक्तमिदं पद्यं सत्यमनुभूयते-

पितृदेवमनुष्यानां वेदश्चक्षुः सनातनम्।
अशक्यं चाप्रमेयं वेदशास्त्रमिति स्थितिः।।

;दिल्लीप्रशासने भाषाऽध्यापकःद्ध
सर्वोदय बाल विद्यालय, सी ब्लॉक सुल्तानपुरी, दिल्ली-८६
चलभाषः- ७६७८१८८६६२ / ६५६६२७५५६५

# साहित्यमीमांसा

– डा. मनमोहन तिवारी

प्रकृतिः अशेषजगतोधिष्ठानं वर्तते। प्रधत्ते सर्वमात्मनि या सा प्रकृतिः, त्रिगुणात्मिका अविद्यालक्षणा इयं प्रकृतिः सचराचरं जगत् सूयते। प्रकृतेः मनोहरतां प्रति तस्याः सौन्दर्येण मानवमनः सदा आकृष्टम् अभूत्, तथा मानवः यदा प्रकृतिमापद्यत् तदा हृदि स्थितान् भावान् प्रकटीकर्तुं जिज्ञासमानः बभूव। कालक्रमे मानवसंस्कृतेः विकासेन सह काव्यात्मकानुभूतेः विकासोपि अभवत् तदेव वाचिकं साहित्यमिति व्यपदेशोस्माभिर्दीयते। सृजनशीलता मानुषाणां नैसर्गिकः प्रतिभाजन्यः सहजः निपुणः स्वभावो वा नात्रा संशयस्थानमिति। सृष्टेः आदौ लोकानामधिकः समयः प्रकृतिसन्निधावेव व्यत्येतिस्म, अतो प्राकृतिकवर्णनमेव अभिव्यक्तेः विषयो अभूत्। ऋग्वेदे ऋषिः प्रार्थयते यत् भो! देव प्रकृतेः (पृथिव्याप्तेजोवायुराकाशादिप्रभृतयः) यावन्तोप्यवयवाः ते सदा सन्तुलिताः स्युः नः श्रेयोविधत्तामिति।

द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि।। यजुर्वेदः 36/16

एवमेव पुराणेषु काव्येषु च नितरामानन्दप्रदं प्रकृतिनिरूपणं कवयः चक्रिरे। व्यापकरूपे दृश्यते चेत् साहित्यं वैश्विकसाहित्येन भाषावाङ्मयेन च तत्र निबद्धज्ञानविज्ञानविचाराणां सम्वर्द्धनं कुर्वद् आत्मानुभूतिं सम्पाद्य रसास्वादनं कारयति। साहित्यं रसबोधस्य साधकम् आत्मिकानन्दस्य बोधकं सुखानुभूतेः आविर्भावकञ्च वर्तते। साहित्यं राष्ट्रस्य, समाजस्य, मानवसमवायस्य च पथप्रदर्शकं मनुष्यतायाः निदर्शकं, विश्वबन्धुत्वस्य संप्रवर्तकं, भारतीयसंस्कृतेः परिपोषकञ्चास्ति। अनेन मानवीयसंवेदनानां जनभावनानाञ्च सञ्चारः लोकेषु भवति, इदं नरान् एकसूत्रो, संयोज्य तेषां जीवने सत्यं शिवं सुन्दरमिति भावमासाद्य सदा सांस्कृतिक-सभ्यतायुक्तमादर्शं प्रस्तौति। सर्वेषां समग्रता अत्र पदे-पदे अवलोक्यते। मनुष्यतायाः बोधयित्री काचिदभिव्यक्तिरेव साहित्यपदवाच्यम्।

भारतीयं साहित्यं नैकासु भाषासु निबद्धमवलोक्यते। विविधानां संस्कृतीनां निर्वाहकम् अनेकतासु एकतासंवाहकं जनमनोभावनानां सङ्गमस्थलञ्च अनुभूयते अस्माभिः।

अस्य विशालं क्षेत्रं, सुमधुरः कथाप्रवाहः, ज्ञानमयी भक्तिमयी चास्ति प्रेरणा। निदर्शकमतीतवर्तमानयोः, प्रवर्तकं मानवसभ्यतायाः, साधकञ्च भगवद्कृपायाः साहित्यं संसारमलनाशनं भवति। अद्यतनीयः युगः साहित्यस्य च वर्तते। अद्यतनीयं साहित्यं भूमण्डलीकरणेन प्रभावितमस्ति। अद्यतनीयः मनुष्यः उपभोक्तृवादिनीं संस्कृतिं संसेवते। समये-समये साहित्यं नैतिक-मानवीय-सामाजिक-आध्यात्मिकमूल्यानि च बोधयित्वा नरान् उन्मार्गप्रवृतत्तिनिवारण-रूपलोकसंग्रहार्थं प्रवर्तयामास। सङ्गीतमाधाय संवादरूपताञ्चानुगम्य साहित्यं नितरां सुस्वादु अमृतवर्षि

अभूत्। अधुनौपि धारावाहिकेन चित्रपटादिमाध्यमेन आस्वाद- विषयीकरोति च मानवमनः इति। गद्यपद्योभयमिश्रत्वात् काव्यरूपं साहित्यं रसबोधस्य सौन्दर्यबोधस्योपादानकारणं विद्यते। इदं जनमानसभावनां प्रस्तौति सुदीर्घतमः चास्य पन्था अस्ति। यथा संस्कृतादेव पालिप्राकृतापभ्रन्शानां तथा हिन्दी-क्षेत्रीयसाहित्यानां प्रभवः सञ्जातः। समेषां साहित्यानां सास्कृतिकं, मूल्यपरकम् आध्यात्मिकं भाषासम्बन्धिस्रोतः संस्कृतवाङ्मयमेव विद्यते। काव्यसृजनपरम्परायाः उल्लेखस्तु वेदेषु दृश्यते, तथापि महर्षिणा वाल्मीकिना विरचितं रामायणमेव आदिकाव्यं तथा प्राचेतसः वल्मीकिः आदिकविरिति प्रतिष्ठां प्राप्नोत्।

**वरं वरेण्यं वरदं तु काव्यं सन्तारयत्याशु च सर्वलोकम्।**

**सङ्कल्पितार्थप्रदमादिकाव्यं श्रुत्वा च रामस्य पदं प्रयाति॥** वा. रा.

साहित्यं समाजस्य कृते उत्कृष्टा उपलब्धिः तथा आदर्शो भवति। प्राचीनमुताहो अर्वाचीनं साहित्यं उभयोः प्रासङ्गिकता, जीवन्तता सदा तिष्ठत्येव। साहित्यं लोकस्य श्रेयस्साधनं प्रेयोपादानं च कथ्यते। यथा -

**धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।**

**करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिबन्धनम्॥** काव्यालंकारः

वैदिकवाङ्मये संहिता-ब्राह्मण-आरण्यक-उपनिषद्-सूत्रग्रन्थ-वेदाङ्गदर्शन- प्रभृतीनि साहित्यानि निबद्धीकृतानि तथा रामायण-महाभारत-पुराणानि-काव्यनाटकादीनि च लोकसाहित्यानि व्यरच्यन्त। अस्मिन्नेवक्रमे धार्मिक-आध्यात्मिकदार्शनिकसाहित्यानि अशेषभूतले भारतस्य प्रतिष्ठां समेधयन्ति। प्रश्नः उदेति यत् - किन्नाम साहित्यं की.शी चास्य व्युत्पत्तिः मानवजीवनेस्य योगदानं कथं ? मानवसभ्यतायाः कथं हितसाधकं भवति। सामान्यतः वैचारिकसृजनशीलता एव साहित्यस्य स्वरूपं भवति। साहित्यस्य अतीतं समृद्धं मानवोपकारकञ्च आसीत्। वाङ्मयार्थस्य परिचायकत्वादपि कस्मिंश्चित् शास्त्रविशेषेपि साहित्य-शब्दः रूढोस्ति। अतः मीमांसा-न्याय-स्मृति-तन्त्रशास्त्रेभ्यो पृथक् साहित्यशास्त्रमपि अस्माभिः बुद्धिविषयीक्रियते। साहित्यविद्या नाम पञ्चमी विद्या। हितेन सह सहितं सहितस्य भावः साहित्यम्, उतवा शब्दार्थयोः सह भाव एव साहित्यम्। तच्च द्विधा 1. शास्त्ररूपं साहित्यं 2. काव्यरूपञ्चेति। शब्दार्थयोः यथोचितं सहभावेन साहित्येन वर्तमानाः, विधाः तदेवालङ्कारशास्त्रमेव निगद्यते । साहित्यस्य परिचायकाः नैकाः शब्दाः वर्तन्ते। यथा-कथाख्यायिकोपन्यासमहाकाव्य-खण्डकाव्यरूपकाणि च साहित्यस्य प्रमुखाः विधाः सन्ति। साहित्यं मानवीयमूल्य आदर्श-संवेदना परम्परादिसंधारकं वर्तते। साहित्यं परिभाषयन् आचार्यः भामहो ब्रवीति यत् -

**शब्दार्थौ सहितावेव प्रतीतौ स्फुरतः सदा।**

**सहिताविति तावेव किमपूर्वं विधीयते॥** वक्रोक्तिजिवीतम्- 16

अयमभिप्रायः यत् शब्दार्थौ अर्थात् अभिधानाभिधेयो सहितौ= अवियुक्तौ सदा प्रतीतौ स्फुरतः

बुद्धौ प्रतिभासेते ततः सहितौ इति पदेन किमपूर्वं विधीयते। न किञ्चिदभूतं निष्पाद्यते। सिद्धं वस्तु साध्यते, नित्यः शब्दार्थसम्बन्धः इति न्यायात्। तेन पदवाक्य. प्रमाणव्यतिरिक्तं किमपि साहित्यं नाम तदपि सुप्रसिद्धमेवास्ति, पुनः तदभिधाने कथं न पौनरुक्त्यप्रसङ्गः? एतावता आचार्यः कुन्तकः निरूपयति यदिदं वास्तविकं साहित्यं प्रसिद्धमस्ति तदुपरि अद्यावधौ न कश्चिद् विपश्चित् विचारयामास। यद्यपि साहित्यशब्दः काव्यत्वेन प्रयुज्यते तथा साहित्य पदार्थः कः कीदृशौस्य वास्तविकोर्थः इति मीमांसा न केनचिद् विदुषा उपपादिता, अतः आचार्यकुन्तकेन प्रणीते वक्रोक्तिजीविते ग्रन्थे कृता साहित्यमीमांसा पुनरुक्तिर्नास्ति। आचार्यभामहेन शब्दार्थौ सहितौ इति साहित्यपदार्थतया अभिधायि। लक्षणमिदमनिश्चायकं, अतिव्याप्तश्च वर्तते यतोहि शब्दार्थयोः कीदृशः सहभावः भवेत् इति स्वरूपं न स्पष्टीभवति इति अनैश्चित्यं, तथा अतिव्याप्तन्तु इत्थं यत् शब्दार्थयोः सहभावस्तु प्रत्येकं वाक्ये भवति। अतः शोभाशालि-आनन्दप्रदं साहित्यमत्र अभीष्टं भवति।

**शब्दार्थौ सहितौवक्रकविव्यापारशालिनि।**

**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।** व. जी. 7

अयं भावः यत् शब्दस्य अर्थस्य च साहित्यमेव काव्यं वर्तते न च केवलं शब्दसौन्दर्यम् उतवा अर्थजन्यः चमत्कारः काव्यं भवितुम् अर्हति। किन्तु साहित्यपदार्थस्य सार्थक्यमुत्थाप्य कुन्तकः समदधात् यथा- वक्रताविचित्रं गुणालङ्कारसम्पदा परस्परं स्पर्धारूपं भवति। अतः सुहृद् इव सङ्गतौ परस्परं शब्दार्थौ शोभाजनकौ भवतः तदेव काव्यपदवाच्यं स्यात् - साहित्यन्नाम - तुल्यकक्षत्त्वेन अन्यूनानतिरिक्तत्त्वम्। साहित्यस्य तात्पर्यमुभयोः साम्यम् न च कस्यचिद् न्यूनत्वं न वा अतिरिक्तत्त्वम्।

सरस्वतीहृदयारविन्दमकरन्दविन्दुसन्दोहसुन्दराणां सत्कविवचसाम् अन्तरामोदं मनोहरत्त्वेन परिस्फुरद् एतत् साहित्यं सहृदयषट्चरणगोचरतां नीयते।

**साहित्यमनयोः शोभाशालितां प्रति काप्यसौ ।**

**अन्यूनानतिरिक्तत्त्वमनोहारिण्यवस्थिति।।** व.जी. 17

तात्पर्यं यत् मनोहारिणी अवस्थितिः साहित्यपदवाच्यं भवति। पुनः कथं भूता ? तत्र शब्दार्थयोः कापि अलौकिकी (अर्थात्) चेतनचमत्कारकारितायाः कारणम् अवस्थितिः विचित्रमेव विन्यासभङ्गी मनोहारिणी, परस्परस्पर्धित्वरमणीया यस्यां द्वयोरेकतरस्यापि न्यूनत्वं नाप्यतिरिक्तत्वं वा अस्ति इत्यर्थः। सहृदयानाम् आह्लादकारितायाः कारणभूता या अवस्थितिः अर्थात् विचित्ररचनाशैली सा एव साहित्यमिति।

अन्यूनत्वेन अनतिरिक्तत्वेन मनोहारिणी अवस्थितिः साहित्यमुच्यते। अत्र प्रश्नः उदेति यत् उपहतयोः अर्थात् दूषितयोः पदार्थयोः साहित्यं न भवति, अन्यूनानतिरिक्तत्वेन परस्परसाम्यता-सुभगमवस्थानं साहित्यमुच्यते। यतोहि समर्थशब्दाभावे अर्थे स्वरूपतः स्फुरिते सति निष्प्राण एव भवति शब्दोपि काव्यानुकूलचमत्कृदर्थाभावे कस्यचिद् साधारणस्य अन्यार्थस्य वाचकत्वात् वाक्यस्य भारवत् प्रतीतिमापद्यते।

**धर्मादिसाधनोपायः सुकुमारक्रमोदितः।**

**काव्यबन्धौभिजातानां हृदयाह्लादकारकः॥** व.जी. 3

अतो आचार्यकुन्तकस्य मतानुसारं साहित्यस्य तत्त्वार्थः शब्दार्थयोः पूर्णसामञ्जस्यं भवति। इदं सामञ्जस्यं वाच्यवाचकयोः सामान्यसहभावो न अपितु विशिष्टः स्यात्। यो हि वक्रतावैचित्र्येण गुणालंकारसम्पदा च युक्तो भवति। कथनस्य तात्पर्यं यत् अस्मिन् सहभावे शब्दस्य सम्पूर्णसौन्दर्यं तथा अर्थस्य निखिलाचमत्कृतिः उभे सम्यक् राराजते। विशिष्टसहभाव इत्यस्य तात्पर्यं शब्दार्थौ न च चमत्काररहितौ साधारणौ अपितु उक्तरीत्या विशिष्टौ स्याताम् । यथा -

**गौर्गौः कामदुधा सम्यक् प्रयुक्ता स्मर्यते बुधैः।**

**दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति॥**

तात्पर्यं यत् सम्यक् दूषणराहित्येन गुणालंकारादिपूर्णतया च प्रयुक्ता वाक् कामदुधा इति आख्यायते। दुष्प्रयुक्ता वाक् तु प्रयोक्तः जाड्यं (पर्यायबोधकत्वं) शंसति। विवक्षितार्थबोधकः केवलं एक एव शब्दः शब्दः कथ्यते। इत्थं सहृदयहृदयानामानन्दकारणं स्वभावेन सुन्दरपदार्थ एव काव्यार्थे वस्तुतः अर्थौस्ति । **शब्दो विवक्षितार्थैकवाचकौन्येषु सत्स्वपि।**

**अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः॥** व. जी. 09

अतः शब्दार्थौ सहितौ काव्यमस्मिन् काव्यलक्षणे उद्र प्रकारकौ विशिष्टौ शब्दार्थौ एव लक्षणतया निवेश्यौ - शब्दस्य शब्दान्तरेण अर्थस्य अर्थान्तरेण साहित्यम् अभिप्रेतमस्ति। अत्र आशंका जायते यत् वाचकस्य वाच्यान्तरेण वाच्यस्य च वाचकान्तरेण कथं न साहित्यं भवेत् चेत्, तन्न क्रमपरिवर्तने नास्ति किमपि प्रयोजनं प्रयोजनाभावे एतयोः शब्दार्थयोःयथास्वं यस्यां स्वसम्पत्सामग्रीसमुदयरूसहृदयहृदयाह्लादकारी परस्परस्पर्धा परिस्फुरति, सा काचिदेव वाक्यविन्याससम्पद् साहित्यव्यपदेशभाक् भवति। ई.शी विशिष्टाकापि रचना साहित्यपदाधिकारिणी भवति। तन्निरूप्यते यथा -

**मार्ग-अनुगुण्यसुभगः माधुर्यादिगुणोदयः। अलङ्करणविन्यासो वक्रतातिशयान्वितः॥**

**वृत्यौचित्यमनोहारिरसानां परिपोषणम्। स्पर्धतया विद्यते यत्र यथास्वमुभयोरपि॥**

**सा काव्यवस्थितिः तद्विदानन्दस्पन्दसुन्दरा। पदादिवाक्परिस्पन्दसारः साहित्यमुच्यते॥**

व. जी. 3,34,35,36

तात्पर्यं यत् रीतीनाम् आनुकूल्येन माधुर्यादिगुणैः चारुतायुक्तं वक्रत्वेन अतिशययुक्तं तथा अलंकारविन्यासेन औचित्येन च मनोहारि रसपरिपोषणं ययोः शब्दार्थयोः तद्विदानन्दसुन्दरा कापि अवस्थितिः तथात्वेन पदादिवाक्परिस्पन्दसारः साहित्यमुच्यते। इदं साहित्यं त्रिधा व्यवस्थीयते। यथा -

**गद्यं पद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम्।**

**पद्यं चतुष्पदी तच्च वृत्तं जातिरिति त्रिधा॥** सा. दर्पणः

तात्पर्यं गद्यपद्यमिश्रनामकप्रकारत्रये उपलक्षितं साहित्यं काव्यस्यैव बोधकं स्यात्। काव्यशास्त्रमपि साहित्यस्य अंगत्वात् उपचर्यते। तथा रसिकैः बुधैः रसामृतस्यन्दने प्रसृतः वाक्परिस्पन्दसारः साहित्यमुच्यते। तस्यैव काव्यव्यपदेशस्तु निश्चप्रचमेव वर्तते। अत्र विशेषणकोटौ आचार्यैः तत्तत्पदं निवेश्य काव्यलक्षणं निर्मायि। यथा - शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली इति दण्डी लिलेख। वाक्यं रसात्मकं काव्यं कविराजः विश्वनाथः रमणीयार्थप्रतिपादकः शब्दः काव्यं पण्डितराजस्य मतं तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि इति राजानकः मम्मटः अभिदधौ। तदेतेषां मते शब्दार्थयोः सामान्यसाहित्यं नाभिप्रेतम्, अपितु क्वचिद् वाक्यस्य रसवत्त्वं क्वचिद् शब्दस्य रमणीयार्थप्रतिपादकत्त्वम्अभीष्टम्। क्वचिद् पदावलीनाम् इष्टार्थत्वञ्च इति। यत्र पदवाक्यभूतस्य शब्दस्य काव्यत्वमंगीकृतं तत्राप्यर्थः सहकारितामुपैति। अतः एतेषां मतैपि शब्दार्थयोः सहितयोः मनोहारिसाहित्यमेव शोभाशालितां प्राप्नोति।

एतावता आचार्यकुन्तकेन प्रतिपादितं शब्दार्थयोः विशिष्टसाहित्यं काव्यस्यैव तुलामधिरोहति परीक्ष्यमाणे रामायण-महाभारतादि-लक्ष्ये तु उभे साम्यं भजेते। काव्यलक्षणनिरूपणेन काव्यसाहित्ययोः भवतुनाम अर्थभिन्नत्वं तथापि साहित्यव्यपदेशभाजः काव्यस्य सर्वं शोभाशालितामुपैति। आनन्दवर्धनस्तु यथा निरूपयमास यत् सहृदयहृदयाह्लादि - शब्दार्थमयत्वमेव काव्यत्वलक्षणम्।

**अनन्तशास्त्रं बहु वेदितव्यम् अल्पश्च कालो बहवश्च विघ्नाः।**
**यत्सारभूतं तदुपासितव्यम् हंसो यथा क्षीरमिवाम्बुमिश्रम्॥**

सन्दर्भिता ग्रन्थसूची-


| सन्दर्भग्रन्थाः | लेखकाः | प्रकाशनम् |
|---|---|---|
| 1. साहित्यदर्पणः | कविराजः विश्वनाथः | चौखम्बासुरभारती प्रकाशन वाराणसी |
| 2. वक्रोतिजीवितम् | आचार्यकुन्तकः | चौखम्बासुरभारती प्रकाशन वाराणसी |
| 3. वक्रोद्रिजीवितम् | आचार्यः विश्वेश्वरः | हिन्दीमाध्यम कार्यालय,दिल्ली विश्वविद्यालय |
| 4. संस्कृत साहित्य का इतिहास | बलदेव उपाध्यायः | शारदा संस्कृत प्रतिष्ठानम्, वाराणसी |
| 5. काव्यमीमांसा | राजशेखरः | चौखम्बासुरभारती, प्रकाशन वाराणसी |
| 6. वेदमञ्जरी | डॉ. सिद्धनाथशुक्लः | अनुराग प्रकाशन इलाहबाद, इलाहाबाद |
| 7. काव्यालंकारय | भामहय | चौखम्बा सुरभारती प्रकाशन वाराणशी |
| 8. श्रीमद्भगवद्गीता | डॉ. आद्याप्रसादमिश्रः | अक्षयवट प्रकाशन इलाहबाद (हिन्दीव्याख्याकारः) |
| 9. ध्वन्यालोकः | श्रीमदानन्दवर्धनः | चौखम्बा सुरभारती प्रकाशन वाराणसी |



(असिस्टेन्ट प्रोफेसर साहित्य)

मुम्बादेवी आदर्श संस्कृत महाविद्यालय मुम्बइ

# जगदीशाभिमताख्यातार्थविमर्शः

नीरजकुमारभार्गवः

तत्र तावत् विचारकैः शास्त्रज्ञैः स्वस्वग्रन्थेषु विस्तरेण आख्यातार्थः विचारितः। परमतार्किकैः जगदीशभट्टैः अपि स्वग्रन्थेषु आख्यातार्थः विस्तरेण विवेचितः। किन्तु सम्प्रति पाठ्यक्रमेषु तेषां ग्रन्थाः नैव सन्ति। तेन च तेषां मतानि तथा प्रचलितानि नैव सन्तीति कृत्वा आख्यातार्थविषयकं तेषां मतं गवेषकानां दृष्टौ समागच्छतु इति मनसि विचिन्त्य अस्मिन् शोधपत्रे मया यथामति जगदीशभट्टाचार्यसम्मतः आख्यातार्थः प्रस्तूयते। तत्राख्यातार्थः कः इति विवेचनात्पूर्वं किं नाम आख्यातमिति प्रश्नः समुदेति कारणं हि बहुषु अर्थेषु आख्यातशब्दस्य प्रयोगो लभ्यते। तथाहि- ''आख्यातमाख्यातेन क्रियासातत्ये'' इति वार्तिके आख्यातशब्देन तिङन्तस्य ग्रहणं वर्तते। अत एव ''तिङन्तं तिङन्तेन सह समस्यते क्रियासातत्ये गम्यमाने'' इति तस्यार्थो भवति, तेन च खादतमोदता पचतभृज्जता इत्यादीनामुदाहरणानां सिद्धिः भवति। क्वचिच्च आख्यातशब्देनशक्रियाप्रधानमाख्यातम् इत्यादौ यास्कवचनादिषु धातोर्ग्रहणं भवति। अत एव प्रोक्तं नागेशभट्टेन तद्वाक्यस्यार्थो मञ्जूषायाम्- ''तत्र ह्याख्यातशब्देनाख्यायते सर्वप्रधानीभूतोऽर्थोऽनेनेति व्युत्पत्त्या धातुरूपमुच्यते। नामाख्यातोपसर्गनिपाताः इति प्रकृतीनामेव तत्रोद्देशात् अग्रेऽपि तत्र नामान्याख्यातजानि इति शाकटायनो नैरुक्तसमयश्चेति उक्तत्वात्'' । एवञ्च क्वचिदाख्यातेन तिङ्प्रत्ययानां ग्रहणं भवति। क्वचिच्चआख्यातपदेन तिङन्तस्य ग्रहणम्, क्वचिच्च धातोः ग्रहणम्, एवञ्च सति अत्र किं ग्राह्यमिति चेत्तिङ्प्रत्ययस्यैव ग्रहणमतोऽत्र तिङ्प्रत्ययानामर्थस्य निरूपणं क्रियते। एते तिङ्प्रत्ययाः आख्यातनाम्ना च व्यवह्रियन्ते। अत्र आख्यातपदवाच्यानां तिङ्पदवाच्यानां वा प्रत्ययानां कोऽर्थः इति विचार्यते। तत्र तावत् आख्यातप्रत्ययाः अर्थभेदेन त्रिविधाः कर्त्राख्यातप्रत्ययाः कर्माख्यातप्रत्ययाः भावाख्यातप्रत्ययाश्च। एवं तेषामर्थो द्विविधो वर्तते सामान्यार्थो विशेषार्थश्च। तत्र क्रमेणोभयोः निरूपणं क्रियते-

**आख्यातसामान्यार्थविमर्शः-**

यः अर्थः समेषामेवाख्यातप्रत्ययानां भवति स एव सामान्यार्थः इति ज्ञेयम्। तत्र जगदीशमते संख्या कालश्च समेषामाख्यातप्रत्ययानामर्थो भवति तेन संख्या कालश्च आख्यातसामान्यार्थः इति प्रतिफलति। तत्राख्यातमात्रस्य संख्यार्थत्वे जगदीशोक्ताख्यातलक्षणं प्रमाणम्। तथा चाह जगदीशः- आख्यातलक्षणव्याजेन आख्यातार्थम्-

**स्वेतरप्रथमान्तस्य नाम्नोऽर्थे बोधनक्षमा।**
**प्रत्ययाः स्वार्थसंख्यायास्तिङो दशविधाश्च ताः॥95॥**

अन्वयः- स्वेतरप्रथमान्तस्य नाम्नोऽर्थे स्वार्थसंख्यायाः बोधनक्षमाः प्रत्ययाः तिङः, ताश्च दशविधाः। यथा चौत्रः पचति, इत्यादौ लक्षणसमन्वयो बोध्यः, तथाहि- स्वपदेन लक्ष्यत्वेनाभिमतप्रत्ययो

ग्राह्यः, तथा च स्वम्- तिप्रत्ययः, तदितरप्रत्ययः चौत्रपदोत्तरः सुप्रत्ययः, तदन्तं नाम-प्रातिपदिकम्- चौत्र, तदर्थः चौत्रः, तस्मिन्नर्थे स्वार्थभूता- तिबर्थभूता या एकत्वसंख्या, तदन्वयबोधने समर्थः प्रत्ययः, तिप्रत्ययः, स एव तिङ्प्रत्यय इत्युच्यते, तिङ्प्रत्यय एव आख्यात इत्युच्यते, उभयोः पर्यायत्वात्। तथा चोक्तमपि वर्तते- ''तिङाख्यातयोः पर्यायत्वात्'' । एवं छात्रौ पचतः, इत्यादौ तस्प्रत्ययः, एवं छात्राः पचन्ति, इत्यादावपि बोध्यम्। तथा चोक्तं जगदीशेन- श्शस्वभिन्नप्रथमान्तस्य नाम्नोऽर्थे स्वार्थसंख्याबोधं प्रति समर्थाः प्रत्ययाः तिङ उच्यन्ते'' । एवं चेदं समागतं भवति यत् समेषां तिङ्प्रत्ययानामर्थः संख्या भवति। तस्मात्संख्या आख्यातसामान्यार्थः इति वक्तुं शक्यत।

अत्र केवलं प्रथमान्तस्य नाम्नोऽर्थे स्वार्थसंख्याबोधं प्रति समर्थाः प्रत्ययाः तिङः इत्येवोच्यमाने प्रथमायामतिव्याप्तिः, चौत्रः पचति, इत्यादौ प्रथमापि प्रथमान्तस्य नाम्नोऽर्थे चौत्रादौ स्वार्थसंख्याबोधं प्रति समर्था, अतस्तत्रातिव्याप्तिवारणाय स्वभिन्नेति पदं प्रदत्तम्। तथा चाह जगदीशः- ''प्रथमा तु प्रथमान्तस्य नाम्नोऽर्थे स्वार्थसंख्याबोधिकापि न स्वेतरप्रथमान्तस्येति तद्व्युदासः'' ।

अत्र प्रत्ययपदं परित्यज्य केवलं स्वभिन्नप्रथमान्तस्य नाम्नोऽर्थे स्वार्थसंख्याबोधं प्रति समर्थाः तिङ उच्यन्ते, इत्येवोच्यते, तदा यथा मैत्रः एकः, चौत्रस्तथा इत्यादौ तथेति निपातोऽपि चौत्रादौ स्वार्थसंख्याबोधं प्रति समर्थः, अतस्तत्रातिव्याप्तिः, तद्वारणाय प्रत्यय इति पदं प्रदत्तं लक्षणे। तथा च न दोषः, तस्याप्रत्ययत्वात। तथा चाह जगदीशः- ''चौत्रस्तथेत्यादौ स्वार्थैकत्वबोधकोऽपि तथादिनिपातो न प्रत्ययः'' । एवं च सुस्पष्टमिदं यदाख्यातमात्रस्य जगदीशमते संख्यार्थस्तु वर्तत एव। एवमेवाख्यातमात्रस्य कश्चन कालोऽप्यर्थो नितरां भवत्येवेति तत्तदाख्यातलक्षणेन ज्ञायते।

जगदीशस्याख्यातार्थविषये मतान्तरमपि लभ्यते। शब्दशक्तिप्रकाशिकाध्ययनेनेदं प्रतिभाति, यज्जगदीशमतानुसारं समेषामाख्यातप्रत्ययानां संख्या कृतिः कालश्चार्थो वर्तते। तथा चोक्तं द्वितीयं लक्षणमाख्यातस्य जगदीशेन-

**धात्वर्थेन विशिष्टस्य विधेयत्वेन बोधने।**
**समर्थः स्वार्थयत्नस्य शब्दो वाख्यातमुच्यते।।97।।**

कारिकार्थं प्राह जगदीशः- ''धात्वर्थावच्छिन्नस्वार्थयत्नविधेयताकान्वयबोधसमर्थः शब्दः वा आख्यातम्, तदेव तिङित्यर्थाल्लभ्यते, तिङाख्यातयोः पर्यायत्वात्श्श । यथा चौत्रः पचति, इत्यत्र पच्धात्वर्थः विक्लित्तिरूपं फलम्, तदनुकूलपावकप्रज्वलनादिव्यापारश्च, तिङर्थः कृतिः, तत्र फलं व्यापारे अनुकूलत्वसम्बन्धेन विशेषणम्, व्यापारश्च कृतौ अनुकूलत्वसम्बन्धेन विशेषणम्, कृतिश्च प्रथमान्तार्थे चौत्रे आश्रयत्वसम्बन्धेन विशेषणम्, तथा चोक्तवाक्यात् विक्लित्त्यनुकूलपावकप्रज्वलानादि-व्यापारानुकूलकृतिमान् चौत्रः, इति बोधो जायते, अत्र धात्वर्थः पावकप्रज्वलनादिव्यापारः, तेन अवच्छिन्ना तिबर्थः कृतिः, तद्विधेयताकोऽयं बोधो वर्तते, तथा च पच्धात्वर्थपावकप्रज्वलनादिव्यापारावच्छिन्न-तिङर्थयत्नविधेयताकशाब्धबोधं प्रति समर्थः शब्दः तिप् इति तं विना यत्नविषयकशाब्दबोधस्यासम्भवात्, अतस्तदेव आख्यातम् इत्युच्यते। एतेनेदमागतं भवति यत् तिङर्थो यत्न इति।

अत्र स्वार्थयत्नविधेयताकान्वयबोधसमर्थः शब्दः आख्यातम् इत्युच्यते तदा चौत्रस्य पाकः,

इत्यत्र चौत्रपदोत्तरषष्ठीविभक्तेरर्थः कृतिः, तत्र प्रकृत्यर्थस्य चौत्रस्य निष्ठत्वसम्बन्धेनान्वयः, पाकः इत्यस्य विक्लित्त्यनुकूलाग्निप्रज्वलनादिव्यापारः, तत्र व्यापारे कृतिः जन्यत्वसम्बन्धेनान्वेति, तथा चोक्तवाक्यात् चौत्रनिष्ठकृतिजन्यविक्लित्त्यनुकूलाग्निप्रज्वलनादिव्यापारः इत्यर्थो जायते। अत्र नामार्थेनावच्छिन्ना कृतिः वर्तते, एवं च नामार्थावच्छिन्नकृतिविधेयताकबोधं प्रति समर्थः शब्दः ङसिति, अतस्तदपि स्यादाख्यातमिति भावः, अतोऽत्रातिव्याप्तिवारणाय धात्वर्थावच्छिन्नेति विशेषणं प्रदत्तं लक्षणे। एवं च न दोषः, षष्ठ्यर्थकृतेः धात्वर्थेनावच्छिन्नत्वाभावात्।

अत्र यदि धात्वर्थावच्छिन्नयत्नविधेयताकान्वबोधसमर्थः शब्दः आख्यातम् इत्युच्यते, तदा चौत्रः पचति, इतिवाक्याज्जायमानं यत्नविधेयताकबोधं प्रति नामधातू अपि समर्थौ, अतस्तत्रातिव्याप्तिः, तद्वारणाय स्वार्थ इति पदं प्रदत्तं लक्षणे। एवं च न दोषः। यत्नस्य नामधात्वर्थत्वाभावात।

अत्र यदि धात्वर्थावच्छिन्नस्वार्थयत्नविषयकबोधसमर्थः शब्दः आख्यातम् इत्युच्यते, तदा पाचकः चौत्रः, इत्यादौ कृदादावव्याप्तिः। तथाहि प्रकृतस्थले पच्धात्वर्थः विक्लित्तिरूपं फलं तदनुकूलाग्निप्रज्वलनादिव्यापारश्च, ण्वुलर्थः कृत्याश्रयः, तत्र फलं व्यापारे जनकत्वसम्बन्धेन विशेषणम्, व्यापारश्च कृतौ जनकत्वसम्बन्धेन विशेषणम्, कृत्याश्रयश्च चौत्रे अभेदसम्बन्धेन विशेषणम्, तथा चोक्तवाक्यात् विक्लित्तिजनकाग्निप्रज्वलनादिजनककृत्याश्रयाभिन्नः चौत्रः, इत्याकारको बोधो जायते। अत्र धात्वर्थावच्छिन्नस्वार्थयत्नविषयकबोधं प्रति समर्थः शब्दः ण्वुलिति अतस्तत्रातिव्याप्तिः, तद्वारणाय विधेयताकेति पदं प्रदत्तं लक्षणे। तथा च ण्वुल्प्रत्ययेन कृत्याश्रयस्यैव विधेयत्वेन प्रतिपादनं क्रियते न तु कृतेः। अतो न दोषः।

अथ यदि आख्यातमात्रस्य कृतिरेवार्थः तदा कर्मणि लकारविधानं व्यर्थं स्यात, किञ्च कर्तृकर्मविहिताख्यातयोः समानार्थकत्वेन शाब्दवैलक्षण्यं न स्यात, इति तु नैव शंकनीयम्, यतोहि चौत्रः पचति, इत्यादौ कर्त्राख्यातस्थले लटा धात्वर्थविशेष्यत्वेन स्वार्थकर्तृत्वं प्रतिपाद्यते, तथा चोक्तवाक्यात् विक्लत्त्यनुकूलव्यापारानुकूलकवर्तमानकालीनकृतिमान् चौत्रः, इत्याकारको बोधो भवति। चौत्रेण तण्डुलः पच्यते, इत्यत्र तु धात्वर्थविशेषणत्वेन स्वार्थकर्तृत्वं लटा प्रतिपाद्यते, तथा चोक्तवाक्यात् चौत्रवृत्तिवर्तमानकालीनकृतिजन्यव्यापारजन्यविक्लित्त्याश्रयः तण्डुलः इत्याकारको बोधो जायते। इत्येवोभयोः विशेष, तस्मान्नास्ति कर्मत्वविहिताख्यातवैयर्थ्यमिति भावः। तथा चाह जगदीशः– ‘‘ननु यदि स्वार्थकर्तृत्वे एव लडादिना वर्तमानत्वमनुभाव्यते इति नियमः, कथं तर्हि केवलात् पच्यते इत्यादितः पाकादौ वर्तमानत्वधीरिति चेत्। क एवमाह, तत्राप्येकपदोपात्तत्वेन कर्माख्यातोपस्थापिते कर्तृत्व एव वर्तमानत्वस्यान्वयात। इयान् परं विशेषः – यत् कर्तृविहितेन लटा धात्वर्थस्य विशेष्यत्वेन, कर्मविहितेन तु तस्य विशेषणत्वेन स्वार्थकर्तृत्वमनुभाव्यते, तथैव साकाङ्क्षत्वात्’’ ।

अत्रायं विशेषः– जगदीशनये प्रयत्नापरपर्यायभूता कृतिराख्यातार्थो वर्तते। तल्लक्षणं च प्रयत्नत्वसामान्यवान् प्रयत्नः स एव च कृतिः। अथवा कार्यमात्रकारणतावच्छेदकत्वं कृतित्वम। अथवा आख्यातपदशक्यतावच्छेदकधर्मवत्वं कृतित्वम। सा च त्रिविधा। तथा चाह जगदीशः– ‘‘कृतिस्त्रिविधा जीवनयोनियत्नरूपा, प्रवृत्तिः, निवृत्तिश्च,। आद्या जीवनादृष्टजन्या। द्वितीया– इच्छाजन्या। तृतीयाद्वेषजन्या’’।

एवं न्यायसिद्धान्तमुक्तवल्यामपि प्रोक्तं वर्तते। तथाहि-

**प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्।**
**एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्तितम्।।149।।**

अत्रोऽत्र भवति सन्देहः किं प्रयत्नसामान्यः तिङ्वाच्यः, उत वा प्रयत्नविशेष इति। किञ्च तिङ्पदशक्यतावच्छेदकं कृतित्वम्, उत वा प्रवृतित्वं निवृत्तित्वं जीवनकारणत्वं वेति। अत एतद्दोषनिराकरणाय प्राह जगदीशः- ''अत्रेदं तत्त्वम्- जीवनयोन्यादिनिखिलयत्नगतं यत्नत्वमेव तिङः शक्यतावच्छेदकम्, न तु चेष्टाया जनकत्वस्य चिकीर्षाया वा जन्यत्वस्यावच्छेदकतया सिद्धं प्रवृत्तित्वम्, चौत्रो निःश्वसितीत्यादितोऽपि निःश्वासाद्यनुकूलप्रयत्नस्य प्रतीतेः'' । अयं भावः तिङो न प्रयत्नविशेषो वाच्यः अपितु प्रयत्नसामान्यः तिङ्वाच्यो वर्तते। एवं च शक्यतावच्छेदकमपि कृतित्वमेव नतु प्रवृत्तित्वादिकम्। यतोहि- चौत्रः पचति इत्यादौ विक्लित्त्यनुकूलव्यापारानुकूलकृतिमान् चौत्रः इत्यादिबोधे कृतित्वेनैव कृतेर्बोधो भवति नतु प्रवृत्तित्वादिना। किञ्च तिङः प्रवृत्तौ शक्तिं स्वीकृत्य प्रवृत्तित्वं शक्यतावच्छेदकं स्वीक्रियते चेत् चौत्रो निःश्वसिति, इत्यादयः प्रयोगा अपि न भविष्यन्ति। यतोहि वाक्यस्यास्य बोधो भविष्यति निःश्वासानुकूलप्रवृत्तिमान् चौत्र इति तच्च नैव सम्भवति, प्रवृत्तेः निःश्वासाननुकूलत्वात्। तथा चोक्तं कृष्णकान्तीटीकाकृता- ''तथा च प्रवृत्तेर्निःश्वासाननुकूलत्वेन प्रवृतित्वस्य तिङः शक्यतावच्छेदकत्वे तादृशप्रयोगो न स्यादिति भावः'' ।

अत्रायं विशेषः- अथ यदि तिङर्थः कृतिरिति स्वीक्रियते चेत् ईश्वरो जानाति, चौत्रो जानाति, इत्यादीनामर्थो भविष्यति ज्ञानानुकूलकृतिमान् ईश्वरः, एवं ज्ञानानुकूलकृतिमान् चौत्रः तच्च नैव सम्भवति, ज्ञानानुकूलकृतेरप्रसिद्धत्वात्। एवं तर्हि ईश्वरो जानातीत्यादीनां वाक्यानां का गतिः, इति चेदुच्यते- ईश्वरो जानातीत्यत्राख्यातस्य समवायित्वे लक्षणा वर्तते, एवं चास्य वाक्यस्यार्थो भविष्यति ज्ञानसमवायीश्वरः, तथा च न दोषः। एवं चौत्रो जानातीत्यादौ तिङः अवच्छेदकत्वे लक्षणा तथा चास्य वाक्यस्यार्थो भविष्यति ज्ञानावच्छेदको चौत्रः, तस्मादत्रापि न दोषः। एवं रथो गच्छति, इत्यस्यार्थो भविष्यति संयोगानुकूलव्यापारानुकूलकृतिमान् रथः, इति तदपि न सम्भवति कृतेरात्मवृत्तित्वेन रथस्य चाचेतनत्वेन तत्र कृत्याश्रयत्वस्य बाधात। अतोऽत्रापि तिङ्प्रत्ययस्याश्रयत्वे लक्षणा, तथा च संयोगानुकूलव्यापाराश्रयो रथः, इति बोधः उपपद्यते। एवं पयः पततीत्यादावपि बोध्यम्। तथा चाह जगदीशः- ''ईश्वरो जानातीत्यादौ रथो गच्छतीत्यादौ च ज्ञानादिमत्त्वमात्रप्रतीतेः समवायित्वे चौत्रो जानातीत्यादाववच्छेदकत्वे बुद्धिरवगाहते घटो भासते, इत्यादौ दैशिकाश्रयत्वे, नश्यतीत्यादौ च प्रतियोगित्वे तिङो निरूढलक्षणा'' ।

अथ कर्माख्यातप्रत्ययार्थविमर्शः-

कारकप्रकरणे कर्मस्वरूपनिरूपणेन प्रतिभाति यज्जगदीशमते कर्माख्यातप्रत्ययार्थः फलं वर्तते। तथाहि-

**यगन्तधातोरर्थे यस्तिङा स्वार्थोऽनुभाव्यते।**
**यत्रासौ कर्म्मता नाम कारकं कर्तृतेतरः।।**

अन्वय:– यत्र तिङा य: स्वार्थ: यगन्तधातो: अर्थे अनुभाव्यते असौ कर्तृतेतर: कारकं कर्म्मता नाम।

कारिकार्थं प्राह जगदीश:– ''यगन्तस्य यद्धातोरुत्तरस्थतिङा यत्र स्वार्थे तदीयो यादृशोऽर्थोऽनुभावयितुं शक्यते तद्धातूपस्थाप्यतादृशक्रियायां स तिङर्थ: कर्तृताभिन्नं कर्मत्वं नाम कारकमित्यर्थ:'' । अर्थात् यगन्तो यो हि धातु: तेन उपस्थाप्यो यो हि अर्थ:, तस्यार्थस्य तत्प्रकृतिकतिङ: यस्मिन् अर्थे विशेषणतया अन्वयो भवति स: कर्तृताभिन्न: तिङर्थ एव कर्मत्वं नाम कारकमित्यर्थ:। यथा चौत्रेण ग्रामो गम्यते, इत्यत्र तृतीयार्थ: कृति:, तत्र प्रकृत्यर्थस्य चौत्रस्य निष्ठत्वसम्बन्धेनान्वयो भवति, गम्ध ातोरर्थ: संयोगानुकूलव्यापार:, तत्र कृते: जन्यत्वसम्बन्धेनान्वयो भवति, तिङर्थ: संयोग:, तत्र धात्वर्थस्य जन्यत्वसम्बन्धेनान्वयो भवति, संयोगस्य च आश्रयत्वसम्बन्धेन प्रथमान्तार्थे ग्रामे अन्वयो भवति। तथा चोक्तवाक्यस्य चौत्रनिष्ठकृतिजन्यसंयोगानुकूलव्यापारजन्यसंयोगाश्रयग्राम:, इति बोधो जायते। एवं चात्र यगन्त: धातु: गमि:, तदुपस्थाप्यस्य संयोगानुकूलव्यापारस्य तिङर्थे संयोगे जन्यत्वसम्बन्धेन विशेषणतया अन्वयो भवति, अत: स: संयोग एव कर्मत्वं नाम कारकमित्यर्थ:। तथा चोक्तं जगदीशेन– श्श्ग्रामो गम्यते इत्यत्र गम्धातूपस्थाप्याया: संयोगावच्छिन्नक्रियाया: स्वजन्यत्वसम्बन्धेन तिङ्पदोपस्थाप्ये संयोगे एवान्वयो, न तु त्यजतीत्यादाविव विभागादौ, धात्वर्थतावच्छेदकस्यैव फलस्य बोधने कर्मविहितप्रत्ययानां धातुसाकाङ्क्षत्वादत: संयोग एव तत्र गतिक्रियाया: कर्मत्वं न तु विभागादि:। एवं च चौत्रेण ग्रामो गम्यते इत्यत्र आख्यातार्थ: संयोग:। चौत्रेण ग्राम: त्यज्यते इत्यत्र आख्यातार्थो विभाग:। एवमन्यत्रापि बोध्यम्श्श ।

अथ चौत्रेण ग्रामो गम्यते इत्यत्राख्यातस्य संयोगरूपफलमर्थो वर्तते। एवं चौत्रो ग्रामं गच्छति इत्यत्र द्वितीयाया: संयोगरूपफलमर्थो वर्तते। तथा च चौत्रवृत्तिकृतिजन्यव्यापारजन्यसंयोगो यथा ग्रामे वर्तते तथैव कर्तरि चौत्रेपि वर्तते। एवञ्च चौत्रेण ग्रामो गम्यते इतिवत् चौत्रेण चौत्रो गम्यते इति प्रयोग: स्यात। एवमेव चौत्रो ग्रामं गच्छति, इतिवत् चौत्र: चौत्रं गच्छति, अयमपि प्रयोग: स्यात् इति तु नैव वक्तव्यम्, यतोहि– यद्यपि प्रतिपादितदिशा दोष: प्रतिभाति किन्तु तस्य समाधानमपि वर्तते। तथाहि– तिङर्थसंयोगे व्यापारस्य स्वजन्यत्वस्वाश्रयप्रतियोगिकत्वम् इत्युभयसम्बन्धेनान्वयो भवति। तथा च चौत्रेण ग्रामो गम्यते इति वाक्यस्य चौत्रवृत्तिकृतिजन्यव्यापारजन्य: चौत्रप्रतियोगिक: य: संयोग: तदाश्रयो ग्राम: इति बोध: समुत्पद्यते। एवं च यदि चौत्रेण चौत्रो गम्यते इति वाक्यप्रयोग: क्रियते चेदस्य वाक्यस्यार्थो भविष्यति चौत्रवृत्तिकृतिजन्यव्यापारजन्य: चौत्रप्रतियोगिक: य: संयोग: तदाश्रयो चौत्र: तच्च बाधितं वर्तते, चौत्रे चौत्रप्रतियोगिकसंयोगे चौत्रवृत्तिकृतिजन्यव्यापारजन्यस्य बाधितत्वात्, तस्माद्बाधितार्थबोध कत्वेनेदं वाक्यं नैव प्रयुज्यते। तथा चाह जगदीश:– ''ननु चौत्रकर्तृकगमनजन्यसंयोगस्य ग्राम इव चौत्रेऽपि सत्वाच्चौत्रेण गम्यते चौत्र: इत्यपि प्रयोग: स्यात्, न स्यात् तिङर्थसंयोगे स्वजन्यत्वस्वाश्रयप्रतियोगिक–त्वोभयसम्बन्धेन धात्वर्थगते: साकाङ्क्षत्वेन चौत्रकर्तृकगत्याश्रयप्रतियोगकत्वविशिष्टस्य संयोगस्य चौत्रे बाधात्श्श । एवं चौत्र: चौत्रं गच्छति इत्येषोऽपि न प्रयोग:। अयं भाव: चौत्रो ग्रामं गच्छतीति वाक्यस्य च ग्रामप्रतियोगिकसंयोगानुकूल: संयोगाश्रयचौत्रवृत्तिश्च यो व्यापार: तदनुकूलकृतिमान् चौत्र:, इत्याकारको

बोधो भवति। एवं च यदि चौत्रः चौत्रं गच्छतीति वाक्यस्य चौत्रप्रतियोगिकसंयोगानुकूलः तदाश्रयचौत्रवृत्तिश्च यो व्यापारः तदनुकूलकृतिमान् चौत्रः इत्याकारको बोधो भविष्यति तदपि चौत्रे बाधितं वर्तते, ग्रामप्रतियोगिकसंयोगजनकत्वस्य ग्रामप्रतियोगिकसंयोगाश्रयचौत्रवृत्तित्वस्यचौत्रनिष्ठव्यापारे विद्यमानत्वेऽपि चौत्रप्रतियोगिकसंयोगजनकत्वं चौत्रप्रतियोगिकसंयोगाश्रयचौत्रवृत्तित्वं तत्र नैव सम्भवति। कारणं हि चौत्रप्रतियोगिकसंयोगस्य आश्रयो नैव चौत्रो भवितुमर्हति एकस्मिन् एकसंयोगप्रतियोगित्वानुयोगित्वासम्भवेन स्वप्रतियोगित्वविशिष्टसंयोगस्य स्वस्मिन् असत्त्वात्। तथा चाह जगदीशः– ''अत एव चौत्रो ग्रामं गच्छतीतिवत् चौत्रश्चौत्रं गच्छतीत्यपि न प्रयोगः, तत्रापि द्वितीयार्थसंयोगे प्रकृत्यर्थस्य स्वप्रतियोगिकत्व-सम्बन्धेनैव साकाङ्क्षतया द्वितीयान्तलभ्यस्य चौत्रीयवृत्तित्वविशिष्टसंयोगस्य जनकत्वस्वाश्रयवृत्तित्वोभयसम्बन्ध ेनैव क्रियायामन्वयेन चौत्रप्रतियोगिकसंयोगाश्रयवृत्तिगतेश्चौत्रे बाधितत्वात्श्श । तस्मान्नास्ति दोष इति भावः।

**1. पाणिनीयस्मृतिविरोधापत्तिः–**

यदि जगदीशानुसारं कर्त्राख्यातप्रत्ययानां कृतिरर्थः, कर्माख्यातप्रत्ययानां फलमर्थः, इति स्वीक्रियते चेत्तदा लः कर्मणि च भावे चाकर्मकेभ्यः इति पाणिनीयस्मृतिविरोधापत्तिरूपो दोषो वर्तते। तथाहि सूत्रस्यास्यार्थस्तावत् भवति श्शलकाराः सकर्मकेभ्यो धातुभ्यः कर्तरि कर्मणि च भवन्ति, अकर्मकेभ्यो ध ातुभ्यः कर्तरि भावे च भवन्तिश्शएवं च लकाराणां कर्ता कर्म भावः, इत्येते वाच्या इति सूत्रानुसारं समायाति, जगदीशानुसारं तु कृतिः फलं भावः इत्येते वाच्याः लकाराणामिति, तथा च सूत्रेण साकं विरोधः स्पष्ट एवेति भावः।

**अत्र समाधानम्–**

यद्यपि प्रतिपादितदिशा दोषो वर्तते किन्तु नैयायिकाः दोषस्यास्य समाधानं कुर्वन्ति। तथाहि– ते वदन्ति लः कर्मणि चेति सूत्रे कर्तृकर्मपदे भावप्रधाननिर्देशो वर्तते, एवञ्च कर्तृ, इत्यस्य कर्तृत्वमर्थः, कर्तृत्वं च कृतिः। यतोहि न्यायनये कर्ता कृत्याश्रयः, तथा च कर्तृत्वं नाम कृतिः ''प्रकृत्यर्थप्रकारीभूतो धर्मो भावप्रत्ययेनोच्यते'' इति नियमात्। कर्म इत्यस्य च कर्मत्वमर्थः कर्मत्वं च फलम्। न्यायनये फलाश्रयः कर्म, एवं च कर्मत्वं फलमिति सिध्यति प्रोक्तन्यायात्। तथा च सूत्रस्यार्थो भवति लकाराः सकर्मकेभ्यो धातुभ्यः कर्तृत्वे कर्मत्वे च भवन्ति, अकर्मकेभ्यो धातुभ्यो भावे कर्तृत्वे च भवन्ति। एवं चानेन सूत्रेणापि लकाराणां कृतिः फलमित्यादय एवार्था सन्तीति प्रतिफलति। तस्मान्नास्ति स्मृतिविरोधापत्तिरिति भावः।

**2. अभिहितानभिहितव्यवस्थोच्छेदापत्तिः–**

जगदीशनयानुसारमयमपि दोषो वर्तते। तथाहि– चौत्रः तण्डुलं पचति, चौत्रेण तण्डुलः पच्यते, इत्यादौ यदा कर्तरि तिबादयः प्रत्ययाः भवन्ति तदा कर्ता अभिहितो भवति कर्मादयश्चानभिहिताः भवन्ति। एवञ्च अभिहिते कर्तरि प्रथमा अनभिहितकर्मादिषु च द्वितीयादिविभक्तयो भवन्ति। एवञ्च चौत्रः तण्डुलं पचति इत्यादिवाक्यानां सिद्धिर्भवति। यदा च कर्मणि तिबादिप्रत्ययाः भवन्ति तदा कर्म अभिहितं भवति कर्त्रादयश्चानभिहिताः भवन्ति। एवञ्च अभिहिते कर्मणि प्रथमा भवति अनभिहितकर्त्रादिषु

च तृतीयादिविभक्तयो भवन्ति। तथा सति चौत्रेण तण्डुलः पच्यते इत्यादिप्रयोगाणां सिद्धिर्भवति। परन्तु जगदीशमते तु तिबादिप्रत्यया कृत्यादिष्वर्थेषु समागच्छन्ति। एवञ्च तैः कृत्यादीनामर्थानामभिधानं भवति नतु कर्त्रादीनामर्थानाम्, एवञ्च कथं जगदीशनये अभिहितस्य अनभिहितस्य च व्यवस्था भविष्यति, कथं च चौत्रः तण्डुलं पचति, चौत्रेण तण्डुलः पच्यते, इत्यादीनां वाक्यानां सिद्धिर्भविष्यति। तस्मादस्ति जगदीशनये अभिहितानभिहितव्यवस्थोच्छेदापत्तिरूपो दोष इति भावः।

**अत्र समाधानम्-**

यद्यपि प्रतिपादितदिशा समुपस्थापितदोषः प्रतिभाति किन्तु नैयायिकैः स्वग्रन्थेषु दोषस्यास्य समाधानं विहितं वर्तते। तथाहि- ते वदन्ति यन्नहि तत्तद्विभक्त्युत्पत्तौ कर्तृकर्मादीनामभिधानानभिधानं तन्त्रं किन्तु कर्तृकर्मादिगतसंख्याभिधानानभिधानं तत्तद्विभक्त्युत्पत्तौ कारणमस्ति। एवं च यदा तिङादिभिः कर्तृगतसंख्यायामनभिहितायां कर्तृवाचकपदोत्तरं तृतीया भवति, तस्यामभिहितायां च प्रथमा भवति। एवं तिङादिभिः कर्मगतसंख्यायामनभिहितायां कर्मवाचकपदोत्तरं द्वितीया भवति, तस्यामभिहितायां तु प्रथमा भवति। अत्रैव च अनभिहिते इत्यधिकारसूत्रस्य तात्पर्यं वर्तते। तेषां नये हि कर्मणि द्वितीया इति सूत्रस्यार्थो भवति कर्मगतसंख्यायामनभिहितायां द्वितीया विभक्तिः भवतीति। एवं कर्तृकरणयोस्तृतीया इत्यस्यार्थो वर्तते कर्तृकरणगतसंख्यायामनभिहितायां तृतीया भवतीति। यथा चौत्रेण तण्डुलः पच्यते, इत्यत्राख्यातेन कर्तृचौत्रनिष्ठैकत्वसंख्याया अनभिधानात् तत्र चौत्रपदात्तृतीया विभक्तिः सञ्जाता किञ्च कर्मतण्डुलनिष्ठैकत्वसंख्याया अभिधानात् ततः प्रथमा सञ्जाता। एवं चौत्रः तण्डुलं पचति इत्यादौ तिङा कर्तृचौत्रनिष्ठैकत्वसंख्याया अभिधानात् तद्वाचकाच्चौत्रपदात् प्रथमा विभक्तिः सञ्जाता, कर्मतण्डुलनिष्ठैकत्वसंख्याया अनभिधानात् तद्वाचकात्तण्डुलशब्दाच्च द्वितीया विभक्तिः सञ्जाता।

अथवा जगदीशो वदति- यत्र तिङा यस्य नाम्नोऽर्थे स्वार्थः कृतिः विशेषणतया अनुभाव्यते तदा तद्वाचकाच्चौत्रादिपदात् प्रथमा भवति। यथा पचति चौत्रः इत्यस्माद्वाक्यात् विक्लित्यनुकूल-व्यापारानुकूलकृतिमान् चौत्रः इति बोधो भवति। एवञ्चात्र तिङः चौत्ररूपनाम्नोऽर्थे स्वार्थकृतिः विशेषणतया अनुभाव्यते, अतस्ततः प्रथमा भवति। एवं यत्र तिङः स्वार्थकृतित्वं यस्य नाम्नोऽर्थे विशेष्यतया अनुभाव्यते तन्नामवाचकात् तृतीया भवति। यथा चौत्रेण तण्डुलः पच्यते, इत्यत्र चौत्रवृत्तिकृतिजन्य-व्यापारजन्यविक्लित्याश्रयस्तण्डुलः इति बोधो भवति। एवञ्चात्र ते इत्यनेन चौत्ररूपनाम्नोऽर्थे स्वार्थकृतित्वं विशेष्यतया अनुभाव्यते तस्मात्ततः तृतीया सञ्जाता। एवं यत्र यस्य नाम्नोऽर्थे फलं विक्लित्यादिविशेष्यतया प्रतिभाति तन्नामवाचकात् द्वितीया भवति। यथा चौत्रः तण्डुलं पचति, इत्यतः तण्डुलवृत्ति-विक्लित्यनुकूलव्यापारानुकूलकृतिमान् चौत्रः इति बोधो भवति अतोऽत्र तण्डुलरूपनाम्नोऽर्थे विक्लित्तिरूपं फलं विशेष्यत्वेन प्रतिभाति, तस्मात्ततः द्वितीया सञ्जाता। यत्र च विक्लित्तिरूपं फलं यस्य नाम्नोऽर्थे विशेषणत्वेन प्रतिभाति तत्र तन्नामवाचकात् प्रथमा भवति। यथा चौत्रेण पच्यते तण्डुलः, इत्यादौ चौत्रवृत्तिकृतिजन्यव्यापारजन्यविक्लित्याश्रयस्तण्डुलः इति बोधो भवति तस्मादत्र फलं तण्डुलापेक्षया विशेषणत्वेन प्रतिभाति, तस्मादत्र ततः प्रथमा सञ्जाता। एवमन्यत्रापि बोध्यम्। अत एव प्रोक्तमपि जगदीशेन- ''यस्य नाम्नोऽर्थे तिङः स्वार्थः कृतिरुक्तदिशाऽनुभाव्यते तत्रैव प्रथमातृतीययोरपेक्षेत्येवमभि-

हिताधिकारीयसुपां व्यवस्थासम्भवादिति प्राहुरित्यास्तां विस्तर:'' । अतो न दोष इति भाव:।

**3. पुरुषव्यवस्थोच्छेदापत्ति:-**

जगदीशनये पुरुषव्यवस्थोच्छेदापत्तिरूपोऽपि दोषो वर्तते। तथाहि युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यम: [पा० सू० 1-4-104] इत्यनेन सूत्रेण मध्यमपुरुषस्य व्यवस्था भवति। सूत्रेऽस्मिन् सामानाधिकरण्यं नाम तिङ्वाच्यकारकवाचित्वरूपम्, एवं च सूत्रस्यास्यार्थस्तावत् तिङ्वाच्यकारकवाचिनि युष्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च मध्यमपुरुषो भवतीति, यथा त्वं गच्छसि, मया त्वं दृश्यसे, इत्यादौ, किन्तु जगदीशनये तु तिङ्वाच्यं कारकमस्त्येव नहि तन्नये तु तिङ: कृतिरर्थ:, कृतेश्च नहि युष्मदर्थेन साकं सामानाधिकरण्यं सम्भवति। तस्मात्कथं मध्यमपुरुषस्य व्यवस्था स्यात। एवम् अस्मद्युत्तम: [पा० सू० १/४/१०५] इति सूत्रमुत्तमपुरुषस्य व्यवस्थापकम्, सूत्रस्यास्यार्थस्थावत् तिङ्वाच्यकारकवाचिनि अस्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च उत्तमपुरुषो भवति। अत्रापि तिङ्वाच्यस्य कारकस्याभावादस्यापि सूत्रस्य प्रवृत्तिर्नैव भविष्यति तस्मात्कथं जगदीशनये उत्तमपुरुषस्य व्यवस्था भविष्यति। शेषे प्रथम: [पा० सू० १/४/१०५] इत्यनेन प्रथमपुरुषस्य व्यवस्था भवति। अस्यापि सूत्रस्य प्रवृत्ति: कारकवाचकत्वाभावे नैव सम्भवति। तस्मात्कथं प्रथमपुरुषस्य व्यवस्था भविष्यति। एवं च पुरुषव्यवस्थोच्छेदापत्तिरूपो दोषो वर्तते जगदीशनय इति भाव:।

**अत्र समाधानम्-**

यद्यपि वैयाकरणै: सूत्रस्यास्यार्थो यथा प्रतिपादितो वर्तते तद्रीत्या दोषस्तु प्रतिभाति किन्तु न्यायनये सूत्रस्यार्थो भिन्नरूपेण प्रतिपादितो वर्तते। तथाहि- युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यम: [पा० सू० १/४/१०५] इत्यत्र न्यायनये सामानाधिकरण्यं नाम तिङर्थान्वितार्थबोधकत्वम्, तिङर्थसंख्यान्वयिवाचकत्वं वा। एवं च सूत्रस्यास्यार्थो भवति तिङर्थान्वितार्थबोधके तिङर्थसंख्यान्वयिवाचिनि वा युष्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च मध्यमपुरुषो भवति। यथा त्वं गच्छसि इत्यत्र तिङर्थ: कृति: तस्यान्वयो प्रथमान्तार्थे युष्मदर्थे भवति, अत: तिङर्थकृत्यन्वितार्थ: युष्मदर्थ:, तद्बोधके युष्मदि उपपदे सति प्रकृतस्थले मध्यमपुरुषस्य प्रयोगो भवति। अथवा तिङर्थ: अत्र एकत्वसंख्या तस्या युष्मदर्थे अन्वयो भवति, अतस्तदन्वयि युष्मदर्थ:, तद्वाचिनि युष्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने चात्र मध्यमपुरुषस्य प्रयोगो भवति। यथा त्वं गच्छसि, त्वं पचसि, इत्यादौ भवति एवमन्यत्रापि बोध्यम्। एवम् अस्मद्युत्तम: [पा० सू० १/४/१०५] इति सूत्रस्यार्थो भवति, तिङर्थान्वितार्थबोधके तिङर्थसंख्यान्वयिवाचिनि वा अस्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च उत्तमपुरुषो भवति। अहं गच्छामि, अहं पचामि इत्यादौ भवति। एवमन्यत्रापि बोध्यम्।

**अत्र निष्कर्ष:-**

अतोऽत्र निष्कर्षरूपेण वक्तुं शक्यते यज्जगदीशमते समेषाम् आख्यातप्रत्ययानां संख्या काल: कृतिश्चार्था: सन्ति। एवञ्च आख्यातस्य प्रयोगे एतेषां त्रयाणामर्थानामुपस्थिति: भवति। किन्तु भावख्यातस्थले संख्याया: भानं नैव भवति। कर्त्राख्यातप्रत्ययानां संख्या काल: कृतिश्चार्था: सन्ति। कर्माख्यातप्रत्ययानामर्थ: फलं संख्या कालश्चार्था: सन्ति। भावाख्यातप्रत्ययानामर्थाश्च संख्या काल: कृतिश्च।

छात्रः ग्रामं गच्छति - अत्र छात्र-सु ग्राम-अम् गम्-ति। छात्रपदस्य छात्र इत्यर्थः, सुपदं तु पदसाधुत्वार्थम्। ग्रामपदस्य ग्राम इत्यर्थः, अम्पदस्य कर्मत्वम्, एकत्त्वं चार्थः, कर्मत्वं चात्र संयोगरूपमस्ति। गमिधातोः गमनमर्थः, गमनं नाम संयोगानुकूलव्यापारः। तिपः कृतिः एकत्त्वं वर्तमानकालश्चार्थाः सन्ति।तत्र द्वितीयार्थे संयोगे ग्रामस्य वृत्तित्वसम्बन्धेनान्वयः द्वितीयार्थैकत्त्वस्य च ग्रामे अन्वयो भवति। द्वितीयार्थसंयोगस्य गमने अनुकूलत्वसम्बन्धेन अन्वयः। तिबर्थकृतौ गमनस्य अनुकूलत्वसम्बन्धेनान्वयः भवति। कृतेश्च चौत्रे आश्रयत्वसम्बन्धेनान्वयः भवति। तिबर्थैकत्त्वस्यापि चौत्रे एवान्वयः भवति। तिबर्थवर्तमानकालस्य तिबर्थकृतौ एवान्वयः भवति। तथा चोक्तवाक्यात् एकत्त्वविशिष्टग्रामनिष्ठसंयोगानुकूल-गमनानुकूलवर्तमानकालीनकृतिमान् एकत्त्ववान् चौत्रः इति बोधो भवति।

छात्रेण ग्रामः गम्यते - अत्र छात्र-टा ग्राम-सु गम्-ते इत्येतानि षट् पदानि सन्ति। तत्र छात्रपदस्य छात्र इत्यर्थः, टा इत्यस्य कृतिः, एकत्वं चार्थः। ग्रामपदस्य ग्राम इत्यर्थः, सुपदं तु पदसाधुत्वार्थम्। गमिधातोः गमनमर्थः, गमनं नाम संयोगानुकूलव्यापारः। ते इत्यस्य संयोगरूपं फलम्, एकत्त्वम्, वर्तमानकालश्चार्थाः सन्ति।तत्र तृतीयार्थे कृतौ छात्रस्य वृत्तित्वसम्बन्धेनान्वयः भवति। तेपदार्थवर्तमानकालस्य तृतीयार्थकृतौ च अन्वयः भवति। तृतीयार्थैकत्त्वस्य च छात्रे अन्वयो भवति। तृतीयार्थकृतेश्च व्यापारे जन्यत्वसम्बन्धेन अन्वयः भवति। तेपदार्थसंयोगे धात्वर्थव्यापारस्य गमनस्य जन्यत्वसम्बन्धेनान्वयः भवति। संयोगस्य च ग्रामे आश्रयत्वसम्बन्धेनान्वयः भवति। तेपदार्थैकत्त्वस्यापि ग्रामे एवान्वयः। तथा चोक्तवाक्यात् एकत्त्वविशिष्टछात्रनिष्ठवर्तमानकालीनकृतिजन्यगमनजन्यसंयोगवान् एकत्त्ववान् ग्रामः इति बोधो भवति।

चौत्रेण सुप्यते- अत्र वाक्ये चौत्र टा सुप् ते इत्येतानि पदानि सन्ति। तत्र चौत्रपदस्य चौत्र इत्यर्थः। टाप्रत्ययस्य वृत्तित्वम् एकत्वं च अर्थः। तेप्रत्ययस्य वर्तमानकालः कृतिः च अर्थः। तत्र तृतीयार्थस्यैकत्वस्य चौत्रे समवायसम्बन्धेनान्वयः, चौत्रस्य च तृतीयार्थे वृत्तित्वे निरूपितत्वसम्बन्धेनान्वयः, चौत्रनिरूपितवृत्तित्वस्य च ते इत्यस्यार्थभूतायां कृतौ आश्रयत्वसम्बन्धेनान्वयः, तेप्रत्ययार्थवर्तमानकालस्यापि कृतौ अन्वयः। कृतेश्च धात्वर्थे जन्यत्वसम्बन्धेनान्वयः। तथा चोक्तवाक्यात् एकत्वविशिष्टचौत्रवृत्ति-वर्तमानकालीनकृतिजन्यः स्वापः इति बोधः।

1. वैयाकरणसिद्धान्तकौमुदीद्वितीयभागपत्रसंख्या 77/ प्रकाशनवर्षम्-1982/ प्रकाशकः चौखम्बाओरियन्टालिया वाराणसी।
2. वैयाकरणसिद्धान्तकौमुदीबालमनोरमाद्वितीयभागपत्रसंख्या 77/ प्रकाशनवर्षम्-1982/ प्रकाशकः चौखम्बाओरियन्टालिया वाराणसी
3. वैयाकरणसिद्धान्तमञ्जूषापत्रसंख्या 84/ प्रकाशनवर्षम्-1977/ प्रकाशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
4. वैयाकरणसिद्धान्तमञ्जूषापत्रसंख्या 84/ प्रकाशनवर्षम्-1977/ प्रकाशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
5. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्-2007/ प्रकाशकः चौखम्बाप्रकाशनम्, वाराणसी।
6. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्-2007/ प्रकाशकः चौखम्बाप्रकाशनम्, वाराणसी।
7. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्- 2007/ प्रकाशकः चौखम्बाप्रकाशनम्, वाराणसी।
8. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्- 2007/ प्रकाशकः चौखम्बाप्रकाशनम्, वाराणसी।
9. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्- 2007/ प्रकाशकः चौखम्बाप्रकाशनम्, वाराणसी।

10. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्- 2007/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।
11. प्रकाशटीकायुततर्कामृतपत्रसंख्या 54/ प्रकाशनवर्षम्- 1993/ प्रकाशक: चौखम्बाविद्याभवनम्, वाराणसी।
12. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्- 2007/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।।
13. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्- 2007/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।
14. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्- 2007/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।
15. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्- 2007/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।।
16. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्- 2007/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।।
17. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्- 2007/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।।
18. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्- 2007/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।।
19. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्- 2007/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।।
20. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 311/ प्रकाशनवर्षम्- 2007/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।।

# माध्यमिकबौद्धमते भावानां स्वभावनिषेधः

- डॉ० गुरुचरणसिंहनेगी

विद्यत एव भावानां स्वभावः, तन्निष्पादकहेतुप्रत्ययोपादानात्। इह यन्नास्ति न तस्य निष्पादकहेतुप्रत्ययोपादानमस्ति, यथा- 'पुष्पस्य। एवं भावानां स्वभावः सिध्यतीति वस्तुस्वभाववादीनां दार्शनिकानां मतम्। माध्यमिकबौद्धदार्शनिकाः एतत्प्रतिक्षिपन्ति। ते तर्कयन्ति- यदि भावानां संस्काराङ्कुरादीनां स्वभावोऽस्ति तदा विद्यमानत्वात् तदुत्पत्त्यर्थम् अविद्याबीजादिहेतुप्रत्ययोपादनं निरर्थकम्। यदि स्वभावो नाम हेतुप्रत्ययसम्भूतः स्यात् तदा स कृतकः स्यात्, यः कृतकः स न स्वभावो भवति। उक्तं चायार्यनागार्जुनपादैः-

**न संभवः स्वभावस्य युक्तः प्रत्ययहेतुभिः।**

**हेतुप्रत्ययसम्भूतः स्वभावः कृतको भवेत्।।**

**स्वभावः कृतको नाम भविष्यति पुनः कथम्।**

**अकृत्रिमः स्वभावो हि निरपेक्षः परत्र च।।** [1]

कृतकश्चेति स्वभावश्चेति परस्परविरूद्धत्वाद् असङ्गतार्थमेतत्। इह हि स्वो भावः स्वभावः इति व्युत्पत्तेः, यः कृतकः पदार्थः स लोके नैव स्वभाव इति व्यपदिष्यते, तद्यथा- अपाम् औष्ण्यम्। यस्तु अकृतकः स स्वभावः, तद्यथा- अग्नेरौष्ण्यमिति। अत्र वस्तुस्वभाववादिनः कथयन्ति। यद्यपि स्वभावो नास्ति भावानाम्, तथापि परभावस्तावदस्ति, तदप्रतिषेधात्। सति च परभावे स्वभावोऽपि भविष्यति। स्वभावमन्तरेण परभावाप्रसिद्धेरिति। माध्यमिकाः मतमिदं खण्डयन्त आह- परभावमपेक्ष्यापि भावानां स्वभावो न भवति। यदि भावानां स्वभावः एव नास्ति तदा कथं परभावः। उक्तं च -

**कुतः स्वभावस्याभावे परभावो भविष्यति।**

**स्वभावः परभावस्य परभावो हि कथ्यते।।** [2]इति।

अत्र वस्तुवादिनः कथयन्ति। यद्यपि भवद्भिः माध्यमिकैः स्वभावपरभावौ प्रतिषिद्धौ, तथापि भावोऽस्ति, प्रतिषेधाभावात्। ततश्च स्वभावो वा भवेत्, परभावो वा, तस्मात् स्वभावपरभावावपि भविष्यत इति। माध्यमकिकाः एतत्प्रतिक्षिपन्त आह- स्वभावपरभावाभ्यां विना कश्चिद् भावो न भवति। उक्तमाचार्यनागार्जुनपादैः-

**स्वभावपरभावाभ्यामृते भावः कुतः पुनः।**

**स्वभावे परभावे वा सति भावो हि सि यति।।** [3]इति।

अत्र पुनः वस्तुवादिनः तर्कयन्ति- यद्यपि भावो नास्ति, तथाप्यभावस्तावदस्ति, अप्रतिषेधात्। स चाभावो

भवन् भावोऽपि भविष्यतिप्रतिद्वन्द्विसद्भावात्, अभाववदिति। अत्र माध्यमिकाः प्रतिक्षिपन्तः कथयन्ति यत् स्यात् भावः, यदि अभाव एव स्यात्। न त्वस्तीत्याह-

**भावस्य चेदप्रसिद्धिरभावो नैव सि यति।**

**भावस्य ह्यन्यथाभावमभावं ब्रुवते जनाः।।** [४]

अनेन प्रकारेण माध्यमिकाः बौद्धदार्शनिकाः स्वभावम्, परभावम्, भावम्, अभावञ्च न स्वीकुर्वन्ति। उक्तञ्च मध्यमकशास्त्रे-

**स्वभावं परभावं च भावं चाभावमेव च।**

**ये पश्यन्ति न पश्यन्ति ते तत्त्वं बुद्धशासने।।** [५]

इत्यत्रायमभिप्रायः- ये तथागतप्रवचनाविपरीतव्याख्यानाभिमानिताया पृथिव्याः काठिन्यं स्वभावः, वेदनायाः विषयानुभवः स्वभावः, विज्ञानस्य विषयप्रतिविज्ञप्तिः स्वभावः इत्यादिलक्षणेन भावानां स्वभावं वर्णयन्ति, अन्यद् विज्ञानम्, अन्यद् रूपम्, अन्यैव च वेदना- इत्येवं परभावं वर्णयन्ति। अतीतानागतप्रत्युत्पन्नकालेषु स्वभावसत्तां वर्णयन्ति, न ते परमगम्भीरस्य प्रतीत्यसमुत्पादस्य तत्त्वं न जानन्ति। वस्तुतः स्वभावपरभावभावाभावदर्शनानि युक्तिरहितत्वान्न तत्त्वानि। अत एव मुमुक्षूणां विनेयजनानामुक्तं भगवता बुद्धेन आर्यकात्यायनाववादसूत्रे[६] इत्ययं प्रतिपादयद्भिः आचार्यनागार्जुनैरुक्तम् -

**कात्यायनाववादे चास्तीति नास्तीति चोभयम्।**

**प्रतिषिद्धं भगवता भावाभावविभाविना।।** [७]इति।

वस्तुतो बालपृथग्जनाः अविद्यावशात् निःस्वभावमेव भावजातं सस्वभावत्वेन गृह्णन्ति। अविद्यारहितैः अर्थात् यथावस्थिभावाभावाविपरीतस्वभावपरिज्ञातैः कल्पितानुपलब्धस्वभावैः अन्यैः भावानां स्वभावो न दृश्यते। अनेन प्रकारेण सर्वधर्मेषु अस्तित्वं नास्तित्वं वा ये परिकल्पयन्ति, ते शाश्वतोच्छेदान्तयोः अन्तद्वयोः पतन्ति। उक्तं च नागार्जुनपादैः-

**अस्तीति शाश्वतग्राहो नास्तीत्युच्छेददर्शनम्।** [८] इति।

उक्तं चभावाभावविभाविना भगवता बुद्धेनापि- ''अस्तीति काश्यप, अयमेकोऽन्तः, नास्तीति काश्यप, अयमेकोऽन्तः.... [९]''

अपि च-

**अस्तीति नास्तीति उभेऽपि अन्ता शुद्धी अशुद्धीति इमेऽपि अन्ता।**

**तस्मादुभे अन्त विवर्जयित्वा मध्येऽपि स्थानं न करोति पण्डितः।।** [१०] इति।

अपि च-

**भावानभावानिति यः प्रजानति, स सर्वभावेषु न जातु सज्जते।**

**यः सर्वभावेषु न जातु सज्जते, स आनिमित्तं स्पृशती समाधिम्।।** [११]

अतः माध्यमिकास्तु अस्तित्वनास्तित्वे अनाश्रित्य तत्त्वमुपदिशन्ति। उक्तमाचार्यनागार्जुनपादैः-

**तस्मादस्तित्वनास्तित्वे नाश्रियेत विचक्षणः।** [१२]इति।

सन्दर्भः-


१. मध्यमकशास्त्रम्, १५/१-३, पृ.-१३, सम्पादकः- स्वामी द्वारिकादासशास्त्री, बौद्धभारती, वाराणसी, १६८३.

२. तत्रैव- १५/३.

३. तत्रैव- १५/४य भावो हि परिकल्प्यमानः स्वभावो वा भवेत्, परभावो वा, तौ च पूर्वोक्तविधिना न स्तः, इति तयोरभावाद्भावोऽपि नास्तीत्यवधार्यताम्। मध्यमकशास्त्रम् (प्रसन्नपदया वृत्त्या युतम्), पृ.- ११६, सम्पादकः- स्वामी द्वारिकादासशास्त्री, प्रकाशकः- बौद्धभारती, वाराणसी, १६८३

४. तत्रैव- १५/५

५. तत्रैव- १५/६

६. यद्भूयसा, कात्यायन, अयं लोकोऽस्तितां वा अभिनिविष्टः, नास्तितां च। तेन न परिमुच्यते। जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासेभ्यो परिमुच्यते। पाञ्चगतिकात् संसारचारकागारबन्धनान्न परिमुच्यते। मातृमरणसन्तापदुःखान्न परिमुच्यते। पितृमरणसन्तापदुःखादिति विस्तरः।

७. मध्यमकशास्त्रम्, १५/७, पृ.-१४.

८. मध्यमकशास्त्रम्, १५/१०, पृ.-१४.

६. मध्यमकशास्त्रम् (प्रसन्नपदया वृत्त्या युतम्), पृ.- ११७.

१०. समाधिराजसूत्रम्- ६.२७

११. समाधिराजसूत्रम्- ३८.

http://www.dsbcproject.org.canon.tet.content-443-2140 /Date: 03-05-2019, Time : 08:51am.

१२. मध्यमकशास्त्रम्, १५/१०, पृ.-१४.य अपि च-

''यदेनयोरन्तयोर्मध्यम्, तदरूप्यमनिदर्शनमप्रतिष्ठमनाभासमनिकेतमविज्ञप्तिकम्। इयमुच्यते काश्यप, मध्यमा प्रतिपद् भूतप्रत्यवेक्ष'' इति। मध्यमकशास्त्र उद्धृतम्, मध्यमकशास्त्रम्, पृ.- ११७.



सहायकाचार्य

बौद्धदर्शनविभागः राष्ट्रियसंस्कृतसंस्थानम्

;मानितविश्वविद्यालयःद्ध विशालखण्डः ४, गोमतीनगरम्,  लखनऊ- १०

# भाषायाः उद्गमे विविध सिद्धान्ताः

– डा. विचित्ररंजनपण्डा

मानवः स्वकीयभावान् प्रकटयितुं यच्च मौखिकसाधनम् आश्रयति सा भाषा। यद्यपि संकेत–इङ्गितचेष्टादिभिः केचन भावाः अभिव्यञ्जयितुं समर्थाः भवन्ति तथापि स्वकीय भावान् सूक्ष्मातिसूक्ष्मरूपेण स्पष्टतया च व्यक्ती कर्तुं प्रमुखसाधनं हि भाषा। मननस्य, चिन्तनस्य विचारस्य च साधनं हि भाषा। भाषा तादृशी जीवनज्योतिर्भवति या इतरैः सह सम्बन्धस्थापयितुं समर्था भवति। मानवीयविचाराः समाजे सम्पर्कं स्थापयन्ति। अयं सम्पर्कः भाषया सम्भवति। यदि मनुष्यस्य पार्श्वे भाषारूपो अमोघास्त्रं न भवति तर्हि मनुष्योऽपि पशुपक्षीकीटपतङ्गादि तुल्य स्वकीय भावान् स्पष्टतया व्यक्तीकर्तुम् असमर्थः भवति। विश्वस्मिन् विश्वे प्रत्येकस्मिन् देशे काचित् एका भाषा प्रचलति, सा तेषां विचारविनिमयस्य माध्यमो भवन्ति। वस्तुतः इयं भाषा मानवशरीरे दैवी अंशरूपेण विद्यमाना वर्तते, सा पुनः सृष्टौ मनुष्याः केवलं प्राप्ताः वर्तन्ते। उक्तं यथा वाक्यपदीये –

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी।। (वाक्य–1/124)

भाषायाः स्वरूपम् एतादृशम् चेत् तर्हि तस्या उत्पत्तिः कथंमिति अवश्यं ज्ञातव्यं भवति। वस्तुतः भाषात्पत्तिजन्यविषयाः द्वन्दास्पदः। यतोहि विषयेऽस्मिन् विदुषां वैभत्यं लक्ष्यते। अस्मिन् विषये केचन विचारा अपूर्णा अनिर्णयात्मिकाश्य सन्ति, केचन विचाराः पूर्णतया त्रुटिपूर्णाः, केचन अंशतः। भाषायाः उत्पत्तिविषये द्वे वार्ते अनिवार्ये स्तः।

(1) वाग्यन्त्रेण धननम् अथवा वर्णोच्चारणस्य ममता।

(2) उच्चरितध्वनेः अर्थेन साकं सम्बन्धः।

अत्र प्रथमा या वार्ता विद्यते सा तु सर्वेषु पशुपक्षिषु तथा च अन्येषु जीवेषु प्राप्यते। तेषां समीपे ध्वनियन्त्रं अर्थात् मुखं विद्यते। तेन मुखेन माध्यमेन ते स्व अभिप्रायं अस्पष्टतया प्रकटयन्ति। तेषां समीपे व्यक्तवाचः अभावो विद्यते। ते कांव–कांव, चीं–चीं, म्याऊँ–म्याऊँ इत्यादयः अस्पष्टध्वनयः उच्चरयन्ति। परन्तु मनुष्येषु इयं क्षमता अर्थात् स्पष्टोच्चारणस्य क्षमता जन्मतः प्राप्यते। अतः ते स्पष्टवाचा स्व अभिप्रायं प्रकटयन्ति। विचारणीयः विषयः विद्यते यत्– मनुष्य सर्वप्रथमं शब्देन साकं अर्थस्य सम्बन्धः कथं स्थापितवानिति?

भाषोत्पत्ति विषयक अनेकेषां सिद्धान्तानां प्रचलनानन्तरमपि भाषायाः उत्पत्तेः सम्बन्धीः निश्चितं निर्णयात्मकम् उत्तरं न प्राप्तम् एतदर्थम् अयं विषयः भाषा–वैज्ञानिकैः भाषाविज्ञानक्षेत्रात् बहिर्निष्काषितः। षड्षष्ट्युत्तर अष्टादशशततमे (1866) वर्षे पेरिसदेशे भाषाविज्ञानस्य  ैवबपमजल जीम स्पदहनपेजपहनम

नाम्ना एकस्याः समितेः स्थापना अभवत। समितेः अधिनियमे निर्देश आसीत् यत् 'भाषायाः उत्पत्तिः तथा विश्वभाषायाः निर्माणम्' इति उभावपि विषयस्योपरि चर्चा नैव भविष्यति। अस्य बहिष्करणस्य मूलकारणं एतदेवासीत् यत्- भाषोत्पत्तिविषयकसिद्धान्तः अनुमानाश्रितः परन्तु विज्ञानम् तथ्याश्रितमेव। भाषायाः मूलरूपं अप्राप्यम् भवति। अतः भाषाविज्ञानं अस्मिन् क्षेत्रे असामर्थ्यम् प्रकट्य अयं च विषयः दर्शनस्य, मानवविज्ञानस्य, समाजविज्ञानस्य च विषय इति निरदिशन। वस्तुतः प्रसङ्गेऽस्मिन् भाषायाः उत्पत्ति विषये विविध वादा, सिद्धान्ताश्च लक्ष्यन्ते। यथा- (1) दिव्योत्पत्तिसिद्धान्तः (2) संकेतसिद्धान्तः (3) ध्वन्यनुकरणसिद्धान्तः (4) आवेगसिद्धान्तः (5) रणन्सिद्धान्तः (6) श्रम-ध्वनि-सिद्धान्तः (7) इंगिन-सिद्धान्तः (8) संपर्कसिद्धान्तः (9) संगीतसिद्धान्तः (10) प्रतीकसिद्धान्तः (11) समन्वयसिद्धान्तः (12) प्रतिभासिद्धान्तः इत्यादयः सिद्धान्ताः सन्ति।

स्थालिपुलकन्यायेन कतिपयसिद्धान्तानां विवरणं अत्र प्रस्तूयते-

दिव्योत्पत्तिसिद्धान्तः (क्पअपदम जेमवतल) -

मतमिदम् अतीव प्राचीनम। अस्य मतस्य कथनं विद्यते यत्- यथा परमात्मना सृष्टिः कृता, तथैव मानवानां कृते काचित् एका परिष्कृता भाषा निर्मिता प्रदत्ता च। अस्मिन् मते प्रत्येकस्मिन् कार्ये दैवी शक्तेः सत्ता विद्यते। सा च शक्तिः सृष्टेः आरम्भे वैदिकज्ञानं दत्तवती, यया मानवाः स्वकार्यकरणे समर्थाः अभवन। अनेन प्रकारेण वैदिकसंस्कृतभाषा आदिभाषायाः रूपं प्राप्तवती। अपौरुषेयः वेदः। वेदः ईश्वरेण विरचितः। प्रसङ्गेऽस्मिन् वेदोपनिषदादि तथा दर्शन स्मृतिग्रन्थादिषु बहुश प्रमाणं उपलभ्यन्ते-

देवी वाचमजयन्त देवास्तां विश्वरूपाः पशवो वदन्ति। (ऋग्वेद- 8-100-11)

तस्मात् यज्ञात् सर्वहुत ऋचः सामानिजज्ञिरे।
छन्दांसि जज्ञिरे: तस्माद् यजुस्तस्मादजायत।। (ऋग-10-90-9)

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम।
दुदोह यज्ञसिद्धयर्थम् ऋग्यजुः सामलभणम।। (मनुस्मृति-1/23)

सर्वेषां तु सा नामानि कर्माणि च पृथक् पृथक।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे।। (मनु. 1/21)

'इहउण' इति चतुर्दशः माहेश्वरसूत्राणि भगवान् शिवस्य डम्वरुनादेन उत्पन्न इति ज्ञायते। अत्रापि भाषा दिव्योत्पत्तेः सूचकः वर्तते।

वृत्तावसने नटराजराजो ननाद ढक्कां नवपञ्चवारम।

संस्कृतम् आदि भाषा विद्यते। सर्वे सम्प्रदायाः स्व-स्व भाषाम् आदि भाषा इति कथयन्ति। यथा- जैनेन बौद्धेन च अर्धमागधी पालिभाषां च, ईसाई जनाः यहूदी जनाः च हिब्रूभाषां, मुसल्लिमजनाः कुरानस्य भाषा अरबीभाषां आदि भाषा कथयन्ति। जर्मन् विद्वान् सुसमिल्श महोदयः भाषं दैवी उत्पत्तेः समर्थनं कुर्वन् कथयति- भाषा मानवकृत नैव अपितु परमात्मना प्राप्त उपहारं विद्यते।

संकेतसिद्धान्तः (।हतममउमदज जेमवतल)

अस्य सिद्धान्तस्य अपर नामो निर्णयवादः, स्वीकारवादः, निर्णयसिद्धान्तो वा वर्तते। अस्य

सिद्धान्तस्य मूल प्रवर्तक: अष्टादशशताब्द्या: प्रसिद्ध: फ्रेंच विचारक: रुसो महोदय: आसीत। अस्य प्रवर्तकस्य मुख्याभिप्राय: विद्यते यत्- प्रारम्भे मनुस्या: पशु शिरश्चालनादि आंगिकचेष्टया संकेतैर्वा स्वाभिप्रायं प्रकटयन्ति आसन। परन्तु अनेन माध्यमेन सर्वविधकार्यस्य सिद्धि: नैव संजात:। अत: ग्रामस्य मुख्या: सभाया: आयोजनं कृत्वा प्रति वस्तूनां नाम निर्धारणं कृतवन्त। एतत् सामाजिकनिर्णयम् अपि वक्तुं शक्यते। अनेन निर्णयेन ध्वन्यात्मकसंकेतस्य उत्पत्ति: अभवत् तथा तस्मात् भाष प्रादुर्भूता। प्रसङ्गेऽस्मिन् काव्यालंकारे भामह वदति-

इयन्त ईदृशा वर्णा ईदृगर्थाभिधयिन:।
व्यवहाराय लोकस्य प्रागित्थं समय: कृत:।। (काव्यालंकार- 6/13)

अर्थात् सृष्टे: आरम्भे लोकव्यवहाराय अयं च निर्णय: निर्णित: यत्- इयन्त वर्णा:, ते च क्रमश: स्थापनेन ईदृगर्थप्रतिपादने समर्था: भविष्यन्ति।

ध्वन्यनुकरणसिद्धान्त: (व्दवउंजवचवपब जेमवतल, ठवू-ठवू जेमवतल म्बीवपम जेमवतल) -

अनुकरणसिद्धान्त:, ध्वन्यात्मकानुकरणसिद्धान्त:, अनुकरणमूलकतावाद:, शब्दानुकरणवाद:, भो-भो वाद: इत्यादिभि: नामभि: अयं सिद्धान्त: सुपरिचित:। अस्य सिद्धान्तस्य अभिमतम् एवं वर्तते यत्- प्राकृतिकवस्तु तथा पशुपक्ष्यादिन: यया ध्वनि: निर्गच्छति तदनु तस्य वस्तुविशेषस्य नामकरणं भवति। यस्मात् पदार्थान् यथा ध्वनि: निस्सरति तदनु तस्य पदार्थस्य नामोऽपि तथैव भवति। इत्थं भाषाया: रचना अभवत। यथा- काँव-काँव ध्वनित: काक:, कू:-कू:ध्वनित: कोयल (पिक:) झर-झर ध्वनित: निर्झर, पट्-पट् ध्वनित: पटाखा आदय:। श्रावण प्रत्यक्षवत् चाक्षुष प्रत्यक्षाधरेणापि शब्दा: निर्मियन्ते। यथा- हिन्द्यां चमाचम, जगमग, चकमक इत्यादय:, ध्वन्यनुमूलक कतिपय नामानि वाल्ये बाला: आकारयन्ति परन्तु: सा च ध्वनि: क्रमश: प्रसिद्धिं प्राप्नाति। यथा- क्याऊँ कथनेन मार्जारस्य बोध: भों-भों कथनेन कुक्कुरस्य बोध: जायते।

न्वारे महोदयानुसारं एतादृशोभ्यो शब्देभ्यो भाषया: उत्पत्ति: अभवत् इति।

आवेगसिद्धान्त: (प्दजमतपमबजपवदवस जेमवतल, च्ववी-च्ववी जेमवतल)

मनोभावाभिव्यञ्जकतावाद:, मनोभावाभिव्यक्तिवाद:, मनोरागव्यञ्जकशब्द-मूलकतावाद:, पूह-पूह इत्यादय: अस्य सिद्धान्तस्य नामान्तराणि वर्तन्ते। अस्य सिद्धान्तस्य अयमेवाशय: वर्तते यत्- आदिकालत: मनुष्य स्वकीय हर्ष-शोक-विस्मय-भाय-घृणा-क्रोधदि भावान् प्रकटिकर्तुं शब्दस्य ध्वने: वा उच्चारणं कृतवानासीत् करोति च। क्रमश: सा च ध्वनि: भाषोत्पते: कारणं अभवत। उदाहरणं यथा- हर्षावेगवशात् मनुष्यस्य मुखात् अहो, आहा, वाह इत्यादि ध्वनय: स्वत: निर्गच्छति। तथैव क्रोधत् आ:, घृणावशात् छि:, धिक, इत्यादय: निर्गच्छन्ति। आवेगसूचकध्वनिनां प्रयोगेण प्रारम्भे मनुष्य: स्वकीय मनोभावान् प्रकटयन्ति आसीत। पुन: क्रमेण भाषाणशक्ते: विकास: अभवत। सा च शक्ति भाषोत्पते: कारण अभवत।

रणनसिद्धान्त: (क्पदह-कवदम जेमवतल) -

धातुसिद्धान्त:, अनुकरणमूलकतावाद: डिंग-डांग वाद: इति अस्य सिद्धान्तर अपर नामानि

वर्तन्ते। अस्य सिद्धान्तस्य मूल प्रवर्तकः प्लेटो। अस्य मतानुसारं शब्दार्थयोः कश्चन रहस्यात्मक-स्वाभाविक-सम्बन्ध विद्यते। कथनस्य अयमभिप्रायो यत् प्रकृतौ कश्चन सामन्य नियमो वर्तते यत् कमपि वस्तुविशेषम् यदा वयं नोदयामः तदा तस्मान् काचिन् मला विशेष ध्वनिर्निर्गच्छति। सा च ध्वनिः तस्य वस्तविशेषस्य विशेषता एव भवति। यथा लौहः, काष्ठम्, टिन्, कांच इत्यादिषु नोदनेन काचिन् एका विशेषध्वनिः निर्गच्छति सा च ध्वनिः रणननाम्ना परिचियने। इयं च रणनध्वनिः भाषा उत्पतेः कारणमिति अस्य सिद्धान्तस्य अभिमतम् वर्तते।

श्रम-ध्वनि-सिद्धान्तः (ल्व-ीम-ीव जेमवतल) -

श्रमायपहारमूलकतावादः आहोसित् यो-हे-हो इति अस्य सिद्धान्तस्य पर्याय पदानि वर्तन्ते। अस्य सिद्धान्तस्य मूलप्रवर्तकः न्वारे। अस्य अयमेव आशयः वर्तते यत् मनुष्यः यदा शारीरिकपरिश्रमं करोति तदा श्रमवशात् श्वासप्रश्वासे तिब्रता आयाति। परिश्रमे न केवलं मांसपेशादिषु बलं दीयते अपितु स्वरतन्त्रोषु संकोच-विस्तारः अपि परिलक्ष्यते। श्रम-जन्य ध्वनिः श्रमध्वनिः। इयं श्रमध्वनिः भाषोत्पत्तेः कारणं भवति।

इंगितसिद्धान्तः (ळमेजनतम जेमवतल) -

डार्विन् महोदयेन षड्भिः असंबद्धभाषाभिः साकं तुलनात्मकमध्ययनं कृत्वा इंगितसिद्धान्तं प्रतिपादतम्। भाषायाः विकासे चतुर्विध सोपानानि नितरां अपेक्षितानि। यथा- (1) भावाभिव्यंजकध्वनयः अर्थात् भय-क्रोध-हर्षादि अवस्थायाम् ध्वनिद्वारेण स्वकीय भावस्य प्रकटीकरणम्। (2) अनुकरणात्मकशब्दाः- अर्थात् पशुपक्ष्यादिनाम् मुखान् र्नित ध्वनेः अनुकरणेन शब्दरचना निर्माणम्। यथा कांव-कांव ध्वनितः काकः इति। (3) भावसंकेतः अथवा इंगितः- अर्थात् आंगिकसंकेतेन भावप्रकाशनम्। (4) सूक्षभावानां कृते शब्दाः।

अस्य वादस्य अयमेवाशयः यत् मानवः यदा किमपि कार्यं करोति तदा आङ्गिक चेष्टां प्रदर्शयति। यथा-चायः पानम्, जलपानम् इत्यादयः । आङ्गिक-चेष्टा इत्यत्र अङ्गश्चालनम्। जलं यदा पिवति तदा तस्मात् 'पा' इति ध्वनिः निर्गच्छति। अतः मानवः प्रारम्भे आङ्गिक चेष्टा करोति। पुनः आङ्गिक चेष्टया या च ध्वनिः निर्गच्छति तदनु तस्य नामकरणं भवति। उदाहरणं यथा- आदौ आरम्भे शिशुः यदा जलं पिवति तदा तस्मात् 'पा' इति ध्वनिः निर्गच्छति। तामेव ध्वनिं अनुकृत्य पुनः प्रारम्भे -'पानि' इति स्थाने 'पा' इति उच्चारणं करोति। पुनः भाषायाः विकासानन्तरं जलम्, वारि, अम्ब इत्यादिभिः नामभिः आकार्यन्ने इति इङ्गितसिद्धान्तस्य अभिप्रायः।

संपर्कसिद्धान्तः (ब्वदजंबज जेमवतल) -

अस्य सिद्धान्तस्य मूलप्रवर्तकः प्रसिद्धमनोवैज्ञानिकः जी. रेवेजमहोदयः। अस्य मतस्य कन्यम् इदं वर्तते यत्- मनुष्यः सामाजिकप्राणीः। सः समाजे निवसति। इतरैः सह संपर्क साधयातुं च एव। इयं संपकसाधेनजन्यं प्रवत्तिः जन्मसिद्धा एव। प्रतिव्यक्षिु इयं प्रवृत्तिः परिलक्ष्यते। अनया प्रवृत्त्या समाजस्य निर्माणं भवति। प्रारम्भे मानवाः बुभूक्षादिन् अभिव्यञ्जयितुं इंगित तथा मौखिकाभिव्यक्तेः साहाय्यं

स्वीकुर्युः।  तदानीं या च मौखिकध्वनिः निर्गता सा पुनः क्रमशः भाषारूपं धृतवती। आदौ अयं च संपर्कः भावस्तरेषु (म्दवजपवदंस ब्वदजंबज) स्थित्वा पुनः विकसितः सन् विचारस्तरं प्राप्तवान् स्यात् इति संपर्कसिद्धान्तस्य अभिप्रायः। उदाहरणं यथा– संपर्कत्वेन माता इति शब्दं स्वीकृत्य शिशु स्वीय मातरं हे माते! हे माते! इति आकारयति। अत्रा प्रारम्भिक शब्दस्य (माता) सम्बन्धः क्रियापदेन सह सम्बन्धितः भवति। अर्थात् माते इति पदात् हे माते! माम् दुग्धं पाययतु, जलंवा पाययतु इति अर्थः। अयं संपर्कसिद्धान्तः प्रारम्भे संपर्के स्थित्वा पुनः विकसितः सन् विचारस्तरं संप्राप्य परिष्कृतः भूत्वा भाषायाः रूपं स्वीकृतवती इति संपर्कवादिणाम् आशयः।

प्रतीकसिद्धान्तः (ैलउइवसपब जेमवतल) –

अस्य सिद्धान्तस्य मतानुसारं संयोगवशात् अथवा इतर अन्य सामान्य–सम्बन्धवशात् कस्यापि शब्दस्य केनापि अर्थेन साकं सम्बन्धः भवति, सः च शब्दः तस्यैव अर्थस्य प्रतीकः भवति। भाषाविज्ञानिनः एतादृशशब्दान् नर्सरी (छनतेमतल ॅवतक ) शब्दाः इति कथयन्ति। उदाहरणम् यथा–सम्बन्धशब्दाः माता, पिता, भ्राता भागिनी, आदयः। अत्र अधिकांशतः प्रारम्भिक ध्वनयः ओष्ठ्य वर्णाः भवन्ति। अतः सर्वविधभाषासु सम्बन्धवाचकाः शब्दाः पवर्गयुक्ताः भवन्ति। यथा हिन्द्याम्– पिता, माता, भाई, माता, मामी। आंग्लभाषायाम् –डवजीमत, थ्ंजीमत, ठतवजीमत आदि। जर्मनभाषायाम्– डनजजमत (माता), ठतनकमद (भ्राता), फ्रेंच भाषायाम् डमतम (माता) च्मतम (पिता), लैटिन भाषायां डंजमद (माता) आदयः। अतः प्रतीक एव भाषोत्पत्तेः कारणमिति एतेषां अभिप्रायः।

संविदाध्यापकः–
शिक्षाशास्त्राविभागः रा.सं.संस्थानम् (मा.वि.)
लखनऊ–परिसर–लखनऊ

# वैदिकसाहित्येषु मूल्यशान्तिस्थापनायाश्च विमर्शः

डॉ. रुद्रनारायणनरसिंहमिश्रः

संस्कृतसाहित्यस्य मूलाधारः साहित्यशास्त्रमस्ति। सहितस्य भावं साहित्यमितिविद्वद्भिरुक्तम्। साहित्यमितिपदं गुणवचनब्राह्मणादिभ्यः कर्मणि चेति, सहितयोश्शब्दार्थयोः भविः, हितेन सहितम् तस्य भावः इति वार्थे निष्पद्यते। साहित्याध्ययनकाले प्रथमक्षणे तन्निष्ठभावानां मनसा संनिकर्षो जायते, द्वितीयक्षणे च भावानां प्रकाशनं भवति। मनसि समागताः भावाः प्रकाशिताः सन्त एवं श्रोतॄणां काव्यपाठकानां वा लोकोत्तरामनुभूतिं जनयति। साहित्यमिदं त्यागशीलानां शान्तिप्रियाणां सत्यान्वेषकाणाम् ऋषीणां वचनानि सन्ति। मनुष्येषु यदि वैदिकसाहित्यं प्रति श्रद्धा भवेत् तर्हि कस्यचित् प्रकारस्य कल्याणस्य अभावः न भवेत्। अद्यत्वे भौतिकताया अन्धधावने यः कलहः, यत् कष्टं, या अशान्तिञ्चोत्पन्ना तत्सर्वम् अस्य साहित्यस्य विस्मरणादेव। सर्वशान्त्यै इदमेव साहित्यं शरण्यम्। अद्यतनसमाजे हिंसा, अनैतिकता, आतङ्कवादः, भ्रष्टाचारः, अत्याचारः, अराजकता, मूल्यानां ह्रासञ्च वर्धते। देशे सर्वत्रैव क्षेत्रवादः, भाषावादः, जातिवादः, धर्मान्धता, आर्थिकीविषमता, परस्परप्रतिवेशीदेशेषु समन्वयस्याभावः, न्यायपालिकायाः दौर्बल्यं नैतिकमूल्यानां ह्रासः प्रशासनस्य निष्क्रियत्वञ्चानुभूयते। वैज्ञानिकयुगेष्वस्मिन् मानवः अत्युच्चशिखरं स्पष्टयति परं कुत्रापि शान्तिः न श्रुतिपथमुपयाति। अद्यविज्ञानस्य दुरूपयोगेष्वपि अशान्तेर्मूलं प्रतिभाति।

यत्र शान्तेर्निवासस्तत्रैव सुखं, वैभवं, शिक्षा, उन्नतिः, कला-विकासः, धर्मचर्चा, संस्कृतिसमुदयः, सभ्यतोत्कर्षः, जीविकोपलब्धिः सौकर्यञ्च । हिंसा अराजकताद्यनैतिकव्यवहाराणां निर्मूलनं शान्तिशिक्षयैव कर्तुं शक्यते नान्यथा । शान्तिशिक्षयैव मानवः सत्यभाषणस्य, सद्व्यवहारस्य, भ्रातृत्वभावस्य, वसुधैवकुटुम्बकस्य, ईश्वरविश्वासस्य, परदुःखानुभवस्य, पारस्परिकविश्वासस्य, कर्तव्याकर्तव्यस्य च विवेकं लभते । अत एव समग्रराष्ट्रे शान्तिशिक्षा अनिवार्या स्यात्। शान्तिशिक्षा एका प्रक्रिया यस्यां ज्ञानस्य, कौशलानामभिवृत्तीनां मूल्यानाञ्च सम्बर्द्धनद्वार। बाल-युवक-प्रौढेषु चावश्यकव्यवहारपरिवर्तनमानीय वैयक्तिक- अन्तर्वैयक्तिक-समाजान्तर-राष्ट्रिय-अन्ताराष्ट्रियस्तरेषु प्रत्यक्षतया संरचनात्मकरूपेण च विवादानां हिंसानाञ्च निवारणार्थं शान्त्या संघर्षाणां समाधानार्थं शान्तिपूर्णस्थितिनां संरचनार्थञ्च यत्नः भवतीति युनिसेक इत्यस्य उद्घोषः । विद्यालयीयशान्ति शिक्षायै आगम्यमाणाः बालकाः सुशिक्षिताः भविष्यति। अतः वक्तुं शक्यते यत्- Schools are often the only institution that society can formally, intentionally and eñtensively use to achieve this mission- In other words, through its agencies objectives for peace education, prepare the curriculum, materials, outline guidelines for organizing the school climate, put on eñtracurricular programs, train teachers, instruct schools to carry out initiatives and oblige students to participate in

this Learning- (Bar&Tal] in Press)

यद्यपि विविधशैक्षिकव्यवस्थासु सर्वेषु राष्ट्रेषु विंशतिशताब्दितः अद्यावधिं यावत् शान्तिशिक्षायाः व्यवस्था परिदृश्यते, तथापि मुल्ययुक्त आदर्शेषु, उद्देश्येषु, पाठ्यक्रमेषु, विषयेषु, अभ्यासेषु च वैविध्यता दरीदृश्यते। विशेषतः मूल्यानि, अभिक्षमताः, विश्वासाः, कौशलानि व्यावहारिकमानसिकाभिवृत्तयः शान्तिशिक्षायाः उद्देश्यानि भवन्ति । अतः शान्तिशिक्षायां मूल्यस्य स्थानं सर्वोपरि वर्तते इति ज्ञायते । यद्यपि शास्त्रीयविषयेषु शान्तिशिक्षा नैतिकशिक्षा च परिव्याप्ता, तथापि समुचितविध्याभावात् छात्राः ग्रहितुम् अशक्ताः भवन्ति ।

संसारे सर्वे जनाः शान्तिमिच्छन्ति, सुखं शान्तिञ्च तदैव भवति यदा मनुष्यः सन्तुष्टो भवति। यत्किञ्चित् स्वकीयेन परिश्रमेण प्रयत्नेन च प्राप्नोति तत्रैव सुखानुभूतिकरणं सन्तोषम् इत्युच्यते। तत्रैव शान्तिर्निहिता वर्तते। पर्याप्तभौतिक-सुख-सामग्री सत्वेष्वपि मानवः मृगतृष्णिकामिव मायामनुसरन्तः अशान्त्या सदा दुःखितो भवति। शान्तिशिक्षयैव मानवः सत्यभाषणस्य परदुःखानुभवस्य, पारस्परिकविश्वासस्य कर्तव्याकर्त्तव्यस्य च विवेकं लभते। वेदेषु विश्वस्तरीयशान्तिस्थापनायाः अनुपालनीयोपायाः उपदिष्टाः सन्ति। तेषु केचन अत्र वर्णिताः-

- योगशिक्षया चित्तवृत्तीनां निरोधः।
- विश्वेषु परोपकारभावनायाः जागरणम्।
- विश्वबन्धुत्वभावनायाः जागरणम्।
- भौतिकसाधनैः सह आध्यात्मिकतायाः समावेशः।
- यमनियमानामनुपालनम्।
- सदाचारपालनम्।
- धनलोलुपतायाः त्यागः, सन्तोषस्य च ग्रहणम्।
- जनेषु राष्ट्रियभावनायाः जागरणम्।
- साम्राज्यवादस्य अधिनायकवादस्य च विरोधः।
- उद्योगपरायणता।
- भ्रष्टाचारादि कुरीतिनां निर्मूलनार्थं कठोरदण्डव्यवस्थायाः परिपालनम्।

विश्वे ज्ञानमन्दाकिन्याः प्रथमनिर्झरिणिरूपेण वेदा एव अस्मान् प्लावयामास। वेदः यद्यपि एकत्वेन पर्यवसितः आसीत्, तथापि प्रयोगवैविध्येन एते वेदाः नदनगादिभेदेन चातुर्विध्यं भजन्ते। तत्र वेदेषु समग्रमानवसंस्कृतेः कृते उपदेशः प्रदत्तः। ऋग्वेदस्य 'अग्निमीले पुरोहितम्' इति मन्त्रात् प्रारब्धोऽयं सम्पूर्णस्य पुरस्य हितमेव आशास्ते। एवमेव संगच्छध्वं, संवदध्वं, सं वो मनांसि जानताम् इत्यादि वदन्तः वेदमन्त्रः एकतायाः समुद्घोषं विदधाति। अयमेव वेदः सा प्रथमा संस्कृतिः विश्ववारा, इति कथयन् वैदिकसंस्कृतेः सार्वजनीनत्वं सर्वश्रेष्ठताञ्च परिप्रकाशयति। भारतीयवैदिकसंस्कृत्यान्तर्गते विश्वशान्तिः समाहिता भवति। अतः कपिलदेवेन प्रोक्तम्-

**सत्याहिंसागुणैः श्रेष्ठा विश्वबन्धुत्व शिक्षिका।**

**विश्वशान्ति सुखाधात्री भारतीया हि संस्कृतिः॥**

जगति सर्वेषां कृते समानाधिकारः भवेत्। न कश्चन ज्येष्ठः, न वा कनिष्ठः। सर्वेष्वप्यत्र भ्रातरः इति समानतायाः मूल्यं बोधयन् प्रोच्यते यत्–

**"अज्येष्ठासो अकनिष्ठास एते। सम्भ्रातसो वावृधुः सौभगाय॥"**

अपि च समानतायाः प्रचारः प्रसारश्च यथा सर्वत्र भवेत्, सर्वेषां कृते समानाधिकारः लभ्येत। तदर्थं प्रोच्यते– **"समानी प्रपा सह वो अन्न भागः। समाने योक्त्रे सह वो युनज्मि।**

**आराः नाभिमिवाभितः॥"**

समाजस्य उन्नत्यै विचारसाम्यं परस्परविभेदं निराकृत्य सामञ्जस्यमभीष्टमेव। तथोक्तम्–

**"समानी व आकूतिः समाना हृदयानि वः ।**

**समानमस्तु वो मनो यथा वः सुसहासति।"**

जगति जागरूकाणां धीमतामेव यशलाभः श्रीलाभश्च भवति। परिश्रमेणैव भूतिं विन्दते मानवः। सदाचारेणैव सर्वविधाभ्युदयः। तदुक्तम्– **"भूत्यै जागरणम् अभूत्यै स्वपनम्। कृधी न उर्ध्वान् चरथाय जीवसे उच्छ्रयस्वं महते सौभगाय॥"**

वेदार्थानुशीलनाद् ज्ञायते यत् वेदा एव ज्ञानविज्ञाननिधयः, भारतीयसंस्कृतेः आधारस्वरूपाः, मानवीयमूल्यानां संस्थापकाः जीवनोन्नतिसाधकाञ्च। तस्मात् वेदवर्णितमानवीयमूल्याधारितजीवनं यापनीयम्। चतुर्वर्गफलं मोक्षकामञ्च साधनीयम्। अतः भगवदिन्द्रस्य सविधे प्रार्थना क्रियते– हे भगवन्। दुष्प्रवृत्तिषु प्रचलन्ती मदीया मतिः सुप्रवृत्तौ रता भवतु। तदुक्तम्–

**"इदमिन्द्र शृणुहि सोमप यत्त्वा हृदा शोचता जोहवीमि।**

**वृश्चामि तं कुलिशेनेव वृक्षं यो अस्माकं मन इदं हिनस्ति॥"**

किञ्च– **"असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मा अमृतं गमय॥"**

पारिवारिकजीवने अभ्युदयश्चेत् सामाजिकीमुन्नतिमवश्यं समादयेत्। समाजस्य उन्नतौ परिवारः मुख्यो भवति। परिवारे समुन्नतिः नायाति चेत् समाजोन्नतिः कुतः? अतः परिवारिकोन्नतये मातृपितृसेवा, पत्युः आज्ञा पालनं चेष्यते। अनेन प्रकारेण वक्तुं समर्थो भवामः यत् वेदो हि समग्रज्ञानराशिरिति सर्वैः विव्दद्भिरूद्घोष्यन्ते। समस्यानामपाकरणाय मानवीयमूल्यानामावश्यकता न कदापि हेया। तस्मादाचारसञ्चारकः वैदिकसाहित्यमिति सर्वैः अङ्गीक्रियते।

**सन्दर्भः–**

1. पाणिनिसूत्रम्– 41.5/1/124 2. ऋग्वेदः, अग्निसूक्तम्– 1/1/1 3. यजुर्वेदः– 7/14
4. संस्कृतनिबन्धशतकम्, पृष्ठ सं.–175 5. ऋग्वेदः –5/60/5 6. अथर्ववेदः–3/30/6
7. ऋग्वेदः –10/191/04 8. अथर्ववेदः– 20/132,172 9. अथर्ववेदः–, काण्ड– 2/12/3
10. बृहदारण्यकोपनिषद्– 1/3/28

अतिथि अध्यापकः, रा.सं.सं. (मा.वि.) लखनऊ परिसरः,लखनऊ

संस्कृतसाहित्यस्य मूलाधारः साहित्यशास्त्रमस्ति। सहितस्य भावं साहित्यमितिविद्वद्भिरुक्तम्।

# परीक्षणस्यर प्रबन्धः, तस्य निर्माणञ्च

- डॉ. बि. वेङ्कट लक्ष्मीनारायणः,

'सा विद्या या विमुक्तये', 'शिक्षा नाम आत्मसाक्षात्कारः इति परिभाषया शिक्षा व्यक्तेः समाजस्य च निर्माता अस्ति। अखिलब्रह्माण्डे वैदिककालादद्यावधि समेषां मानवानाम् अध्यात्मिक-चारित्रिक-बौद्धिक- सामाजिकविकासमुन्नेतुं प्रकाशमाणञ्च कर्तु प्रभवति शिक्षा।

यः शिक्षाग्रहणं करोति सः शिक्षार्थी। शिक्षाग्रहणे शिक्षार्थी कियत् पर्यन्तं सफलो भवति, कियान् अधिगमो जातः, अग्रिमकक्षायाः कृते शिक्षार्थी योग्यः अस्ति न वा इति ज्ञानार्थ मूल्याङ्कनस्य आयोजनं भवति। तस्यैव अपरं नाम परीक्षा इत्यपि व्यवह्रियते।

प्राचीनकालादारभ्य अस्माकं देशे एव न अपितु सम्पूर्णविश्वे परीक्षायाः सञ्चालनादिकं विद्यते स्म। परीक्षायामेव परीक्षणमन्तर्भवति। अस्माकं शैक्षणिकसन्दर्भे परीक्षा-परीक्षणयोः अत्यधिकं महत्त्वमस्ति। वस्तुतः परीक्षा एतादृशी प्रक्रिया अस्ति यथा एकस्मिन् वर्षे छात्रेण कियती उपलब्धिः प्राप्ता, एवं तस्य व्यक्तित्वस्य योग्यतायाः अधिगमव्यवहारस्य च ज्ञानं भवति। यतो हि कदाचिदौपचारिक-अनौपचारिकतया च छात्रस्य गुणवत्तावर्धनाय अनेकानि परीक्षणानि सम्पद्यन्ते। परीक्षणं मौखिक-लिखितादिमाध्यमेन भवितुमर्हति। परीक्षणं नाम परेषाम् ईक्षणम् इति।

- मन् महोदयानुसारेण - "परीक्षणं एतादृशी परीक्षा अस्ति या कस्मिञ्चित् समूहे व्यक्तेः बुद्धिं, व्यक्तित्वम्, अभिक्षमताम्, उपलब्धिं च परिप्रकाशयति।"
- टायर्ल महोदयानुसारेण- "परीक्षणं सा मानकीकृतपरिस्थितिः अस्ति, येन व्यक्तेः प्रतिदर्शव्यवहारस्य निर्धारणं भवति।"

परीक्षणस्यायोजनं त्रैमासिक-षाणमासिक-वार्षिककादयरूपेण भवति। परीक्षणस्यायोजनात् पूर्वं तस्य सम्पूर्णप्रबन्धनमावश्यकता भवति।

परीक्षणस्य प्राक् सम्पूर्णप्रबन्धनमावश्यकमस्ति। परीक्षाक्षणस्य प्रबन्धने धातव्यांशा-

प्रशासनस्य कृते -परीक्षार्थिनः कृते -

- समितेः निर्माणम्।
- छात्राणां नामाङ्कनम्।
- प्रश्नपत्राणां निर्माणम्।
- परीक्षाकेन्द्राणां चयनम्।

- परीक्षायामुपवेशनस्य व्यवस्थायाः निर्माणम्।
- निरीक्षकानां चयनम्।
- आकस्मिकव्यवस्थायाः निर्धारणम् ।
- प्रवेशपत्रस्य प्रबन्धनम्।
- उत्तरपुस्तिकायाः प्रबन्धनम्।
- परीक्षाकेन्द्रे जलपानस्य तथा च बाल-बालिकानां कृते भिन्न शौचालयादीनां व्यवस्था।
- उत्तरपुस्तिकायाः परीक्षणमपि निष्पक्षतया भवेत्। इदम् अपि प्रशासनस्य कर्तव्यम्।
- प्रमाणपत्रस्य निर्माणं तथा च वितरणमपि परीक्षाप्रबन्धकस्य प्रशासनस्य च कार्यमस्ति।
- योजनायाः निर्माणम्।
- परीक्षोपकरणानां सञ्चयनम्।
- समयसारिण्याः निर्माणम्।
- विषयवस्तोः सङ्ग्रहणम्।
- समयप्रबन्धनम्।
- परीक्षावसरे दिवसानाम् अध्ययनाय प्रबन्धनम्।
- परीक्षारम्भतः अन्तपर्यन्तम् एकस्याः विशिष्टयोजनायाः निर्माणम्। यथा - सम्पूर्णपाठ्यवस्तोः अध्ययनस्य व्यवस्था।
- प्रातरुथाननियमस्य निर्माणम्। तदाधारेण समयचक्रस्य निर्माणम्।
- परीक्षायाः लेखनसमये समयस्यावधानम्।
- प्रश्नपत्रस्य पूर्णावलोकनम।
- सुस्पष्टं प्रदत्तप्रश्नानां समाधानलेखनम्।

लूथरगुलिकमहोदयेन प्रतिपादितप्रशासनस्य नियमानुसारेण POSDCORB परीक्षायाः प्रबन्धनं कर्तुं शक्यते -

P- Planning (योजना) परीक्षायाः सम्पूर्णयोजनायाः निर्माणम् छात्राध्यापकयोः कृते ।

O- Organization (सङ्गठनम्) परीक्षाप्रशासनसङ्गठनयोः समितेः (committee) निर्माणं करिष्यति। येन परीक्षाव्यवस्था स्पष्टा भवति। तथा च छात्राः अपि एकसङ्गठनस्य/समूहस्य(Group study) निर्माणं कुर्वन्ति येन समूहाध्ययेन विषयवस्तोः अवबोधः सम्यक् भविष्यति।

S - Staffing (कर्मचारीणां प्रबन्धनम्) परीक्षाप्रशासकः कर्मचारिणः आवश्यकतानुसारं प्रबन्धनं

कल्पयेत्। तथा च छात्राः अपि परीक्षावसरे समयस्य सदुपयोगार्थं रक्षणार्थं व्यवस्थां करिष्यन्ति।

D - Directing (निर्देशनम्) परीक्षाप्रशासनस्य कृते एकः निर्देशकः स्यात्। येन परीक्षाप्रबन्धे या न्यूनता स्यात् तस्य दूरीकरणं भवेत्। तथा च छात्राणां कृते अपि एकः निर्देशकः स्यात् यः परीक्षोपयोगिनिर्देशने समर्थः स्यात्।

CO - Co-ordination (समन्वयीकरणम्) परीक्षाप्रबन्धकेषु प्रशासनेषु कर्मचारिषु च समन्वयनः स्यात्। तथा च छात्राः अपि समन्वयनपूर्वकं परीक्षार्थं सन्नद्धतां कर्युः।

R - Reporting (प्रतिवेदनम्) इदं प्रशासनस्य कृते महत्त्वपूर्णमस्ति। परीक्षाप्रशासनं परीक्षानन्तरं केन्द्रियकार्यालये प्रतिवेदनं प्रस्तौति।

B - Budgeting (आर्थिकप्रबन्धनम्) धनं परीक्षाप्रबन्धस्य कृते महत्त्वपूर्णमस्ति। प्रशासनं धनव्ययस्य एकां योजनां निर्मीय तदाधारेण परीक्षायाः सञ्चालनं करोति।

- परीक्षणस्य केचन विशेषांशा:
- परीक्षणम् एकप्रकारकोपकरणं वर्तते।
- इदं परीक्षायाः एकं लघुरूपमस्ति।
- परीक्षणमेकस्य निश्चितसमयावधेः अनन्तरं वा पाठावधेः अनन्तरं भवति।
- छात्रैः प्राप्तकौशलसूचनयोः ज्ञानकरणम्।
- छात्राणाम् अधिगमस्य प्रभावशालीकरणम्।
- परीक्षणस्य निर्माणे सोपानानि –

1. परीक्षणस्यग निर्माणे योजनायाः प्रारूपम्।
2. परीक्षणस्यग प्रारम्भिकप्रारूपाणां निर्माणम्।
3. परीक्षणस्यग प्रारम्भिकप्रारूपाणां निरीक्षणम्।
4. परीक्षणस्यग अन्तिमप्रारूपनिर्माणम्।
5. परीक्षणस्यग मूल्याणङ्कनम्।

**1. परीक्षणस्यग निर्माणे योजनायाः प्रारूपम् –**

परीक्षणनिर्माणे सर्वप्रथमं कस्यापि परीक्षणस्यम सम्बरन्धे सुनिश्चितयोजनायाः निर्माणमावश्य कं भवति। परीक्षणस्योकद्देश्यंक किम्? परीक्षणस्यस स्वनरुपं किम्? परीक्षणस्यर भाषा का? परीक्षणस्य निर्माणं केषां कृते? परीक्षणस्यो प्रशासने तथा च जनसंख्यायिां केन प्रकारेण प्रतिदर्शनग्रहणं भविष्यचति? इत्यादिषु विषयेषु चिन्तषनमपेक्षितं भवति।

- परीक्षणनिर्माणे केचन महत्त्वपूर्णाः बिन्दिवः –

- परीक्षणस्योद्देश्यावनां निर्धारणम् – परीक्षणस्य रचना तथा योजनानिर्माणे च समस्यापनां तथा उद्देश्याषनां निर्धारणम् आवश्ययकं भवति। परीक्षणनिर्माणस्य् उद्देश्घ्यानां निर्धारणं स्व्यं परीक्षणनिर्माणकर्ता करोति। परीक्षणकर्ता परीक्षणस्यम उद्देश्यंद स्पाष्टघ्रूपेण लिखेत। परीक्षणस्यो उद्देश्यां संक्षिप्तंण स्पार्ष्टि तथा वास्त्विकञ्च भवेत्।
- विषय–वस्तूनां निर्धारणम् – परीक्षणस्यर यद्दुद्देश्यंय भवति तस्याषनुसारेण परीक्षणस्यल विषयोऽपि भवति। यथा – यदा परीक्षणकर्तुः उद्देश्यं १५ वर्षीयाणां बालकानां बुद्धिपरीक्षणं भवति तदा परीक्षणकर्ता विषयवस्तूनां निर्धारणसमये परीक्षणकर्त्ता बुद्धेः सम्बीन्धितानां केषां बिन्दूनां परीक्षणं करणीयम्। एवञ्च बुद्धेः सम्बनन्धितानां समस्तेप्रकाराणां च मापनं करोति।
- परीक्षणस्या रूपसम्बन्धादीनां निर्धारणम् – परीक्षणकर्ता विषयवस्तूनां निर्धारणं कृत्वाद परीक्षणस्यक योजनानुगुणं तस्यघ स्वूरूपं कथं भविष्यिति इति चिन्तरनं भवेत। शाब्दिकपरीक्षणं (Verbal Test), अशाब्दिकपरीक्षणम् (Non-Verbal Test) तथा च व्याक्तिगतपरीक्षणं (Individual Test) सामूहिक परीक्षणं (Group Test) इति चिन्तनं कृत्वा परीक्षणस्यग प्रयोगं विधिवत् कारयेत्।

**2. परीक्षणस्यत प्रारम्भिकप्रारूपाणां निर्माणम् –**

- परीक्षणस्यण निर्माणम्।
- परीक्षणस्यण पद–प्रश्ना नां प्रकारः।
- विशिष्टी्करणस्य– तालिका।
- पदानां रचनासमये अवधानम्।
- पदानां व्यावस्थावपनम्।
- परीक्षणस्या प्रशासनं निर्देशनञ्च।
- परीक्षणस्या फलाङ्कनम्।

**3. परीक्षणस्य प्रारभिकप्ररूपाणां निरीक्षणम् –**

परीक्षणस्यष प्रारभिकप्रारूपाणां निरीक्षणस्य् तात्पकर्य वर्तते यत् – परीक्षणस्यप पूर्णाध्यबयनम् (Pilot study of the test) परीक्षणस्यन प्रारम्भिकप्रारूपाणां निरीक्षणं मुख्यतः प्रकारत्रयेण भवन्ति–

- परीक्षणस्यम पदानां प्रश्नाननां निरीक्षणम्।
- परीक्षणस्यम प्रशासनानां निर्देशानां निरीक्षणम्।
- परीक्षणस्यम फलाङ्कनस्यं निरीक्षणम्।

**4. परीक्षणस्यस अन्तिमप्रारूपाणां निर्माणम्**

परीक्षणस्यी अन्तिमप्रारुपः प्रारम्भिकप्रारूपाणामाधारेण सम्भवति। परीक्षणस्यर प्रारम्भिकप्रशासनेषु अनन्तषरं

यथा आवश्य्कतानुसारेण पदानां संशोधनं कृत्वाय पदानां सांख्यिकीयविश्लेधषणमाध्यिमेन परिणामस्याीध ारेण परीक्षणस्यर अन्तिमप्रारूपस्य निर्माणं भवति।

## 5. परीक्षणस्या मूल्याङ्कनम्

परीक्षणस्यी मूल्यायङ्कने विश्वतसनीयता (त्मसपंइपसपजल), वैधता: (टंसपकपजल) विशेषरूपेण अर्न्तनिहिता: भवन्ति।

- विश्वयसनीयता - मनोविज्ञाने उत शिक्षाक्षेत्रे यत्र कुत्रापि परीक्षणं भवति तस्य प्रमुखा: विशेषता: परीक्षणस्यी "विश्वकसनीयता" भवति। विश्वतसनीयता परीक्षणस्यत आवश्यकगुणो भवति। यदि परीक्षणे विश्वतसनीयता न भवति तदा तस्य मापनपरिणामेऽपि विश्व्सनीयता न भवति। परीक्षणे प्राप्तांयका: विश्व सनीया: भवेयु:।

- वैधता - परीक्षणस्यश निर्माणसमये परीक्षणस्यि वैधता अपि सुनिश्चितं भवति। परीक्षणस्यण वैधताया: अभिप्राय: तस्य सत्यशता अस्ति। परीक्षणे शुद्धता तथा च प्रभावकता अपि स्यात्।

**सन्दर्भग्नन्थसूची -**


1. प्रो. जि. विश्वनाथप्पा, अभ्यसनं मदिम्पु(तेलुगु), नीलकमलपब्लिकेषन्स्, हैदराबाद् ।
2. श्रीमती अर्चना त्रिपाठी, अधिगम में आंकलन, राखी प्रकाशन प्रा. लि., आगरा।
3. डॉ. पुष्पा सैनी, डॉ. भारती शर्मा, अधिगम के लिए आंकलन, राखी प्रकाशन प्रा.लि. आगरा।



अतिथि अध्यापक:, रा.सं.सं. (मा.वि.) लखनऊ परिसर:,लखनऊ

# वाल्मीकिरामायणे सामाजिकचेतना

– मञ्जू त्रिपाठी

रामायणमस्माकं भारतीयानां मार्गदर्शग्रन्थरूपेणाखिल विश्वे विश्रुतं वर्तते। आदिकाव्योऽयमर्कवंशीय वाल्मीकिसुहृदयेन विरचितोऽस्माकीनामतने आदर्श इव राराज्यते। तत्राष्टदशविधानां वर्णमुपलभ्यते, नास्ति विषयेऽस्मिन् काचिद्विचिकित्सा ज्ञानमकरन्दलोलुपमधुकरवि चेतसि। सैव शिक्षा या मानवस्य सर्वविद्योत्कर्षकारिणी। अर्थाल्लोकमङ्गलदायिन्या सदालोकिककल्याणप्रदायिनी लोकाच्छाशास्त्राच्च लोकः प्रवर्तते।

अर्थात् प्राचीनकाले श्रेष्ठाजनाचरितानि एव कर्माणि शास्त्रोपदेशरूपतयाऽऽख्यातानि। यद्यपि शास्त्राणि श्रुतिस्मृत्यादीनि, तानि शास्त्रण्यनुकृत्य नरो लौकिकं पारलौकिकसुखमनुभवतिति मदानुभावानां शाश्तिकवचनम्। तत्रैवात्मबुद्धिं संयोज्य तदनुसारमेव मानवः स्व स्वधम्र वंशकुलाचारेण कार्य कुर्यादिति। धिया एव शास्त्राणि प्रादुर्भूतानि।

शिक्षयति या सा शिक्षा। याऽस्मानुचितानुचितं कर्त्तव्याकर्त्तव्यं बोधयति सा शिक्षा। विद्यायाः साधनाभूता शिक्षा। रामायणे लोकोपयोगिनीं शिक्षामधिकृत्येदं शोधपत्रं प्रस्तूयते।

रामायणे वर्णितशिक्षाया आदर्शमानवानां शारीरिक-बौद्धिक-भाषायिक-सामाजिक- नैतिक-राजनैतिकादि समस्तानां विकासो भवितुमर्हति। कस्यच्चिद्देशस्य संस्कृतेस्तद्वि- भिन्नयुगानामाचर-विचारपरम्परोद्भूतैक भूषणयुक्तस्थितेद्योतका वर्तते। विश्वेऽस्मिन् प्राचीनार्वाचीनानेकाः संस्कृतयो विद्यन्ते, किन्तु तासु सर्वासु संस्कृतिसु भारतीयसंस्कृतरनपमं सर्वोच्चञ्च स्थानं विद्यते। एनां संस्कृतिं पौरपाश्चात्याः सर्वेऽपि स्वीकुर्वन्ति। भारतीयसंस्कृततेनिर्वाहकरूपं रामायणमेकं देदीप्यमान रत्नमिव। यस्यादर्शप्रभा सम्पूर्णेऽपि भारते दरीदृश्यते तदनुपालनमखिलोऽपि भारतीयसनातनपरम्परावल्म्बिजनो करोति। तेनैवास्माकं सन्मार्गदर्शनं च भवतिं वाल्मीकिरामायणे जीवनस्य प्रत्येकस्मिन् सम्बन्धे एतदादर्शतत्त्वस्य व्यवहारिकी स्थापना दृश्यते। श्रद्धाभक्तिसुदृढमातृपुत्रयोस्सम्बन्धस्नेहश्लेषसंकुलवंशपरम्परादर्शसम्बन्धादयः तत्र केशलेन्द्रतनयायाः विमात्र्यदर्शो ध्वस्तो दृश्यते, परन्तु परिणामवस्थायान्महदपयोगीत रामचन्द्रेण स्वविनयोज्ज्वलशौर्यपराक्रममर्यादिभिर्यद्विहितन्तत्सर्वमिहलोकहितकरमनुकारकाञ्च तेनैव तस्मादर्शत्वं स्वतस्सिद्धम्।

कैकेयै क्रुध सन् दशरथो सकैकयीभरतमत्यजेत् तस्माच्च तस्य स्वर्गवासोऽभूत इति सर्वलोकविदितमेव। लङ्काविजयानन्तरं नागलोकादागतं दशरथं याचते यत्तत्प्रदतशापं कैकेयीं मा स्पृर्शायेत्–

**सुपुत्रां त्वां त्यजायीति यदुक्ता कैकेयी त्वया।**
**स शापः केकयीं घोरः सुपुत्रां न स्पृशेत् प्रभो।।**

साम्प्रतिक भौतिकवादियुगे भरतसदृशः भ्रातऽन्वेषणं कुर्मा तथापि न दृश्यते यतोहि दुःखपरिपूर्णं राममनुकृत्य चतुदर्शवर्ष यावद्वनवासीव स्वजीवनं यापितवान् तथापि लोकैः सर्वथाऽनुकरणीयमेव।

**ददर्श भरतं दीनं कृशमाश्रमवासिनम्**
**जटिलं मलदिग्धाङ्गं भ्रातृव्यसनकर्शितम्।**
**निपतं भवितात्मानं ब्रह्मर्षिसमतेजसम्**
**पादु ते पुरस्कृत्य प्रशासन्तं वसुंधराम्॥**

भारतीयनिर्मलोतुङ्गतनया गङ्गेवनिर्मल ऋषिज्ञानपरम्परया समाजस्य विभिन्नोपयोगिनीं कार्यप्रणालीमवलोक्य चातुर्वण्यस्य स्थापना कृता वेदेषु तत्सर्व वाल्मीकिरामायणे प्राप्सते। समाजिकैक्यदृष्ट्याऽयं विभाजनक्रमः सर्वप्राणिहितकर आसीत् तदानीम्। प्राणिषु सद्भाव आसीत् स्व-स्व कुलवंशपरम्परोचितकर्मस्वभिरता आसन्मानवाः अत्रादि काव्ये चतुर्णा वर्णानामुल्लेखः तेषां कर्त्तव्यानि च निरूपितानि सन्ति-

**दशरथराज्यकाले वेदानुप्रमाणितेनराजकार्येण सुशासनेन च**
**सर्वेषां प्राणिनां पालनं पोषणं दण्डिविधानञ्च भवतिस्म।**

यथा- **वर्णेष्वग्र्यचतुर्थेषु देवतातिथिपूजकाः।**
**कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः॥**

दशरथस्य पुत्रेष्ठियागे पुरोहित विशिष्ठादेशेन सर्ववर्णानां सत्कारो विहितः -

**दातव्यमत्रं विधिवत्सकृत्य न तु लीलया**
**सर्वे वर्णा यथ पूजां प्राप्नुवन्ति सुसतकृता।**

रामराज्येऽपि चातुर्वर्ण्यो लोभरहितः सन् स्वकार्यं करोति स्म।

**ब्राह्मणः क्षत्रियः वैश्याः शूद्रा लोभविवर्जिता।**
**स्वकर्मसु प्रवर्तन्ते तुष्टाः स्वैरेव कर्मिभिः॥**

अयोध्यामधिवसन्ताः क्रमशोः ब्राह्मण-क्षत्रिय-वैश्य-शूद्रजातीय जनाः स्व स्वकर्मानुसारं कार्यं कृत्वा सुखमनुभवन्ति स्म।

यथा रामायणे- **क्षत्रं ब्रह्ममुखं चासीद् वैश्याः क्षत्रमनुव्रताः।**
**शूद्राः स्वकर्मनिरतास्त्रीन् वर्णानुपचारिणः॥**

अर्थात् क्षत्रियब्रह्मवचनानुसारं क्षत्रीयधर्मस्य पालनं, वैश्या तद्राजधर्मानुसारं धनार्जनं शुद्राश्च सेवाकार्य कुर्वन्ति स्म। महर्षिवाल्मीकिना ब्रह्मज्ञानोन्मुखाः तपोलीनाः सत्यस्वाध्यायवचननिरताः ब्राह्मणाः सर्वश्रेष्ठा इति प्रतिपादिता। तत्रेदिभय- संयमाध्ययन-परायण-दानशीलता-विनम्रता ईर्ष्याभावरहित-बुद्धिमत्त-यज्ञदक्षतादयो गुणाः ब्राह्मणेषु आसन्निति प्रागल्भगिरा प्रोवाच।

यथा- **स्वकर्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः।**
**दाना ययनशीलश्च संयताश्च प्रतिग्रहे॥**

श्रेष्ठतागुणविशेषादेव ब्राह्मणोऽमात्यादिषु पदेषु नियुक्तो भवतिस्म। भूपतिर्भूसुरस्य यथायोग्यं

सम्मानं करोति स्म। दशरथस्य राजभवने समागतस्य पुरोहितवशिष्ठस्य सर्वे समुत्थाय समादरेण सभाजयन्ति-

**तमागतभिप्रेक्ष्य हित्व राजासनं नृपः। पप्रच्छं स्वमतं तस्मै कृतमित्यभिवेदयत्॥**

**तेन चैव तदा तुल्यं सहासीनाः सभासदः। आसनेभ्यः समुत्तस्थुः पूजयन्तः पुरोहितम्॥**

महाराजदशरथस्य मृत्युकाले चतुर्षु पुत्रेष्वेकोऽपि नासीद्रयोध्यायाम्। तत्समये सर्वे मन्त्रिभिर्ब्रह्मनिष्ठाचार्य वशिष्ठोऽधिकृतो यदस्यानुसारेणैव श्रेष्ठजनो राजपदमलङ्कृतरिष्यतीति। यथा रामायणे- **स नः समीक्ष्य द्विजवर्य वृत्तं नृपं विना राष्टथरण्यभूतम्।**

**कुमारमिक्ष्वाकुसुतं तथान्यं त्वमेव राजानमिहाभिषेचय॥**

वस्तुतः स्वगुणैः पूज्यः आसीहत् ब्राह्मणः।

भारतीयवैदिकवर्णव्यवस्थां ब्राह्मणवर्णानन्तरं क्षत्रियवर्णस्य क्रमः समागच्छति। क्षत्रियो स्वपराक्रमादिगुणैस्माकं दान-यज्ञ देहत्यादिगुर्णैः नृपपदप्राप्तनुनन्ति स्म।

**इदं हि वृत्तमुचितं कुलस्यास्य सनातनम्।**

**दानं दीक्षा च यज्ञेषु तनुत्यागो मृधेषु हि॥**

रमोवनप्रस्थानकाले बहुमूल्याभरणानि ब्राह्मणेभ्यः अददात्।

**ब्राह्मणेभ्यश्च रत्नानि भिक्षुकेभ्यश्च भोजनम्।**

**देहि चाशंसमानेभ्यः संत्वरस्व च मा चिरम्॥**

तत्कालीनवैदिकपरम्परानुसारेण संस्कृत्यनुसारेण च क्षत्रिय बाल एव राजपदमधितिष्ठति स्म। चित्रकूट पर्वते वनागतः रामो यथा प्रार्थितो भरतेन-

**एष हि प्रथमो धर्मः क्षत्रियस्याभिषेचनम्**

**येन शक्यं महाप्राज्ञ प्रजानां परिपालनम्॥**

इत्थं रामायणेऽनेकप्रकारकाः समाजोपयोगिन्यो विद्या शिक्षा वा समाहितास्सन्ति तेषं सन्निकर्ष व्याख्यानं सम्पूर्णे शोधपत्रे प्रदास्यते मया।

1. वाल्मीकिरामायणे युद्धकाण्डे - 119.25
2. वाल्मीकिरामायणे युद्धकाण्डे - 125.30-32
3. वाल्मीकिरामायणे बालकाण्डे - 6.17
4. वाल्मीकिरामायणे बालकाण्डे - 13.14
5. वाल्मीकिरामायणे युद्धकाण्डे - 128.104
6. वाल्मीकिरामायणे बालकाण्डे - 6.19
7. वाल्मीकिरामायणे बालकाण्डे - 6.13
8. वाल्मीकिरामायणे अयोध्याकाण्ड - 5.23-24
9. वाल्मीकिरामायणे अयोध्याकाण्ड- 67.38
9. वाल्मीकिरामायणे अयोध्याकाण्ड -40.7
11. वाल्मीकिरामायणे अयोध्याकाण्ड-30.43-45
10. वाल्मीकिरामायणे अयोध्याकाण्ड - 106.19

- शोधच्छात्रा, साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
विशालखण्डः-4, गोमतीनगरम्, लखनऊ-226010

# वाल्मीकिरामायणे प्रकृतिचिन्तने गङ्गा

– बृजेश चन्द्र उपाध्यायः

श्रीमद्वाल्मीकिरामायणं पुराणेभ्यः प्राचीनमिति सर्वजनविदितमेव। रामायणे प्रकृत्याः वृहद्चिन्तनं प्राप्यते। मानवजीवने प्रकृत्याः महद् योगदानं वर्तते। मनुष्यः प्राकृतिकजीवः अस्ति। प्रकृतिचिन्तनप्रसङ्गे भूतले गङ्गायाः विशिष्ट स्थानं अस्तीति जानीमो वयम्। इति मनसि निधाय सम्प्रति गङ्गायाः या स्थितिर्वर्तते शोधशीर्षकोऽयं सर्वथा योग्यः। सर्वेषु पुराणेषु रामायणकथाऽपि दृश्यते। श्रीमद्रामायणमपि प्राचीनकथासम्बन्धीति पुराणमेव भवति। अतः श्रीमद्रामायणे वर्तमानगङ्गायाः कथा सर्वप्रथमं उदाहार्या एव। बालकाण्डे पञ्चत्रिंशत् सर्गादारभ्य चतुश्चत्वारिंशत् सर्गपर्यन्तं दशसु सर्गेषु (२८२ श्लोकेषु) एषा कथा प्रतिपादिता। तत्र सप्तत्रिंशे सर्गे कुमारोत्पत्तौ गङ्गाया प्राधान्यं दर्शितम्।

विश्वामित्रो यागरक्षार्थं रामलक्ष्मणौ निनाय। यज्ञरक्षानन्तरं तौ मिथिलां नीतवान्। मार्गमध्ये तौ इमां कथां जगाद। पञ्चत्रिंशे सर्गे उमागङ्गावृत्तान्तः सङ्क्षिप्ततया वर्णितः। एकां रात्रिं ते शोणाकूले विश्रान्ताः। पुनः प्रभाते प्रस्थिताः। ततोऽर्धदिवसे दूरमध्वानं गत्वा ते गङ्गातीरं प्रापुः। ततः कार्याणि कृत्वा रामो विश्वामित्रं गङ्गावृत्तान्तं पृष्टवान्। एवं रामेण चोदितो विश्वामित्रो गङ्गायाः जन्म, वृद्धिं च वक्तुमुपचक्रमे। उत्तरेण (भारतदेशस्य उत्तरदिग्भागे) भारतवर्षे हिमवान् नाम पर्वतो वतर्ते। मेरोर्दुहितरं मेनां हिमवान् उपयेमे। मेनाहिमवतोर्ज्येष्ठा सुता गङ्गा नाम्ना प्रसिद्धा! द्वितीय उमा। देवीं गङ्गां देवाः सुरकार्यचिकीर्षया हितवन्तं प्रार्थयित्वा दिवं निन्युः।

अथ ज्येष्ठां सुराः सर्वे देवकार्यचिकीर्षया।
शैलेन्द्रं वरयामासुर्गङ्गां त्रिपथगां नदीम्।।
ददौ धर्मेण हिमवांस्तनयां लोकपावनीम्।
स्वच्छन्दपथगां गङ्गां त्रैलोक्यहितकाम्यया।।

देवाश्च गङ्गामादाय कृतार्थाः दिवं जग्मुः। षट्त्रिंशे सर्गे उमामाहात्म्यं वर्णितम्। परञ्च तस्यैव सर्गस्यान्ते गङ्गाया प्रभावं वक्ष्यमीति विश्वामित्रोक्तः श्लोकः वर्तते।

सप्तत्रिंशे सर्गे कुमारोत्पत्तिर्निरूपिता। एकदा सर्वे देवाः ब्रह्माणं शरणं गत्वा ''योग्यं सेनापतिम् अस्मभ्यं देहि'' इति प्रार्थयामासुः। ततः प्राक् ब्रह्मा सेनापतिं शिवस्य पुत्रं नो दास्यामि इति वाचं ददौ। शिवोऽपि हिमालये तपश्चरति स्म। अतो देवाः पुनः ब्रह्माणमुपगम्य एवम् ऊचुः। परमेश्वरो हिमवति तपश्चरति। इदानीं कर्तव्यमाज्ञापय इति ब्रह्मा तान् अब्रवीत्। ततः प्राग् ईश्वरेण पार्वत्याम् उत्सृष्टं वीर्यं श्वेतपर्वतरूपेण तिष्ठति। मया उक्तं मोघं न भविष्यति। ज्येष्ठा हिमवतः पुत्री गङ्गा तद्वीर्यं वोढुं प्रभवति। ''तद्वीर्यं गङ्गां प्रापयत'' इति ब्रह्मणा आदिष्टाः देवाः तदर्थं अग्निं नियोजयामासुः। अग्निरपि

गङ्गां अभ्येच्य देवकार्यं निवेदितवान्। गङ्गापि दिव्यं रूपं धृत्वा गर्भिणी जाता। पुनः समग्रेण सोढुम् अशक्ता बहुधा क्षुप्तवती। पुनश्च अग्निम् एवं जगाद्। नाहं समग्रं यत्तद्वीर्यं वोढुं शक्तास्मि। अतो मया विक्षिप्तं अग्निरपि गङ्गायाः वचः श्रुत्वा पुनरेवमुक्तवती। हिमवतः पादे इमं गर्भं निधेहि इति। गङ्गापि तथा कृतवती। सुवर्णरूपं तद्वीर्यं हिमवति सर्वत्र व्याप्तम्। तत्तेजसा शुद्धं तद्भागः पञ्चधा बभूव। तेषु हिरण्यं धरणीं प्राप्तम्। एवं तस्य तीक्ष्णभावेन ताम्रं, कृष्णायः च जातम्। पुनश्च परिशिष्टं मलं त्रपुः, सीसकञ्च अभवत्। एवं लोहादयो धातवः तस्मादेव वीर्याज्जाताः। एवं गङ्गायाः कुमार उत्पन्नः। तं च कृत्तिकाः षट् संवर्धयामासुः। अतः कुमारो गाङ्गेयः इति नाम्नाऽपि विख्यातः।

ततो गङ्गायाः प्रभावञ्च विश्वामित्र एवमुक्तवान्। अष्टात्रिंशे सर्गे सगरस्य कथा विद्यते। इक्ष्वाकुवंशे सगरो नाम राजा आसीत्। तस्य द्वे भार्ये केशिनी सुमतिश्चेति। स च अनपत्यो हिमवति वर्षशतं तपश्चचार। तस्य तपसा प्रसन्नो मुनिः सगराय वरं ददौ। एका वंशस्य कर्त्तारं पुत्रं जनयिष्यति, द्वितीया षष्ठिसहस्राणिपुत्रान् जनयिष्यतीति। केशिनी वंशकरं पुत्रं वव्रे। द्वितीया षष्ठि- सहस्रपुत्राणां माता बभूव। केशिनीसुतस्य नाम असमञ्जः, सः हिंसापरायणः क्रूरश्च बभूव। असमञ्जसस्य पुत्रः अंशुमान् सर्वोत्तमः। एकदा सगरः अश्वमेधयष्टुमुत्सुको जातः।

एकोनचत्वारिंशत्सर्गे सगरपुत्राणां वृत्तन्तं वर्णितम्। सगरपुत्राः यागाश्वरक्षकाः यागाश्वमनुसृत्य गताः। इन्द्रो राक्षसरूपेण यागाश्वं जहार। सागरा इन्द्रम् अनुधावितवन्तः। सोऽपि मायया पातालं प्रविष्टः। ततः तमन्वेष्टुं (सागराः) सागरपुत्राः भूमिं विदारयामासुः। एकैकेन एकं योजनमिति योजनानां षष्ठिसहस्राणि निखातानि। ततः तन्मितो गर्तो बभूव। देवा अपि खननवृत्तान्तं ब्रह्माणं निवेदयामासुः। ततो ब्रह्मा तानेवं जगाद। कपिलरूपिणा नारायणेन भूः रक्षिता भविष्यतीति ततः पुनः पित्राज्ञया तिस्रः दिशो गत्वा प्रत्येकं दिशि षष्ठिसहस्रयोजनमितान् गर्तान् निचख्नतुः। सागराश्च भूमिं भित्वा पातालं गत्वा यागाश्वम् अदृष्ट्वा कपिलाश्रमं जग्मुः। अयमेव अश्वस्य हर्ता इति कपिलं पराभूय कपिलेन भस्मसात् कृताः। असमञ्जसस्य पुत्र अंशुमान पातालं गत्वा कपिलं प्रसाद्य यागाश्वं लेभे। किन्तु पितॄव्याणां सलिलक्रियाः कर्तुम् अलब्धः सलिलः चिन्तापरो बभूव। ततः पितॄणां मातुलो वैनतेय अंशुमतं दृष्टवान्। ततो वैनतेयोऽशुमन्तम् एवं जगाद। एते ते पितरः कपिलकोपाग्निना दग्धाः। अतो लौकिकेन सलिलेन एषा निवाप दानं न तेषां पुण्यलोकगतिकारणं भवति। यदि शक्नोषि गङ्गामानीय एतान् तर्पय इति। (एष वैनतेय आदेशः) गङ्गायाः प्रभावनिरूपक श्रीमद्रारामायणस्थाः श्लोकाः यथा तथैव उदाह्रियन्तेऽत्र-

विसार्य निपुणां दृष्टिं ततोऽपश्यत् खगाधिपम्।<br>
पितॄणां मातुलं राम सुपर्णमनिलोपमम्।।<br>
स चैनमब्रवीद्वाक्यं वैनतेयो महाबलाः।<br>
मा शुचः पुरुषव्याघ्र वधोऽयं लोकसम्मतः।।<br>
कपिलेनाप्रमेयेण दग्धा हीमे महीबलाः।<br>
सलिलं नार्हसि प्राज्ञ दातुमेषां हि लौकिकम्।।<br>
गङ्गा हिमवतो ज्येष्ठा दुहिता पुरुषर्षभ।

तस्यां कुरु महाबाहो पितॄणां सलिलक्रियाम्।।
भस्मराशिकृतानेतान् प्लावयेल्लोकपावनी।
तया क्लिन्नमिदं भस्म गङ्गाया लोककान्तया।।
षष्ठि पुत्रसहस्राणि स्वर्गलोकं गमिष्यति।
निर्गच्छश्वं महाभाग संगृह्य पुरुषर्षभ।।

एषा कथा एकचत्वारिंशत् सर्गपर्यन्तं प्राप्यते। द्विचत्वारिंशे सर्गे भगीरथप्रयत्नः वर्णितः। सगरः तपसे उद्यमं न चकार। त्रिंशद्वर्षसहस्राणि  राज्यं कृत्वा दिवं गतः।

अंशुमानपि स्वपुत्रे दिलीपे राज्यभारं निक्षिप्य तपश्चचार। द्वात्रिंशत् सहस्राणि  वर्षाणि तपः तप्त्वा दिवं ययुः। दिलीपः पितुस्सङ्कल्पं पूरयितुं चिन्तापरोऽपि तपसे न गतवान्। दिलीपस्य पुत्रो भगीरथोनपत्यः प्रजाकामो मन्त्रिषु राज्यभारं निक्षिप्य त्रिंशद्वर्षसहस्राणि तपः चचार। ततः (पितामहः) ब्रह्मा प्रत्यक्षीभूय वरं दास्यामीति अवदत्। सोऽप्येवं वरं वव्रे। सगरस्यात्मजास्सर्वे मया दत्तं सलिलम् आप्नुयुः। एतेषां भस्म गङ्गायाः सलिलेन आप्लुतं भवतु। एते च स्वर्गं गच्छेयुः। इक्ष्वाकुवंश-हानिर्नभवेदिति मह्यमपि सन्ततिर्देया। ततो ब्रह्मा एवं जगाद-

इयं हैमवती ज्येष्ठा गङ्गा हिमवतः सुता।
तां वै धारयितुं राजन् हरस्तत्र नियुज्यताम्।।
गङ्गायाः पतनं राजन् पृथिवी न सहिष्यते।
तां वै धारयितुं राजन् नान्यं पश्यामि शूलिनः।।
तमेवमुक्त्वा राजानं गङ्गां चाभाष्य लोककृत्।
जगाम त्रिदिवं देवैः सह सर्वैर्मरुद्गणैः।।

त्रिचत्वारिंशत् सर्गे गङ्गावतरणं वर्णितम्। ब्रह्मणः आदेशमनुसरन् भगीरथः शिवमुद्दिश्य संवत्सरं निराहारमवलम्ब्य तपश्चचार। ततः शिवः प्रत्यक्षीभूय गङ्गां धारयिष्यामीति वरं ददौ। गङ्गापि धारावेगेन शङ्करमपि पातालं नीत्वा सुखिनी भवामि इति कृतावलेपा महता वेगेन शिवशिरसि पतिता। तस्याः गर्वेण कुपितः शिवो तां जटाजूटे बबन्ध। गङ्गापि अलब्ध निर्गमा अनेकवर्षाणि हरजटाजूटे एव वसतिं चक्रे। गङ्गामदृष्ट्वा भगीरथः पुनः तपश्चचार। ततः प्रसन्नेन शङ्करेण गङ्गाजटाजूटाद् विसृष्टा। विसर्जनकाले सा बिन्दुसरसि पपात। तदानीं तस्याः सप्तस्रोतांसि अभवन्।

१. ह्लादिनी  २. पावनी
३. नलिनी इत्येताः तिस्रः नद्यः प्राची दिशं जग्मुः।
४. सुचक्षुः  ५. सीता
६. सिन्धु इत्येताः तिस्रः नद्यः प्रतीचीं दिशं जग्मुः।
७. अलकनन्दापरं नाम गङ्गा भगीरथमनुजगाम। साप्यलकनन्दा महता संरम्भेण भगीरथमनुजगाम। अत्रान्तरे गङ्गा जह्नोः आश्रमं यज्ञवाटञ्च संप्लावयामास। ततः कुपितो मुनिः सर्वा नदीं पीतवान्। पुनर्भगीरथेन प्रार्थितो विसृष्टवान् च। जह्नोः श्रोत्रात् सा निर्गता। अतो जह्नुसुता गङ्गा जाह्नवीति

कीर्तिता।

चतुश्चत्वारिंशे सर्गे सगरपुत्राणामुत्तमा गतिर्गङ्गायाः नाम्ना निरुक्तिश्च वर्णिता।

इयं च दुहिता ज्येष्ठा तव गङ्गा भविष्यति। त्वत्कृतेन च नाम्नाथ लोके स्थास्य विश्रुता।।

गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च। त्रीन् पथो भावयन्तीति तस्मात् त्रिपथगा स्मृता।।

श्रीमद्रामायणे अयोध्याकाण्डे चतुःपञ्चाशे सर्गे गङ्गायमुनाप्रवाहसङ्गमहत्त्वं वर्तते। अयोध्यायाः रामो दक्षिणां दिशं प्रतस्थे। अयोध्यायाः प्रस्थितः प्रथमे दिने रामः गङ्गामेव दृष्टवान्।

तत्र त्रिपथगां दिव्यां शीततोयामशैवलाम्।
ददर्श राघवो गङ्गां पुण्यामृषिनिषेविताम्।।

ततो गङ्गां तीर्त्वा गुहेण सत्कृतः तां रात्रिं तत्र निनाय। द्विपञ्चाशे सर्गे पुनर्गङ्गां तीर्त्वा कञ्चिद्दूरं गत्वा भारद्वाजाश्रमं गन्तुं प्रवृत्तो गङ्गायमुनयोः सङ्गमक्षेत्रं प्रयागम् आगतवान्। तस्मिन्नेव तीरे भारद्वाजाश्रमो वर्तते। अद्यापि भारद्वाजाश्रमं नाम्ना स्थानमेकं प्रयागे प्रसिद्धम्। तत्र नवभिः श्लोकैः गङ्गायमुनयोः सङ्गमं प्रयागक्षेत्रमुपवर्णितम्।

ते तु तस्मिन् महावृक्षे उषित्वा रजनीं शुभम्। विमलेऽभ्युदिते सूर्ये तस्माद्देशात् प्रतस्थिरे।।

यत्र भागीरथीं गङ्गां यमुनाभिप्रवर्तते। जग्मुस्तं देशमुद्दिश्य विगाह्य सुमहद्वनम्।।

ते भूमिभागान् विविधान् देशांश्चापि मनोहरान्। अदृष्टपूर्वान् पश्यन्तस्तत्र तत्र यशस्विनः।।

यथा क्षेमेण सम्पश्यन् पुष्पितान् विविधान् द्रुमान्। निर्वृत्तमात्रे दिवसे रामः सौमित्रिमब्रवीत्।।

प्रयागमभितः पश्य सौमित्रे धूममुत्तमम्। अग्नेर्भगवतः केतुं मन्ये संनिहितो मुनिः।।

नूनं प्राप्ताः स्म सम्भेदं गङ्गायमुनयोर्वयम्। तथाहि श्रूयते शब्दो वारिणोर्वारिघर्षजः।।

दारूणि परिभिन्नानि वनजैरुपजीविभिः। छिन्नाश्चाप्याश्रमे चैते दृश्यन्ते विविधा द्रुमाः।

धन्विनौ तौ सुखं गत्वा लम्बमाने दिवाकरे। गङ्गायमुनयोः सन्धौ प्रापतुर्निलयं मुनोः।।

रामस्त्वाश्रममासाद्य त्रासयन् मृगपक्षिणः। गत्वा मुहूर्तमध्वानं भरद्वाजमुपागमत्।।

निष्कर्षः –रामायणे गङ्गायाः वृहद् वर्णनं वर्तते। प्राचीनकालादेव गङ्गा नदीरूपेण न अपितु अस्माकं मातृरूपेण प्रतिष्ठिता वर्तते।वर्तमानकाले महत्कष्टमिदं तथ्यं यत् सार्वजनिक जलस्थानेषु अमेध्यपदार्थानां विसर्जने न सङ्कोचमनुभवन्ति जनाः। गङ्गासदृशा पवित्रनदी अपि प्रदूषिता वर्तते। येन तस्याः जलं केषुचित्स्थानेषु अस्वाथ्यकरं जातम्। गङ्गाया महत्त्वं रामायणे वाल्मीकिमुनिना रामं श्रावितम्,उपरोक्त–रामायणवचनानि चेदवहिताः पालयेयु जनाः, तर्हि जलसंरक्षणं प्राकृतिकस्तरे एव भवितुमर्हति। अतः नदीनदसरित्पतिसमुद्रतीरे तज्जले वा शरीरस्य मलत्यागः कदापि न करणीयम्।गङ्गा अस्माकं जननी इव वन्द्या चेत्कथं तस्या इदृशी स्थितिः। या शिशुवत्समग्रं भारतं क्षीरपानेन परिपालयति तया समम् ईदृशोऽपि किम् अस्मदीयो व्यवहारो न्याय्यः! नहि! तथा सति नदीनां संरक्षणे, तासां पवित्रतास्थापनायै च इत आरभ्य एव अस्माभिः कृतसङ्कल्पैर्भाव्यम्। तदैव मानवीयं जीवनं सम्भवं, स्वस्थं, सुरक्षितं च स्यात्।सुविस्तृतक्षेत्रे प्रवाहमानानां नदीनां संरक्षणस्य समस्याऽतीवकठिना। यावत् पर्यन्तं परलोकभयं न स्यात्, नदीं प्रति आदरो न स्यात्, तावत्पर्यन्तं कथमपि पर्यावरणस्य संरक्षणं कर्तुं

न शक्नुमः। वर्तमानसमये नदीनां यादृशी दुर्दशा सा तु समेषां विदितमेव। कीदृशमपेयं जातं जलं प्रदूषणेन? अत्र किं करणीयम्? इति सर्वमस्माभिर्विचारणीयम्।वर्तमानकालेऽपि गङ्गातटे दानस्य, गङ्गायां स्नानस्य महत्त्वं वर्तते। साम्प्रतिके गङ्गाजलेन विविधप्रदेशेषु मानवाः कृषिकार्यं कुर्वन्ति, पेयजलमपि गङ्गातः अनेकेषु स्थानेषु प्राप्यते, विद्युतमपि गङ्गायां निर्माणं कुर्वन्ति। अतः साम्प्रतिकेऽपि गङ्गाया महत्त्वं विशिष्टं वर्तते। गङ्गां विना देशे विद्युतापूर्तिः कृषिकार्यं पेयजलसमस्या भवितुं शक्यते। अतः गङ्गासंरक्षणार्थं पुराणोपपुराणानुसारं मानव आचरेत्। तर्हि मानवा इहलोके सुखपूर्वकं जीवनयापनं कृत्वा परलोके परमं पदं प्राप्तुं शक्यन्ते इति।

गङ्गादिपवित्रतोयानां संरक्षणमवश्यमेव कर्तव्यमस्माभिः। यदानद्यः निर्मलाविरलधारया प्रवहिष्यन्ति तदा अस्माकं जीवनधारा अपि प्रवहिष्यति।

श्रीमद्रामायणे बालकाण्डे-३५/१७-१८

महाभारते आदिपर्वणि कुमारास्त्रविद्याप्रदर्शने कुमारस्य गाङ्गेय इत व्यवहारो दृश्यते।

आग्नेयः कृत्तिकापुत्रो रौद्रो गाङ्गेय इत्यपि।
श्रूयते भगवान्देवः सर्वगुह्यमयो गुहः।। अ. ११७, श्लो. १३

श्रीमद्वाल्मीकिरामायणम्, बालकाण्डे ४१/१६-२१

श्रीमद्वाल्मीकिरामायणम्, बालकाण्डे ४१/२६

श्रीमद्वाल्मीकिरामायणम्, बालकाण्डे ४२/४

श्रीमद्वाल्मीकिरामायणम्, बालकाण्डे ४२/२३-२५

श्रीमद्वाल्मीकिरामायणम्, बालकाण्डे ४३/३८

श्रीमद्वाल्मीकिरामायणम्, बालकाण्डे ४४/५-६

श्रीमद्वाल्मीकिरामायणम्, अयोध्याकाण्डे ५०/१२

श्रीमद्वाल्मीकिरामायणम्, अयोध्याकाण्डे ५४/१-९

सन्दर्भग्रन्थसूची

क्र.सं. ग्रन्थः लेखकः/सम्पादकः प्रकाशक/प्रकाशनवर्ष

1. रामायण महर्षिवाल्मीकिः इनेडोलॉजिकल बुक हाउस दिल्ली, 1983
2. श्रीमद्वाल्मीकिरामायणम् एन् रामरत्नम् मेलापुर मद्रास, 1958
3. श्रीमद्वाल्मीकि-रामायणम् महर्षिवाल्मीकिः गीताप्रेस गोरखपुर 2000
4. रामायणम् वासुदेव लक्ष्मण शर्मा पाण्डुरंगा जावाजी 1930

- शोधच्छात्रः साहित्यविभागः
राष्ट्रिय संस्कृत संस्थानम् लखनऊ

# वाल्मीकीरामायणे लोकोपयोगिनी शिक्षा

- डॉ. गोकुलानन्द तिवारी

महर्षिवाल्मीकिविरचितं रामायणं महान् धर्मग्रन्थो इतिहासग्रन्थश्च विद्यते। तद्विषयप्रतिपादकग्रन्थस्तथैव च महान् काव्यग्रन्थोऽपि विद्यते । 'सर्गबन्धो महाकाव्यमिति' दण्डिनः विश्वनाथस्य च लक्षणानुसारेण बाल्मीकिरामायणं महाकाव्यत्त्वमेति। उक्तञ्च-

**वेदवेद्ये परे पुंसि जाते दशरथात्मजे।**
**वेदः प्राचेतसादासीत् साक्षाद् रामायणात्मना**

एवं प्रकारेण श्रीमद्वाल्मीकिरामायणस्य वेदवत् प्रतिष्ठा वर्तते। महाकाव्यमिदं "शोकः श्लोकत्वमागतः" इति कारुण्येन रसेन वाल्मीकिना स्वकारुण्यं काव्यरुपेण प्रदर्शितम्। काव्यमिदं रायणं रचशैल्याः प्राञ्जतया भावानां विवृत्याः रसानां यथास्थानमुपन्यासात् आचारसंहितायाः संकलनेन नीतिशिक्षायाः संग्रहेण अलंकाराणां सुनियोजनेन सामाजिकधार्मिकभावनायाः मौक्तिकेन लोकोपयोगिनी च, शिक्षायाः समन्वितेन विश्वेऽस्मिन् सर्वेषां जनानां पूज्यः अनुकरणीयश्च ग्रन्थो वर्तते। समाजस्य जीवनाधाराय अत्र सर्वत्र लोकोपयोगिनां शिक्षावर्तते। अत्र मुख्यत्वेन श्रीरामस्य चरित्रं वर्णितं वर्तते, यः प्रतिपलं सर्वान् विविधां शिक्षां शिक्षयति। मयाऽत्र स्वशोधपत्रे वाल्मीकिरामायणे वर्णितं लोकोपयोगिनी शिक्षां प्रस्तूयते-

यावत् स्थास्यन्ति गिरयः सरितश्च महीतले
तावद् रामायणकथा, लोकेषु प्रचरिष्यति

रामायणमेतद् नवरसरुचिरा कृतिरस्ति, एतेनोपर्युक्तेन श्लोकेन प्रामाणितं भवति यद्रामायणे सर्वत्र लोकोपयोगिकी शिक्षा गुम्फिता वर्तते। अत्र श्रीरामस्य श्रेष्ठता, महाराजदशरथस्य दुर्बलता, कैकेय्याः दुराग्रहः लक्ष्मणस्य सिंहगर्जना, सीतायाः पतिव्रतः, कौशल्याः गौरवः सुमित्रायाः बुद्धिमत्ता महात्मनो भरतस्य च उदारता सेवाभावना, गुरुभक्तिः पितृपरायणता भ्रातृत्वप्रेमः, त्यागः च सर्वान् जनान् शिक्षां प्रददाति। सर्वान् मानवान् एतैः सच्चरित्रैः समाजहिताय शिक्षां अर्जयेत्।

राज्यग्रहणे शिक्षा

यदा अयोध्यायां श्रीरामस्य राज्याभिषेको निश्चयो भवति तदा कैकेयी वरद्वयं याचितवती-

योऽभिषेकसमारम्भो राघवस्योपकल्पितः।
अनेनैवाभिषेकेन भरतोमेऽभिषिच्यताम्।।
नवपञ्च च वर्षाणि दण्डकारण्यमाश्रितः।
चीराजिन जटाधारी रामो भवतु तापसः।।

यत्र राज्ञा दशरथेन पुत्रवियोगे स्वप्राणाः त्यक्ताः, मातुलग्रहादागतं भरतं कैकेयी यदा सर्व वृत्तान्तं

वर्णयति तदा भरतः सहसा भूमौ पपात्–

मया तु पुत्र श्रुत्यैव रामस्यैवाभिषेचनम्।
याचितस्ते पिता राज्यं रामस्य च निवाससनम्।।

एतच्छ्रुत्वा भरतेन मातुः कैकेय्याः घोरनिन्दा कृता। तेनापि राज्यग्रहणमस्वीकृतम्। भरतोऽपि वल्कलवस्त्रं धारयित्वा श्रीरामेण मेलितुं वनं प्रति प्रस्थितः।

गुरुभक्तिः–

भरतो ममाग्रे गच्छन् तां रजनीं तत्रैव भारद्वाजाश्रमे रामदर्शनकामाद् व्यतीतवान्। तत्राश्रमे सः भरतः ऋषिराश्रमे मुनेः भरद्वाजस्य प्रदक्षिणां कृत्वा प्रणम्य च भूमौ अतिष्ठत्। तेन स्वरात्रिं भरद्वाजमुनेः सेवायां व्यतीतम्। तदा मुनिना भरतकृतसेवया प्रसन्नो भूत्वा तं रामदर्शनमार्गं निर्देशितम्। प्रातः काले सः ससैन्यबलेन अग्रे गत्वा वशिष्ठम् उपयम्य आह–

यादृशं लक्ष्यते रूपं तथा चैव श्रुतं मया।
व्यक्तं प्राप्तः स्म तं देशं भरद्वाजोऽयमब्रवीत्।।

तदा भरतागमनस्य वार्ता श्रुत्वा श्रीरामः प्रसन्नवदनोऽभवत्। राज्यग्रहणेऽपि बाल्मीकिना रामायणे वर्णितं यत् तत्र भरतस्य मनसि हृदि वा कोऽपि लोभो नासीत्। सः अयोध्यायाः राजपदमस्वीकृत्य लोकं शिक्षयति। ज्येष्ठ भ्रातुः जीविते सति सः किञ्चिदपि दुष्करं कार्यं न कृतवान्। भ्रातृत्व प्रेम्णा तेन राज्यग्रहणं वैमुख्यं कृतम्।

श्री रामस्य पितृपरायणतायाः शिक्षा–

यदा श्रीरामः पितृमुखेन स्ववनवासं श्रुतयामास तदा सः किञ्चिदपि विस्मितो नाऽभवत्। तेन चतुर्दशवर्षपर्यन्तं वनवासं पित्राज्ञां मत्वा स्वीकृतम्। श्रीरामः राज्ञः दशरथस्य प्रियपुत्रमासीत्। दशरथः किञ्चिद् क्षणमपि रामं स्वदृष्ट्या नापसारितवान्। रामोऽपि पितुः भक्तः आसीत्। पितुराज्ञापालनं रामस्य परमं कर्तव्यमासीत्, तदा पित्राज्ञापालनाय सो वनं प्रस्थितः । एतेन श्रीरामस्य पितृपरायणभावनया समाजे मातापित्रोः कृते सम्मानं जागरिष्यति। एतेन चरित्रेण लोके समाजे वा मातापितरं प्रति सम्मानं वर्धयिष्यति।

लोकरक्षणार्थं राजनीतिविषयकी शिक्षा–

श्रीरामः वने भरतं वल्कलवस्त्रायुतं विवर्णवदनं कृशं च दृष्ट्वा राज्यविषये पृष्टवान् राज्यरक्षणाय राजनीतिविषयकोदेशाः च दत्तवान्–

क्व नु तेऽभूत्पिता तात यदरण्यं त्वमागतः।
न हि त्वं जीवतस्तस्य वनमागन्तुमर्हसि।।

राजसूयाऽश्वमेधानाहर्ता धर्मनिश्चयः सत्यवादी दशरथो मे पिता किं कुशली वर्तते? विद्वान् धर्मनित्यो महाद्युतिः इक्ष्वाकूणामुपाध्यायो ब्राह्मणोः वशिष्ठः कश्चित् तातेनसत्कृतो वर्तते? हे तात! कश्चिद्देवान्, पितॄन्, भृत्यान् गुरून्, पितृसमानादि वृद्धांश्च, ब्राह्मणांश्चाऽभि मन्यसे? कच्चित्काले प्रबुध्यसे? कश्चिश्चापररात्रेषु चिन्तयस्यार्थं नैपुणम्? हे भरत्! कश्चिद् धृष्टभूरश्च, मतिमान्, धृतिमान्, शुचिः

कुलीनश्चाऽनुरक्तश्च दक्षः सेनापतिर्निर्मुक्तः? राजनीतेरङ्गानि कश्चिद् यथावदनुमन्यसे? किं त्वया वेदाः क्रियाः दाराश्चेत्यादयः सफलाकृताः? कश्चिद् स्वादुकृतं भोज्यं नाश्नासि? एवं प्रकारेण महर्षिवाल्मीकिः श्रीराममुखात् लोकं कृते भरताय राजनीतिविषयकोपदेशाः कुशलपृच्छामाध्यमेन दत्तवान्।

भ्रातृप्रेमविषयिकी शिक्षा–

राजनीतिविषयकोपदेशं प्रदाय श्रीरामो भरतं पृच्छति यत् श्रोतुमिच्छाम्यहं त्वया चीरजटाजिनिना देशोऽयं वनं कथमागतः? तदा भरतो बलवद् भूयः प्राञ्जलिर्वाक्यमब्रवीत्– आर्य! मातुः कैकेय्याः कथनेन पित्रा सुमहत्पापमिदं कृतम्। महाबाहुः तातः पुत्राशोकाऽभिपीडितः स्वर्ग गतः। तत्पश्चात् रामो भरतं परिष्वज्येदमब्रवीत्– हे चरितव्रतः! स्वर्ग गतः। तत्पश्चात् रामो भरतं परिष्वज्येदमब्रवीत्– हे चरितव्रत! पित्राज्ञा पालयितुं त्वया राज्यमयोध्यायां गत्वा लोकसत्कृतं सिंहासनं प्राप्तव्यम्, मया वल्कलवाससा दण्डकारण्ये वस्तव्यम्। एवं श्रुत्वा भरतो ब्रूते–हे तात! शिरसा त्वाऽभियाचेऽहं यत् सर्वेषु भूतेषु वान्ध वेषु मयि च दयां कुरुष्व। यदि भवानितः परं वनमेव अयोध्यां प्रति आगम्यताम्। अयोध्यां प्रति रामस्य वैमुख्यं दृष्ट्वा भरत अव्रवीत्– हे भ्राताः! सुमहद्राज्यमहमेकस्तु रक्षितु नोत्सहे, भवान्नेव राज्यग्रहणाय च रामं सम्प्रार्थयामास। अत्र बाल्मीकिना भरतस्य रामं प्रति प्रगाढ़प्रीतिः दर्शिता। रामोऽपि भरतसदृशं न कश्चिन्मन्वते। भरतो राममब्रवीत्–

अधिरोहार्य पादाभ्यां पादुके हेमभूषिते। एते हि सर्वलोकस्य योगक्षेमं विधास्यतः।।

तदा श्रीरामः तयोरधिरुह्य ते पादुके महात्मने भरताय प्रायच्छत्। भरतः पादुके प्रतिगृह्य रामं वचनमब्रवीत्– हे रघुनन्दन! जटाचीरधरो ह्यहं चतुर्दशवर्षाणि वने भवत्सदृशमेव फलमूलाशनो स्थास्यामि। तवाऽगमनमाकाङ्क्षन् नगराद्बर्हिसन् राज्यसिंहासने तव पादुके संस्थाप्य तवैव प्रभावेण राज्यशासनं विधास्यामि। चतुर्दशे हि सम्पूर्णे वर्षे यदि त्वां न द्रक्ष्यामि तर्हि हुताशनं प्रवेक्ष्यामि। एवं प्रकारेण भरतस्य भ्रातृत्वस्नेहः, त्यागभावना, सेवाभावना अधुनापि जगति प्रसिद्धं वर्तते। लोकस्य जनाः एतच्चरित्रमनुसरेत्।

लोकबन्धुत्वस्य राष्ट्रैकत्वस्य च शिक्षा–

वाल्मीकिना रामायणं लोकरक्षणार्थं विश्वहिताय चैव आरचितम्। सम्पूर्णे रामायणे लोकहितस्य विश्वबन्धुत्वस्य च शिक्षा समाहिता वर्तते। राष्ट्रस्य एकतायै रामायणे वर्णितं वर्तते–'यादृशं कुरुते कर्म तादृशं फलमश्नुते।'

लोकबन्धुतायै राष्ट्रस्य एकतायै च मर्यादापुरुषोत्तमोरामस्य चरित्रं तथा च त्यागस्य प्रतिमूर्तिः भरतस्य चरित्रं पालनीयमनुकरणीयं च वर्तते। राष्ट्रस्य एकतायै लोककल्याणाय विश्वरक्षणार्थं च रामायणे पुराणे चोक्तं वर्तते–

पठ रामायणं व्यास, काव्यबीजं सनातनम्।
यत्र रामचरितं स्यात् तदहं तत्र शक्तिमान्।।

एवं प्रकारेण जगद्विदितं वर्तते यत् रामायणे सर्वत्र लोकल्याणस्य शिक्षा निबद्धा वर्तते। अत्र विविध ाः विद्याः वर्णिता वर्तते। दर्शन–आगम–पुराण–उपनिषद–आयुर्वेद– ज्यौतिष–मनोविज्ञान– तन्त्रादीनां च

सार: तत्सम्बद्धा उपयोगिनो विषयाश्च समुपस्थाप्यन्ते। महापण्डितः रावणः सर्वविद्यानां ज्ञाता आसीत्। जीवनस्यान्ते सो रावणः लक्ष्मणं विविधाः विद्याः लोकोपयोगिनी शिक्षा च प्रददात्।

अतः निश्चयेन रामायणस्याध्ययनेन तत्र वर्णितं सर्वेषां चरित्रैः तत्कृतैः कार्यैः तथा च श्रीरामस्य भरतस्य च विविधैः चरित्रैः तत्र सर्वत्र लोकहिताय विश्वकल्याणाय अपि च लोकोपयोगिनी शिक्षा गुम्फिता समाहिता च वर्तते।

(क) काव्यादर्श (दण्डीकृतम्) 1/4 (ख)विश्वनाथकृतं साहित्यदर्पणम्- (6/315)
बाल्मीकिरामायणमहाकाव्यम्। आनन्दवर्धनकृतः ध्वन्यालोकः (1.5)
बाल्मीकिरामायणम्, (बालकाण्डः- 2.36) क-बाल्मीकिरामायणम्, अयोध्याकाण्डः 10.11
ख-प्रतिमानाटकम् 3.2 क-बाल्मीकिरामायणम्, अयोध्याकाण्डः 10.12
ख-प्रतिमानाटकम् 3.4 बाल्मीकिरामायणम्, अयोध्याकाण्डः- 56.35
बाल्मीकिरामायणम्, अयोध्याकाण्डः -66.17 बाल्मीकिरामायणम्, अयोध्याकाण्डः-10.20
बाल्मीकिरामायणम्, अयोध्याकाण्डः-75.10 बाल्मीकिरामायणम्, अयोध्याकाण्डः-79.16
बाल्मीकिरामायणम्, अयोध्याकाण्डः-79.20 बाल्मीकिरामायणम्, युद्धकाण्डः-15.23
बृहद्धर्मपुराणम्। बाल्मीकिरामायणम्, बालकाण्डः-2.36, बाल्मीकिरामायणम्, अयोध्याकाण्डः-21.58

सन्दर्भग्रन्थसूचिः-

(1) बाल्मीकिरामायणम् । पूना प्रकाशनम् पूना , मुंबई। (2) अध्यात्मरामायणम्, गीताप्रेस।
(3) आनन्दरामायणम्, गीताप्रेस। (4) अग्निपुराणम्, व्यासकृतम्। (5) विष्णुपुराणम्, व्यासकृतम्।
(6) महाभारतम्, वनपर्वम्, व्यासकृतम्। (7)भट्टिकाव्यम्, भट्टि विरचितम्।
(8) प्रतिमानाटकम्, भास रचितम्। (9) चम्पूरामायणम्, भोजकृतम्।
(10) बालरामायणम्, मोतीलाल बनारसीदास प्रकाशन वाराणसी।
(11) रामकथा, कामिल बुल्के, चौखम्बा प्रकाशन वाराणसी।
(12) संस्कृत साहित्य का इतिहास, उमाशंकर शर्मा। (13) रघुवंशमहाकाव्यम्। कालिदास कृतम्।
(14) श्रीरामविजयमहाकाव्यम्, कलकत्ता प्रकाशन। (15) महावीरचरितम्, भवभूतिकृतम्।
(16) उत्तररामचरितम्। भवभूतिकृतम्। (17) हनुमन्नाटकम्। हनुमत् कृतम्।
(18) रामायणमंजरी, राजेश्वर कृता। (19) जानकीहरणम्, कुमारदास कृतम्।
(20) संस्कृतवाङ्मय का बृहद् इतिहास, श्री बलदेव उपाध्याय।

शोधच्छात्र शिक्षाशास्त्रविभाग, राष्ट्रिय संस्कृत संस्थान लखनऊ परिसर
दूरभाष सं. 9675872556

# संस्कृतस्य कृते विज्ञानक्षेत्रे उद्योगावसराः

– डॉ. ललित मोहन तिवारी

सुविदितमेतत् यत् परिष्कृतं, परिशुद्धं व्याकरणादिदोषरहितं यत्तत् संस्कृतम्, समग्रमपि पुरातनं भारतीयं वाङ्मयं संस्कृतमाश्रित्यावतिष्ठते, संस्कृतं न केवलं भारतीय– संस्कृतरक्षणार्थमेवावश्यकमपितु विविधसंस्कृतिप्रसारसाधनम्, राष्ट्रभाषायाः समुन्नतेः साधकम्, जीवनाचारस्य दर्शकम्, प्रान्तीयानां प्रादेशिकानां च विकृतीनां विवादानां संघर्षाणां च प्रशमनम्, सर्वेषां मानवानां समुन्नतेः साधनमिति सुतरामवधेयम्। संस्कृत्या वाङ्मयेन च विहीनस्य देशस्य जातेश्चाधेः पतनमनिवार्यम्।

भारतवर्षस्य समस्तमपि प्राचीनं वाङ्मयं संस्कृतभाषायामेव निहितं वर्तते। समग्रमपि वैदिकं वाङ्मयं, रामायणं, पुराणानि, महाभारतं, दर्शनशास्त्रस्य ग्रन्थाः, महाकाव्यानि, वैमानिकशास्त्रग्रन्थाः ज्ञानस्य विज्ञानस्य च सर्वे ग्रन्थाः संस्कृतभाषायाः गौरवमभिर्धयन्ते, सुप्रसिद्धाः पाश्चात्यविद्वान्सः मैकडोनलः मैक्समूलरादयः सर्वे संस्कृतस्य वैज्ञानिकं महत्त्वं स्वीकृतवन्तः। विज्ञानविषयस्य सर्वे प्रयोगाः ग्रन्थाः संस्कृतभाषायामेव, गुम्फिताः सन्ति। आधुनिके गणित–विज्ञान–संगणकस्य युगे संस्कृतं प्रायः लुप्तं प्रतीयते। रोजगाराभावात् मानवाः आधुनिकविषयाः चिन्वन्ते। अतः संस्कृतरक्षणार्थं परिवध ॅनाय च तथा रोजगारप्राप्तये विज्ञानक्षेत्रे अपि बहवः उद्योगावसराः वर्तन्ते, यतः विज्ञानस्य सर्वे प्राचीनाः ग्रन्थाः संस्कृतमाश्रित्यावतिष्ठन्ते, विज्ञानस्य शोधशालायां एते संस्कृतग्रन्थाः तेषां कृते सहायकाः अस्मभ्यं च रोजगारप्रदायकाः भविष्यन्ति। ?

संस्कृते खगोलविज्ञानविषये उक्तं वर्तते–

**येनेमा विश्वा भुवनानि तस्थुः।**
**ततः सत्रं बलभोजश्च जातम्।।**

वैदिकसंस्कृतस्य तैत्तिरीयारण्यके वर्णितं वर्तते यत् सूर्य ईश्वररूपेण व्योमे तिष्ठते, सूर्य ऊर्जायाः प्रमुखं साधनं वर्तते, स एव सृष्टेरुत्पादकः ऋतूनां च नियामको वर्तते, सूर्यकारणादेव जगदिदं परिवर्तयते। पृथिव्याः मानवाः, पशुपक्षिणः, वृक्षादयश्च सूर्यस्योर्जसा एव शक्तिं गृह्यन्ते। यथोक्तं च–

''मित्रो दाधार पृथिवीमुतद्याम्। मित्रः कृष्टीः'' । सूर्यस्य ऊर्जसा एव सर्वेषां प्राणीनां शरीरे ऊर्जासञ्चरणं प्राणाः च सभागम्यन्ते।

खगोलविज्ञाने ग्रहाणां गर्तिविषयेऽपि उक्तं वर्तते–

**लक्ष्या प्रतिमण्डलगा भ्रमन्ति सर्वे ग्रहाः स्वचारेण।**
**मन्दोच्चादनुलोमं प्रतिलोमञ्चैव शीघ्रोच्चात्।।**

सौरमण्डले ग्रहाः कीदृशं भ्रमन्ति? इत्यस्मिन् प्रसिद्धः खगोलज्ञः आर्यभट्टः प्रोक्तवान्– क्षुद्रग्रहाः स्वकक्षायामेव भ्रमन्ति तथ च वास्तविकाः अटलग्रहाश्च स्वकेन्द्रमध्ये विचित्रगतिना भ्रमन्ति।

सर्वे ग्रहाः तत्र स्वगत्यानुसारेणैव गतिनुत्पादयन्ति। ते सर्वे स्वकेन्द्र मध्ये विपरीतदिशायां भ्रमन्ति। एवं क्रमेण आधुनिकखगोलविज्ञाने प्रथमो नियमः जोहान्सकेपलरमहोदयेन सप्तदशशताब्द्यां दत्तः परञ्च भारतीयार्यभट्टेन एषौ नियमः पञ्चशताब्द्यामेव दत्तः। इतः परं सूर्यचन्द्रयोः ग्रहणविषये उल्लेखितम्–

**''छादयति शशी सूर्यं शशिनं महती च भूच्छाया''**

यदा चन्द्रा पूर्णरूपेण सूर्यमाच्छादयति तदा चन्द्रस्य ब्रहत्तमा छाया पृथिव्यां पतति येन सा छाया चन्द्रमसमपि पूर्णरूपेण आच्छादयति अर्थात् सूर्यस्य चन्द्रस्य च मध्ये यदा पृथिवी तिष्ठते तदैव चन्द्रग्रहणं सम्भूयते। एवमेव सूर्यपृथिव्योर्मध्यभागे यदा चन्द्र आगच्छति तदा चन्द्रस्य छाया पृथिव्यां पतति एतेन सूर्यग्रहणं सम्भवति। एवं ग्रहणस्यापि वर्णनमत्र विद्यते। संस्कृते खगोलविज्ञानविषये धूमकेतवः तेषां संख्याः च परिगणिताः वर्तन्ते, यथा–

**तेषां विद्युत्सम्मोहस्तु, शरद्वारान्तयोः क्रमात्।**
**भवन्त्यादित्यकिरणेष्वन्तर्भूताः स्वभावतः॥**
**वाणाश्चधूमकेतूनां मण्डलश्चाष्टमान्तरे।**
**त्रिकोटिसप्तलक्षत्रिसहस्रद्विशतोपरि॥**
**एकविंशति सङ्ख्याकाः वर्तन्ते धूमकेतवः॥**

यदा शरद्वासन्तऋत्वो आगमनं भवति तदा धूमकेतवः महन्मात्रायां शीघ्रतया अभिवर्द्धन्ते, ते ऋतुद्वये सूर्यस्य प्रकाशे सहजतया स्वभावतया च अस्तित्वमागम्यन्ते। एतैः पृथ्वी प्रभाविता जायते। व्योममण्डले धूमकेतवः त्रिकोटिसप्तलक्षत्रिसहस्रद्विशतोपरि एकविंशतिसङ्ख्याकाः सन्ति। उक्तेष्वेषु च अष्टसहस्रकाः धूमकेतवो वहवो विद्युत्गर्भा उग्राः च सन्ति, एतेष्वपि द्वादशसश्रेखाकाः रौद्राः प्रशस्ताः च धूमकेतवः वर्तन्ते। आधुनिके समये वैज्ञानिकाः बहुप्रयासेन एतेषां गणनां कुर्वन्ति किन्तु संस्कृते पूर्वमेव संख्याः परिगणिताः वर्तन्ते एतदपि वर्णितमत्र यत् ते धूमकेतवः प्रथिव्यां न पतन्ति अपितु स्वेविशालकायं खगोलीयोविद्युलार्भदेहेन पृथिवीं प्रति आकर्षिताः भवन्ति, तत्कारणेन ते पततीव भान्ति। खगोलवैज्ञानिकानां कृते एते ग्रन्थाः बहुसहायकाः भविष्यन्ति तत्क्षेत्रे च उद्योग अपि प्राप्स्यते। भौतिकविज्ञानक्षेत्रेऽपि संस्कृतस्य कृते उद्योगाः दृश्यन्ते–

सायणाचार्येण सूर्यस्य प्रकाशगतिविषये उक्तम्–

**तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य।**
**विश्वमाभासि रोचनम्॥**

सूर्यः त्वरित् वेगेन सम्पूर्णविश्वे निमेषमात्रेणैव व्याप्त दृश्यते। विश्वेऽस्मिन् तस्यगमनगतिः तीव्रतमा वर्तते। तदनन्तरे पृथिव्या उत्पत्तिः केन प्रकारेणा भवदिति उल्लेखितमत्र–

**तस्माद् वा एतस्मादात्मन आकाशः सम्भूतः।**
**आकाशात् वायुः, वायोः अग्निः, अग्नेः आपः अद्भ्यः पृथिवी''॥**

भौतिकवैज्ञानिकाः अधुनापि पृथिव्यां उत्पत्तिविषये शोधरताः वर्तन्ते। महर्षिणा कणादेन कार्यकारणविषये स्वग्रन्थे निगदितः – प्रथमं कारणम्, कारणादेव कार्यस्योत्पत्ति, न तु कार्यात्कारणोत्पत्तिः

कारणाः भावात् कार्याभावो वर्तते। कारणकार्ययोर्मध्ये तस्य घटना विद्यते। श्रीमदीश्वरकृष्णेनापि ''सत्कार्यवादस्य'' सिद्धान्ते प्रतिपादितः। आधुनापि भौतिकविज्ञाने कारणप्रभावमध्ये घटना स्वीक्रियते। एवमेव वर्षाकालमध्ये इन्द्रधनुषविषयेऽपि भवितम् –

**सूर्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः सा भ्रे।**
**वियति धनुः संस्थानाः मे दृश्यन्ते तदिन्द्रधनुः॥**

सूर्यस्य विभिन्ना रश्मयः सन्ति, तेषु रंगोऽपि भिन्नो वर्तते। यदा दिवसे व्योमे केचिद् मेघाः भवन्ति, यस्मिन् वाष्परूपेण जलं अर्धव्योमे तिष्ठते तदा सूर्यस्य नानार्विधरंगरश्मिभिः तत् वाष्पजलम् इन्द्रधनुषः कथ्यते। एवं प्रकारेण भौतिक विज्ञानस्य। सर्वं तत्त्वं ज्ञानं च संस्कृतग्रन्थेषु निहितं वर्तते। यथा– विद्युत्–एकत्रीकरणं समयानुसारं तस्य उपयोगः , गतिचालनं गुरुत्वाकर्षणविषये , तालविषये अर्थात् नेत्रस्य पृष्ठभागे यत्र प्रकाशसंचरणं भवति तद्विषये , तथा च अन्यत्सर्वं ज्ञानवर्णितं वर्तते। एतेषां संस्कृत– ग्रन्थानामध्येनापि भौतिकवैज्ञानिकाः लाभः प्राप्स्यन्ति। तत्रापि संस्कृतकृते अवसराः सन्ति। एवमेव रसायनविज्ञान क्षेत्रेऽपि उद्योगाः वर्तन्ते, यथा– रसायनविज्ञानस्य प्रयोगशालायां वैज्ञानिका अग्निज्वालायाः प्रयोगे अग्नेः कल्पपात्रे भिन्नः भिन्नाः रंगप्राप्तये महत्प्रयासेन प्रयोगं कुर्वन्ति तत्सर्वं पूर्वमेव अत्र निहितमस्ति। यथा–

**आवर्तमाने कनके पीता तारे सिता प्रमा।**
**भुल्वे नीलनिभा तीक्ष्णे कृष्णवर्णा सुरेश्वरी॥**

अग्निज्वालायाः वर्णो भिन्नधातौ भिन्नैव प्राप्यते। स्वर्णधातुपात्रे पीतवर्णः, रजतधातौ श्वेतः, ताम्रपात्रे नीलवर्णः, लौहधातौ च कृष्णवर्ण अग्निज्वाला दृश्यते। ग्रन्थोऽयमपि रसामविज्ञानस्य प्रयोगं परिपोषयिष्यति। विस्फोटकसामग्रीनिर्माणमपि अत्रैव वर्णिता वर्तते। यथोक्तम्–

**अङ्गारस्यैव गन्धस्य सुवर्चिलवणस्य च।**
**शिलाया हरितालस्य तथा सीसमलस्य च॥**

विस्फोटकं सामग्र्याः निर्माणाय अंगारः, सुवर्चिलवणः, शिला, हरितालः, सीसमलं, हिङ्गुलाः, कान्तरजः, कपूर्रश्च चूर्णसम्मिश्रणेन अग्नतत्वेन च विस्फोटो जायते। एवमतिरिच्य धातुवर्णनं, लवणनिर्माणप्रक्रिया , प्रयोगशालायां रसायनस्य प्रयोगविषयाः इत्यादयः विवेचिताः वर्तन्ते। एतेः ग्रन्थैः सहाय्यैः रसायनविज्ञाने उद्योगाः उत्पत्स्यन्ते। रेखागणितस्य प्राचीनमूलग्रन्थः शुत्वसूत्रं वर्तते पाश्चात्याः विद्वान्स अपि एतस्य महत्त्वं स्वीकृतवन्तः आर्यभट्टेनापि स्वग्रन्थे रेखागणितस्य सर्वाणि सूत्राणि प्रतिपादितानि। यथा– त्रिभुजस्य फलशरीरं समदलकोटि भुजार्धसंवर्गः' । इत्थं प्रकारेण तत्र त्रिभुजविषये, त्रिकोणेमितिविषये, वृत्तविषये च सर्वं प्रतिपादितम्।

गणितक्षेत्रेऽपि एतैः ग्रन्थैः महदोद्योगाः प्रकटयिष्यन्ते। चिकित्साविज्ञानक्षेत्रे तु संस्कृतस्य आयुर्वेदग्रन्थाः परिपूर्णाः सन्ति। भ्रूणविज्ञानविषये प्रतिपादितमत्र यथा–

**गर्भस्य चत्वारि चतुर्विधानि, भूतानि मातापितृरासम्भवानि।**
**आहारजन्यात्मकृतानि चैव, सर्वस्व सर्वाणि भवन्ति देहे॥**

महर्षिणा चरकेन स्वग्रन्थे उल्लेखितं यत् गर्भस्थभ्रूणः मातृगर्भे चतुर्विधरूप यथा मातापितरौ आहारः स्वकृतैः प्रयत्नैः वृद्धिं प्राप्यते। एतदतिरिक्तं संस्कृतग्रन्थेषु धमन्यः, रक्तवाहिन्यश्च विषये, रक्तप्रवाहः कीदृशः हृदये गम्यते कीदृशः च देहस्य अन्ये भागे निस्सरति इत्यस्मिन् विषये रक्तपरिसंचरणविषये हृदयरोगविषये च शल्यचिकित्साविषये, वृक्कस्थितपाषाणरोगविषये, आधुनिके प्रचलिते परखनलीशिशुविषयेऽपि च (ज्मेज ज्नइम ठंइल) अन्यत्सर्वमपि चिकित्साविज्ञानं समाहितं वर्तते। आधुनिके चिकित्सा- विज्ञानक्षेत्रे एते सर्वे ग्रन्थाः उद्योगरूपेण सहायकाः भविष्यन्ति। क्रमेऽस्मिन् संस्कृतग्रन्थेषु वनस्पतिविज्ञानमपि पूर्णतया समाहिता वर्तते। आयुर्वेदग्रन्थेषु तु पूर्णरूपेण वनस्पतिविज्ञानमेव वर्तते। वृक्षाणां वर्गीकरणविषये उक्तम्-

**वनस्पतिद्रुमलता गुल्माः पादपजातयः।**
**बीजात्काण्डात्तथा कन्दात्तज्जन्म त्रिविधिं विदुः॥**

चतुर्विधाः वृक्षाः तत्र वर्णिताः। अन्यः प्रकाशसंश्लेषणविषयेऽपि वृक्षाणां दृष्टिविषये च एत्सर्व पूर्वमेव रचितं वर्तते। वनस्पतिविज्ञानस्य सर्वेऽस्मिन् शोधशालायां संस्कृतस्य आयुर्वेदग्रन्थाः बहुलाभदायकाः सन्ति। अधुनाऽपि वनस्पतिविज्ञानक्षेत्रे संस्कृतस्य कृते उद्योगाः जनाः कुर्वन्त्येव।

अतः उपर्युक्तेः संस्कृतग्रन्थप्रमाणैः वक्तुं पार्यते यत् विज्ञानस्य प्रत्येके क्षेत्रे जनाः मानवाः च स्वस्य उद्योगोऽपि संस्कृतस्य कृते कर्तुं शक्यन्ते, विज्ञानक्षेत्रे आयुर्वेदो वनस्पतिविज्ञानक्षेत्रे, ज्यौतिषग्रन्थाः गणितक्षेत्रे, भौतिकविज्ञानक्षेत्रे च वेदोपनिषदारण्यकाः विज्ञानस्य प्रत्येकक्षेत्रे सहायका वर्तन्ते। एतेषां ग्रन्थानां तत्त्वज्ञानैः विज्ञानस्य क्षेत्रमपि परिपुष्यति। एतेन विज्ञानक्षेत्रे संस्कृतस्य कृते महदुद्योगावसराः निश्चियेन उत्पत्स्यन्ते।

सन्दर्भग्रन्थसूचिः-


1. ऋग्वेद-सायणभाष्यम्। 2. तैत्तिरीय आरण्यकम्।
3. संस्कृत- साहत्यि का इतिहास (द्वारा मैक्डोनल) भाग-1, हिन्दी।
4. हिस्ट्री ऑफ दि एशिएंट संस्कृत लिटरेचर बाय मैक्समूलर।
5. संस्कृत-साहित्य का समीक्षात्मक इतिहास द्वारा कपिलदेव द्विवेदी। 6. तैत्तिरीयसंहिता।
7. आर्यभट्टकृतम् आर्यभटीयम्। 8. सूर्यसिद्धान्तः।
9. मुहूर्तचिन्तामणि, व्याख्या (विन्ध्येश्वरीप्रसादद्विवेदी)। 10. संस्कृत परम्परागत-विषय द्वारा (शत्रुघ्न त्रिपाठी)।
11. वृहद्-विमानशास्त्रम्। 12. सिद्धान्तशिरोमणि। 13. ऋक्-संहिता।
14. कणादकृतं वैशेषिकदर्शनम्। 15. सांख्यकारिका (श्रीगौडपादाचार्यकृत भाष्य)
16. वृहत्संहिता। 17. अगस्त्यसंता। 18. न्यायदर्शनम्। 19. रसार्णवम्। 20. चरकसंहिता।
21. सुश्रुतसंहिता। 22. यजुर्वेदः (शुक्ल यजुर्वेदः, कृष्णयजुर्वेदः)। 23. संगीतरत्नाकरः। 24. महाभारतम्।
25. शुक्रनीतिः। 26. रत्नसमुच्चयः। (क) संस्कृतसाहित्य का इतिहास, भाग-1, हिन्दी अनुवाद, द्वारा मैक्डोनल। (ख) हिस्ट्री ऑफ दि एशिएंट संस्कृतलिट्रेचर बाए मैक्समूलर।
27. तैत्तिरीय आरण्यकम्-3.11 (क)एकां दाधार भुवनानि विश्वा, यत्र गावो भूरिश्रृंग अयासः। ऋग्वेद 1.154-14.6 (ख) सूर्यसिद्धान्त द्वारा रामचन्द्र पाण्डेय पृ. 349 28. तैत्तिरीयसंहिता- 3.4.103-4
29. आर्यट्टीयम् कलाक्रियापादः, 3.17 30. (क) आर्यभटीयम्, गोलपादः-37

(ख) मुहूर्तचिन्तामणि- व्याख्या विन्ध्येश्वरी प्रसाद द्विवेदी, पृ. 37
(ग) संस्कृतपरम्परागतविषय-द्वारा शत्रुघ्न त्रिपाठी, पेज-26
31. बृहद्-विमानशास्त्रम, क्रियासारा-तन्त्रम्, पृ. 185 32. बृहद्-विमानशास्त्रम्, क्रियासारा-तन्त्रम्, पृ. 1841
33. बृहद्-विमानशास्त्रम्, क्रियासारा-तन्त्रम्- पृ. 184 34. सिद्धान्तशिरोमणि-भुवनकोशः-6
35. ऋक्-संहिता-1.50.4 36. तैत्तिरीयोपनिषद्, ब्रह्मनन्दावल्ली, अनुवाक्-1
37. कणादकृतं वैशेषिकदर्शनम्-1.2 38. सांख्यकारिका, श्रीगौडपादाचार्यकृतभाष्य-श्लोक-9
39. बृहत्संहिता, अध्यायः-35 40. अगस्त्य संहिता ('साईल इन संस्कृत' द्वारा संस्कृत भारती, पृ. 184
41. वैशेषिकदर्शनं संकणादकृतम्, 1.1.20-21, 5.1.25
42. न्यायदर्शनम्, अध्यायः - 3.46 43. रसार्णवम्, 4.49-51
44. शुक्रनीतिः, सेनानिरूपणप्रकरणम्, 206-208 45. रत्नसमुच्चयः, 10-11
46. सुश्रुतसंहिता (एकादशद्वादशाध्यायः) (क) शुल्व यजुर्वेदिः, कात्यायनशुल्वसूत्रम्
(ख) कृष्णयजुर्वेदः, द्यौथामनसूत्रम्। (ग) संस्कृत-साहित्य का इतिहास, क्षरा मैकडोनल, भाग-1, हिन्दी, पृ. 245
47. आर्यभट्टकृतम्, आर्यभट्टीयम्। 48. चरकरचितम्, चरकसंता- शरीरस्थानम्, 2.26
49. सङ्गीतरत्नाकरः-2.105-106 50. मोलसंहिता-20.3
51. सुश्रुतसंहिता, सूत्रस्थानम्-14.3/30-13.14
52. सुश्रुतसंहिता-सूत्रस्थानम्-16.27-29, चिकित्सास्थानम्-7.33
53 ऋग्वेद सायणभाष्यः-7.33.13 54. वृक्षायुर्वेदः-271-273
55. महाभारतम्, शान्तिपर्वम्-अध्यायः-184.12.18

- डॉ. ललित मोहन तिवारी
सहायकाध्यापक (एल.टी.) संस्कृत
रा.इ.का. बघर, कपकोट (वागेश्वर)

# दर्शनान्तरीयसिद्धान्तविवेचनपुरस्सरं शाब्दिकदिशा प्रमाणविमर्शः-

गोविन्दशुक्लः

भारतीयदर्शनपरम्परायां प्रमाणविचारः क्रियते चेत् सर्वेषां दर्शनानां चिन्तनभेदात् प्रमाणेष्वपि भेदः दृश्यत एव। तत्राऽपि भारतीयदर्शनस्यापि आस्तिकनास्तिकभेदेन भेदो जायते। एकः समुदायः एतादृशः यो वेदं प्रामाण्यत्वेनाऽङ्गीकरोति सः नास्तिकः, अपरश्च ये वेदं प्रमाणत्वेन न स्वीकुर्वन्ति ते नाऽस्तिकाः। वेदः शब्दराशिः अतः वेदप्रामाण्यवादिनां मते शब्दप्रमाणन्तु अवश्यमेव वर्तते परञ्च ये वेदाऽप्रामाण्यवादिनः तेषां मते न शब्दप्रमाणम्।

यदि प्रमाणस्वरूपविषये विचारः क्रियते चेत् सः (प्रमाता) येनार्थं प्रमिणोति तत् प्रमाणम् इति प्रमाणस्य स्वरूपम् वात्स्यायनेन भणितम्। एतेन प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणं निगद्यते। लक्षणार्थज्ञानाय लक्षणघटकप्रतिपदानां ज्ञानमपेक्षितमिति धिया आदौ करणपदार्थविषये विचारो विधीयते। महर्षिपाणिनिना 'साधकतमं करणम्' इति सूत्रेण करणसञ्ज्ञा विहिता। फलोत्पत्तौ बहुनि कारणानि भवन्ति तेषु कारणेषु यद् प्रकृष्टतमं कारणं तद् करणमिच्युत्यते। तच्चाऽव्यवहितपूर्ववृत्तित्वरूपमिति। पुनश्च प्रमापदार्थविषये विचारः क्रियते। प्रमायाः स्वरूपं प्रति दर्शनेषु भिन्नं भिन्नं महर्षिभिः प्रतिपादितं तथापि प्रमारूपलक्ष्यस्य एकत्वात् लक्षणेषु प्रायः पर्यायत्वं दृश्यते। यथा तार्किकैः प्रमायाः स्वरूपम् एवं प्रत्यपादि- यथार्थानुभवः प्रमा[1] इति। तद्वति तद्प्रकारकं ज्ञानं यथार्थः, ज्ञातविषयकं ज्ञानं स्मृतिः तद्व्यतिरिक्तमनुभवः अर्थात् इन्द्रियार्थसन्निकर्षजन्यं यज्ज्ञानं तदनुभव इति। अस्मिन् लक्षणे यथार्थपदेन अयथार्थज्ञानस्य व्यावृत्तिः एवञ्च अनुभव इत्युक्ते स्मृतेः व्यावृत्तिरिति।

असन्दिग्धाविपरीताऽनधिगतविषयकचित्तवृत्तिः प्रमा[2] इति प्रमालक्षणं साङ्ख्योक्तम्। असन्दिग्ध इत्यस्य अर्थः सन्देहरहितमिति। यथा रज्जौ सर्पज्ञानं सुक्तौ रजतज्ञानं सन्दिग्धज्ञानं वर्तते तादृशज्ञानव्यावृत्तये असन्दिधेति। अविपरीतविषयिका एवञ्च या अनधिगता अर्थात् पूर्वस्मादज्ञाता तद्विषयिका या चित्तस्य वृत्तिः सा प्रमेति। एतेन लक्षणेन ज्ञायते यत् सङ्ख्यानां मते चित्तवृत्तिः एव प्रमा न तु तस्मादतिरिक्तमन्यद् ज्ञानमिति।

अद्वैतवेदान्तिभिः प्रमायाः स्वरूपमेवं प्रत्यपादि- स्मृतिव्यावृत्तं प्रमात्वमनधिगताबाधितार्थविषयकज्ञानत्वम्, स्मृतिसाधारणं त्वबाधितार्थविषयकज्ञानवत्वम् [3]। अनधिगतम् अबाधिकविषयकञ्च यज्ज्ञानं सा प्रमा उच्यते। अबाधितविषयकमित्युच्यमाने यस्य ज्ञानस्य उत्तरकाले ज्ञानान्तरेण बाधः स्यात् तादृशज्ञानस्य व्यावृतिर्जायते। अत्र जिज्ञासा जागर्ति यत् ज्ञानस्य क्षणमात्रवृत्तित्वात् धारावाहिकक्रमेण प्रथमक्षणोत्पन्नज्ञानेन द्वितीयक्षणस्य ज्ञानस्योत्पन्नत्वात् द्वितीयक्षणस्य ज्ञानं कथम् अनधिगतम्। अस्य समाधानमेवङ्क्रियते तद् तद् क्षणभेदाद् तत्क्षणविशिष्टं ज्ञानं भिद्यते एतेन प्रथमक्षणविशिष्टम् ज्ञानं भिन्नम् एवञ्च द्वितीयक्षणविशिष्टं ज्ञानं भिन्नमिति। पुनः शङ्क्यते यत् वेदान्तिनां मते तु ब्रह्मज्ञानान्तरं

ब्रह्मणः अतिरिक्ताऽन्यस्य कस्यचिद् वस्तुनः पारमार्थिकी सत्ता नाऽस्ति अपितु इदं जगत् भ्रमात्मकं तर्हि ब्रह्मज्ञानेन जगति विद्यमानसर्वविधवस्तुज्ञानस्य बाधे कथं घटः, पटः इत्यादि ज्ञानं प्रमात्मकं स्याद्। तदर्थं प्रमायाः लक्षणे संसारदशायामिति विशेषणं योजनीयं तथाहि संसारदशायां घटपटादीनां यज्ज्ञानमबाधितं स्यात् सा प्रमा। तथोक्तं– ब्रह्मसाक्षात्कारनन्तरं हि घटादीनां बाधः, यत्र तस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदिति श्रुतेः। न तु संसारदशायां बाधः, यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति श्रुतेः। तथा चाबाधितपदेन संसारदशायामबाधितत्वं विवक्षितमिति न घटादिप्रमायामव्याप्तिः। तदुक्तम्–

**देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः।**
**लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्।।** [4]

मीमांसकेषु कुमारिलभट्टेन प्रमास्वरूपमेव प्रत्यपादि–

**औत्पत्तिकगिरा दोषः कारणस्य निवार्यते।**
**अबाधो व्यतिरेकेण स्वतस्तेन प्रमाणता।।**
**सर्वस्याऽनुपलब्धेऽर्थे प्रामाण्यं स्मृतिरन्यथा।।**[5]

प्रभाकरेण प्रमायाः स्वरूपं प्रत्यपादि– अनुभूतिः प्रमा[6] इति। सा अनुभूतिः स्मृतिव्यतिरिक्ता। इदं रजतमित्यादिषु ज्ञानस्थलेषु इदमशं प्रत्यक्षज्ञानविषयम् एवञ्च रजतमित्याकारकं ज्ञानं स्मृतिजन्यम् अत एव शक्तौ यद् रजतज्ञानं जायते न सा प्रमा।

यथावस्थितव्यवहारानुगुणं ज्ञानं प्रमा इति प्रमायाः लक्षणं यतीन्द्रमतदीपिकायां प्रत्यपादितं वर्तते। वस्तुनः यद् वास्तविकं स्वरूपं तथैव वस्तुव्यवहारानुकूलं ज्ञानमेव प्रमा उच्यते। लक्षणेऽस्मिन् यथावस्थितपदेन संसयविपर्ययादीनां व्यावृत्तिर्जायते।

बौद्धदर्शने प्रमाणं तज्ज्ञानं वर्तते यदज्ञातार्थं प्रकाशयति एवञ्च वस्तुस्थितिविरुद्धं न (अविसंवादी) स्यात् अर्थात् प्रमाणं तु नवीनार्थस्य ज्ञापकमवश्यमेव भवति तस्मिन् तथा वस्तुस्थितौ कथमपि विसंवादः (असामञ्जस्य) न स्यात्। तथोक्तं धर्मकीर्तिना–

**प्रमाणमविसंवादी ज्ञानमर्थक्रियास्थितिः।**
**अविसंवादनं शाब्देप्यभिप्रायनिवेदनात्।।**[7]

यज्ज्ञानं कल्पनायामवलम्बितं भवति तद् विसंवादी तथा च यज्ज्ञानमर्थक्रियायामवलम्बितं तदविसंवादी।[8]

बौद्धसिद्धान्तवत् जैनदर्शनेऽपि प्रमायाः स्वरूपं दृश्यते। अष्टशतीग्रन्थे जैनाचार्येणाकलङ्केन प्रमाणमविसंवादीज्ञानम्, अनधिगताधिगमलक्षणत्वादिति[9] प्रमायाः लक्षणं प्रतिपादितम्। अत्र अनधिगताऽधि गतं नाम पूर्वेणाज्ञातस्य अधिगमनं ज्ञानमेव प्रमा उच्यते परञ्च सा प्रमा अविसंवादी स्यात् अर्थात् यथार्थविषयकं स्यादिति।

इदानीं शाब्दिकदिशा प्रमाणस्वरूपविषये विचारः विधीयते। महाभाष्यकारेण भगवता पतञ्जलिना

उपमानानि सामान्यवचनैः[10] इत्यस्मिन् सूत्रे प्रमायाः स्वरूपविषये विचारयता अवोचि- मानं हि नामानिर्ज्ञातज्ञानार्थमुपादीयते अनिर्ज्ञातमर्थं ज्ञास्यामीति। तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानमिति।[11] अत्र प्रदीपे उक्तं यथा प्रस्थादि। तेन साकल्येन मेयं परिच्छिद्यते।[12] इदं भाष्यवचनं कैयटवचनञ्च स्पष्टीकुर्वन् नागेशः ब्रवीति- अनिर्ज्ञातार्थस्य साकल्येन ज्ञापकत्वं हि तत्त्वम्। यथा प्रस्थाद्यज्ञातस्य परिमाणरूपार्थस्य साकल्येन ज्ञापकमिति[13]। एतेन अनिर्ज्ञातार्थस्य साकल्येन ज्ञापकत्वमिति प्रमायाः लक्षणं निगद्यते। अत्र पूर्वेण निर्ज्ञातस्य वस्तुनः साकल्येन ज्ञानमेव प्रमा। अत्र अनिर्ज्ञातार्थस्य इत्यस्य या षष्ठी तस्या विशेष्यत्वमर्थः, साकल्येन इत्यत्र स्वार्थे चतुर्वर्णादीनां स्वार्थे उपसङ्ख्यानम् इति ष्यञि प्रत्ययः तृतीयार्थः प्रकारत्वम्। एतेन अनिर्ज्ञातार्थविशेष्यकं सामान्यविशेषधर्मादिरूपसम्भावितसकलध र्मप्रकारकं ज्ञानं प्रमा इति वाक्यार्थः[14]। यः अर्थः पूर्वस्मान्न ज्ञातं तस्य अज्ञातस्य साकल्येन ज्ञानमेव प्रमा उच्यते। यथा प्रस्तरस्य चक्षुरिन्द्रियेण सह संयोगे तस्य अज्ञातस्य प्रस्तरस्य यज्ज्ञानमुत्पद्यते सा प्रमा। लक्षणे यद् साकल्येनेति पदं निर्दिष्टं तस्य कोऽर्थश्चेदुच्यते साकल्येन इत्यनेन प्रमाया अबाधितार्थविषयकत्वं गम्यते। बाधितार्थविषयकं हि ज्ञानं नानिर्ज्ञातमर्थं साकल्येन परिच्छिनत्ति। विशेषधर्माविषयत्वात्।[15]

साकल्येन इत्यनेन संसयविपर्ययादीनां निरासः। संसयविपर्ययादिस्थले पदार्थस्य सामान्यरूपेण ज्ञानं भवति एवञ्च विशेषज्ञानदशायां तस्य बाधो जायते। यथा इदं रजतमिति ज्ञाने चाकचिक्यादिना रूपेण रजतस्य ज्ञानमुत्पद्यते चेत् इदत्वं चाकचिक्यादिकं सामान्यं ज्ञानम् एवञ्च शुक्तित्वादिकं विशेषज्ञानम्। शुक्तित्वेन शुक्तिज्ञाने सति यत् रजतप्रतीतिर्जाता सा बाधिता भवति।

प्रत्यक्षादिषु स्थलेष्वपि सामान्यरूपेण विशेषरूपेण च ज्ञानमुत्पद्यते। यथा 'अयं घटः' इति ज्ञाने इदत्वेन घटत्वेन च घटविषयकं ज्ञानं जायते तस्मिन् ज्ञाने इदत्वं साधारणो धर्मः एवञ्च घटत्वं विशेषो धर्मेति।

पुनः विचार्यते यत् निर्ज्ञातार्थस्येत्यत्र विषयार्थे जायमानेन क्तप्रत्ययेन अर्थस्य गतार्थत्वात् पुनः लक्षणे अर्थपदं किमर्थं दत्तञ्चेदुच्यते 'शब्दज्ञानाऽनुपाती वस्तुशून्यो विकल्पः' इति योगदर्शनीयसिद्धान्तस्याऽपि व्यपदेशिवद्भावाभावपक्षे टिसञ्ज्ञादिसिद्धये शब्दशास्त्रे स्वीकृततया तत्र बाह्यसत्ताशून्य एवार्थो विकल्पात्मकवृत्त्या गोचरीक्रियते, न प्रमया इति विकल्पवृत्तौ प्रमालक्षणं माऽतिप्रसाङ्क्षीदिति अर्थपदम्[16]।

प्रमाणभेदविषये विचारः क्रियते चेत् वस्तुभूतार्थवादिचार्वाकेण एकमेव प्रत्यक्षप्रमाणम् अङ्गी-क्रियते[17]। प्रत्यक्षानुमानभेदेन प्रमाणस्य द्वैविध्य स्वीकुर्वन्ति वैशेषिकाः। एतेषां मते शब्दोपमानयोर्न पृथक् प्रमाणत्वं। अनुमानेनैव अनयोः गतार्थता जायते। तथोक्तं किरणावल्याम्-

**शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते।**
**अनुमानगतार्थत्वादिति वैशेषिकं मतम्।।**[18]

बौद्धा अपि वैशेषिकवत् प्रमामद्वयम् अङ्गीकुर्वन्ति। साङ्ख्यकाः यौगिकाश्च प्रत्यक्षा-ऽनुमानागमाश्चेति[19] प्रमाणत्रयवादिनः। तथोच सङ्ककारिकायां विवृणुते-

**दृष्टमनुमानमाप्तवचनञ्च सर्वप्रमाणसिद्धत्वात्।**

**त्रिविधं प्रमाणमिष्टम्, प्रमेयसिद्धिः प्रमाणाद्धिः।।**[20]

उपमानेन सह चत्वारि प्रमाणानि स्वीकुर्वन्ति न्यायशास्त्रीया:– प्रत्यक्षानुमानोपमानशब्दा: प्रमाणानि[21]। अर्थापत्त्या सह पञ्चप्रमाणस्वीकृतवन्त: प्रभाकरा: तेषामनुयायिकाश्च। एतद्व्यतिक्तमनुपलब्धिसहितं षड्प्रमाणवादिन: भाट्टा: अद्वैतवेदान्तिनश्च। सम्भवैतिह्यसहितमष्टप्रमाणं मनुते पौराणिका:। जैनानां मते प्रत्यक्षपरोक्षभेदान प्रमाणं द्विविधम्। परोक्षं स्मृतिप्रत्यभिज्ञानोहानुमानागमभेदात् पञ्चधा।

शाब्दिकानां मते तु प्रत्यक्षपरोक्षभेदेन प्रमाणं द्विविधम्। परोक्षं तु अनुमानशब्दार्थापत्तिभेदाद्भिद्यते। शाब्दिकसिद्धान्ते उपमिति: न प्रमा अत एव तत्करणं नोपमानप्रमाणं यतोहि उपमितिस्थले तु सामान्यज्ञानमेव जायते न तु विशेषज्ञानं यतोहि गोर्हि गवय इति ज्ञाने गोनिर्ज्ञात: गवयोऽनिर्ज्ञात: तस्याऽनिर्ज्ञातस्य गवय: ज्ञाने गोनिष्ठकेषाञ्च धर्माणां सादृश्यात् गवयस्य ज्ञानं जायते न तु साकल्येन अत: प्रमालक्षणस्याऽप्रवृतौ न उपमिति प्रमा न हि तत्करणम् अनुमानप्रमाणं तथोक्तमुद्योते– गोर्हि गवयं कतिभिश्चिद्धर्मैरेव तद्गतैर्ज्ञापयति न साकल्येनेति[22]।

एतद्व्यतिरिक्तं भर्तृहरिणा अभ्यासाऽदृष्टप्रतिभा अपि पृथक् प्रमाणत्वेन स्वीक्रियन्ते। तेषां मते एतेषां प्रमाणानां प्रमाणान्तरेषु समावेश: कर्तुं न शक्यते। प्रतिभाया: पृथक् प्रमाणत्वं प्रतिपादयन्नाह भर्तृहरि:–

**परेषामसमाख्येयमभ्यासादेव जायते।**
**मणिरूप्यादिविज्ञानं तद्विदां नाऽनुमानिकम्।।**[23]

तत्र यथा मणिस्वर्णादीनां यज्ज्ञानं जायते न तु तज्ज्ञानं प्रत्यक्षेण न हि अनुमानेन अपितु पौन: पुन्येन परिशीलनेन अभ्यासात् तज्ज्ञानस्योत्पत्तिर्जायते। एवं हि मणिरूप्यादिविज्ञानं प्रत्यक्षानुमानागम–प्रमाणाजन्यत्वादभ्यासमात्रप्रमाणजन्यमिति सिद्धम्।[24]

या: खलु रक्ष: पितृपिशाचानां सिद्धयो व्यवहितविप्रकृष्टातीतादिविज्ञानानि तानि प्रत्यक्षमनुमानं च व्यतिक्रिम्य व्यवस्थितानि, तदजन्यत्वात्। इदं चोपलक्षणमागमाभ्यसयोरपि, अतस्तेषां ता: सिद्धय: कर्मजा एव स्वकृतसुकृतदुष्कृतान्यतरकर्मजन्या एवेत्यदृष्टमपि पञ्चमं प्रमाणमिति सिद्धम्[25]–

**प्रत्यक्षमनुमानं च व्यतिक्रिम्य व्यवस्थिता:।**
**पितृरक्ष:पिशाचानां कर्मजा एव सिद्धय:।।**[26]

प्रतिभाऽपि एतव्यतिरिक्तं प्रमाणान्तरम्–

**विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते।**
**वाक्यार्थ इति तामाहुः पदार्थैरुपपादितम्।।**[27]

मौनिश्रीकृष्णभट्ट: शब्दार्थतर्कामृते प्रत्यक्षं शब्दश्चेति प्रमाणद्वयं शाब्दिकानामते मनुते। अनुमानस्य पृथक् प्रमाणत्वमपि खण्डितम्, तथोक्तं अनुमानस्य प्रत्यक्षेणैव गतार्थता अत: नाऽस्त्यावश्यकता अनुमानस्य पृथक् प्रमाणत्वकल्पनाया:।[28]

**संदर्भ–**

1 तर्कसङ्ग्रह:– प्र. परि.   2 सङ्ख्यतत्त्वकौमुदी, कारिका ४   3 वेदान्तपरिभाषा, प्रत्यक्षपरिच्छेद:।

4वेदान्तपरिभाषा, प्रत्यक्षपरिच्छेदः, पृ० १८ 5 श्लोकवार्तिकः, औत्प., श्लोक १०-११
6 मानमेयोदयः, पृ. 9 7 प्रमाणवार्तिकम् २।१ 8 प्रामाणयं व्यवहारेण शास्त्रं मोहनिवर्तनम्। तदेव २।४
9 अष्टशती, पृ. १७५ 10 पाणिनीयाष्टाध्यायी २।१।५४11 महाभाष्यम् २।१।५४
12 महाभाष्यम्, प्रदीपः २।१।५४ 13 महाभाष्यम्, उद्योतः २।१।५४ 14 पाणिनीयव्याकरणे प्रमाणसमीक्षा, पृ० सं० ३-४
15 तत्रैव २ 16 तत्रैव १८ 17 प्रत्यक्षमेवैकं प्रमाणमिति चार्वाकाः। 18 किरणावली १४०-१४१
19 प्रत्यक्षानुमानागमाः प्रमाणानि। योगसूत्रम्, समाधिपादे ७ 20 साङ्ख्यतत्त्वकौमुदी, कारिका ४
21न्यायसूत्रम् १।१।३ 22 महाभाष्यम्, उद्योतः २.१.५४ 22 वाक्यपदीयम्, ब्रह्मकाण्डम् ३
25 वाक्यपदीयम्, ब्रह्मकाण्डम्, अम्बाकर्तृकटीका, पृ०सं० ८१
25 वाक्यपदीयम्, ब्रह्मकाण्डम् अम्बाकर्तृकटीका, पृ०सं० ८१
26 वाक्यपदीयम्, ब्रह्मकाण्डम् ३६ 27 वाक्यपदीयम्, वाक्यकाण्डम् १४३
28 प्रत्यक्षं शब्दश्चेति द्वयमिति शाब्दिकाः। अत्र यथोपनीतभानेन अनुमानस्य गतार्थता। शब्दार्थतर्कामृतम्, पृ० ४

**सन्दर्भग्रन्थसूची-**

1 व्याकरणमहाभाष्यम्, महामहोपाध्यायश्रीनागोजिभट्टविरचितेन महाभाष्यप्रदीपोद्योतोद्भासितेन महामहोपाध्यायश्री-कैयटोपाध्यायविरचितेन प्रदीपेन विराजितम्, श्रीगुरुप्रसादशास्त्री, प्रतिभाप्रकाशनम्, दिल्ली।

2 पाणिनीयव्याकरणे प्रमाणसमीक्षा, आचार्यः श्रीरामप्रसादत्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

3 न्यायसिद्धान्तमुक्तावली, विश्वनाथपञ्चाननभट्टाचार्यविरचिता, पं. ढुण्ढिराजशास्त्रिसम्पादिता, विद्याविलासप्रेस, वाराणसी, 1925

4 शब्दार्थतर्कामृतम्, मौनिश्रीकृष्णभट्टविरचितम्, सं. ललितकुमारत्रिपाठी, राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझापरिसरः, प्रयागः

5 वाक्यपदीयम्, ब्रह्मकाण्डम्, भर्तृहरिप्रणीतं, हरिवृषभकृतया स्वोपज्ञवृत्त्या एवं पद्मश्रीपण्डितरघुनाथशर्माणा विरचितया अम्बाकर्त्रीव्याख्यया च सहितम्, सरस्वतीभवनग्रन्थमाला 91 सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, तृतीयं संस्करणम्, 1988

6 वाक्यपदीयम्, वाक्यकाण्डम्, भर्तृहरिः, पुण्यराजकृतटीका एवं रघुनाथशर्माकृता अम्बाकर्त्रीव्याख्या सहिता, सरस्वतीभवनग्रन्थमाला 91 सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, द्वितीयसंस्करणम् 19

7 न्यायसूत्रम्, गौतम, वात्स्यायनभाष्यम्, आनन्दाश्रममुद्रणालयः,ख्रिस्ताब्दाः १९२२।

8 वेदान्तपरिभाषा, धर्मराजाध्वरीन्द्र, सं श्रीपञ्चाननभट्टाचार्यशास्त्री, आगमानुसन्धानसमिति, कलिकाता, शाकाब्द १८८०।

9 पातञ्जलयोगसूत्राणि, भगवत्पतञ्जलिः, व्यासभाष्यम्, हरिनरायण आप्टे, आनन्दाश्रममुद्रणालयः, खीस्ताब्दाः १९०४।

शोधछात्रः, व्याकरणविभागः
रा०सं०सं०,भोपालपरिसरः,भोपालः,म०प्र०

# आचार्य ज्ञानसागरस्य काव्येषु साहित्य-सौष्ठव-समीक्षणम्

- शैलेन्द्रकुमार

वाग्विदग्ध-कवेराचार्य ज्ञानसागरकृत-रचनासन्दोहस्य सोत्कर्ष-साफल्यं तस्यालङ्कृत-गम्भीर-रुचिरभाषाशैलीमाश्रयति। तद्भाषायाः प्रवाहमयत्वादेव तद्रचनाः लोकप्रियत्वं प्राप्तवस्यः।

रचनागततत्त्वेषूपादानेषु वा भाषा मूलतत्त्वमस्ति। भाषैव सृजनशीलताया मूलाधारोऽस्ति। आचार्यो ज्ञानसागरः सुदर्शनोदयमहाकाव्यस्य मङ्गलाचरणपद्ये स्वयमेवाङ्गीकरोति-

**वागुत्तमा कर्मकलङ्कजेतुर्दुरन्तदुःखाम्बुनिधौतु सेतुः।**
**ममास्त्वमुस्मिंस्तरणाय हेतुरदृष्टपारे कविताभरे तु॥**[1]

महाकवे पद्यात्मक रचनासु सहज-सरल-सरस-लालित्यमयी भाषा प्रयुक्ताऽस्ति, किन्तु गद्यभागस्य भाषा क्लिष्टा समासबहुला अत एव दुरूहाऽस्ति। ऐन पदप्रयोगेण तद्व्याकरणज्ञाननैपुण्यं भाषाप्रयोगाधिकारं च प्रतिपादयति। पद्येषु नादमाधुर्य-सौन्दर्य चित्रात्मकत्वं तस्य पाण्डित्यं कवि-हृदय-सारस्यं च व्यनक्ति। अनया दृष्ट्या दयोदयचम्पूकाव्यस्य प्राञ्जलगद्यमागेषु समासबहुलायाः गौडीति गद्यशैल्याः, अल्पसमासायाश्च ललितमधुरायाः वैदर्भि-गद्यशैल्या प्रसंगा हृदयावर्जकतया उदाहरणीया सन्ति। एषा दयोदयकाव्यरचना चम्पूकाव्यमस्ति, अस्य काव्यस्य सप्त-लम्बक-प्रतिपादित-गद्यपद्यविषयेभ्यः सहृदय-पाठकाः समानरूपेण रसानन्दमनुभवन्ति।

संस्कृत-प्राकृत-हिन्दीभाषासु समानरूपेण प्रयोगाधिकार-प्रभोः कविवराचार्यज्ञानसागरस्य सर्वरचनासु विशेषतः काव्येषु पदे पदे वाग्वैदग्ध्यमर्थाद् भाषिकसौन्दर्य सोत्कर्ष दरीदृश्यते। मधुरः-मनोहर-रसप्रवणभाषया सः पात्राणां हृद्यभावानां सहजसुबोधामभिव्यक्तिं प्रादात्। महाकाव्येषु प्रबन्ध-विन्यास-वैदग्ध्यमेव विशेषेणोल्लसति। एषु काव्येषु ललितालङ्कृता प-शय्या प्रयुक्ताऽस्ति तेन सर्वत्र मनोरमसोन्दर्यस्यैवाधानमाभूत्। इदमेव कारणं यद् विवेच्यकवेः सकलकृतिषु सौकुमार्य-लावण्य-सारल्य-तारल्य-विम्बविधान- वचोभंगिमादयो दृश्यन्ते। अत्र कवेर्भाषिक-चिन्तन-सामान्यं दृश्यते। तीदया विस्मयकारिणी शब्द-साधना निश्चितरूपेण वन्दनीया ग्राह्यचास्ति। यतः स शब्दज्ञः कुशलः शब्दस्रष्टा चाप्यस्ति।

आलोच्यकवेः रचनासु वर्ण-विन्यास-सौष्ठवमनुप्रासयमकाद्यलङ्कारैः, माधुर्यादि-व्यञ्जक-वर्णप्रयोगैरुपनागरिकादिवृत्तिभिः, वैदर्भिप्रभृति-रीतिभिश्च समृद्धिमाप। जयोदयमहाकाव्येऽनुप्रास-यमक-श्लेषाद्यलंकारगतं, ओजोमाधुर्यादि गुणगतमुपनागरि कादिवृत्तिगतं, प्रसादगुणभूमिषतं कोमलावृत्तिगतं शब्दसौष्ठवं, प्रभातवर्णनादि प्रकृतिचित्रणे सर्वविध-रामणीयकादिकं दर्शनीयमस्ति।

वाग्वैदग्ध्यदृष्ट्याऽन्त्यानुप्रासादि-प्रयोगस्य स्वकीयं विशिष्टं लालित्यमयं महत्वमस्ति। लयात्मकताया संगीतात्मकतायाश्च प्रभाव-परिधावन्त्यानुप्रासरचनाऽतिशयेन रुचिरा भवतिं महाकविः प्रायशः सर्वकाव्येष्वेवान्त्यानुप्रासप्रयोग शृंखलामन्वपालयत्। तेन शब्द शास्त्रे महाकवेः प्रयोग-नैष्णात्यं प्रतिभासते। एवद्विपरीतं स यत्र तत्र संस्कृतेतर-शब्दानामपि प्रयोगमकरोत्।

लक्षणा-व्यंजनाशब्दशक्ति-प्रयोग-सामर्थ्यं वाग्वैदग्ध्ये आकर्षणं जनयति। ईदृशः शब्द-प्रयोगः सुष्टुर्गरिमायश्च भवति, परन्तु अर्थबोधादनन्तरमानन्दप्रदश्चापि भवतिं अत्र साभिप्राय-विशेषणानि स्वकीय-कार्यं कुर्वन्ति। यथा जयोदयमहाकाव्ये 'स्मरदीपिका- मदनधरा'दि-शब्दाः सुलोचनायाः कृते, ''सुपर्ववाहिनी'' इति पदं स्वर्गङ्गायाः कृते, 'नाकि- जनपदं देवेभ्यः, ''जरद्गवशब्दश्च वृद्ध-वृषभाय प्रयुक्त-पदानामर्थावर्जने-व्यञ्जनाशक्तेराश्रयो महनीयोऽस्ति। आधुनिककाव्यशास्त्रीय-बिम्ब-विधानप्रयोगोऽपि अस्य रचनासु सुलभोऽस्ति। वीरोदयकाव्यस्य ऊनविंश-सग्रे स्याद्वाद-प्रबोधाय प्रयुक्त-विम्बाः स्तुत्याः प्रशस्ताश्च सन्ति स्पर्श-दृष्टि-श्रुति-स्वादाद्यैन्द्रिय-संवेदनाधारित- विम्बा अपि स्तुत्याः सन्ति। बहुत्र अमूर्तेभ्यः मूर्तबिम्बानां मूर्तेभ्यश्चामूर्तबिम्बानां विधानमपि एतमस्ति, येन रोचका वृङ्गिङ्गता।

रचनासु यत्र तत्र प्रायशः ईदृशा अपि शब्दाः सन्ति- प्राचुर्येण प्रयुक्ताः, ये सामान्यतः लोकेऽप्रचलिताः सनित, वा निर्वचनात्मकानर्थान् द्योतयन्ति। यथा जयोदये- ''धीवरः''-श्रेष्ठ-बुद्धिसम्पन्नः इन्दुः भूषणेऽर्थे, धूर्तः- कनके (धतूरा) इत्यर्थे, वृषी-धर्मात्मार्थे, नियान=प्रयाणार्थे, शर-जलेऽर्थे, नर वति कमलेऽर्थे, शिव इति जलेऽर्थे, मीर= समुद्र, पौष=पुद्धार्थे, तृणता-कामुकताऽर्थे, आशु धान्यार्थे प्रयक्ताः सन्ति। ज्ञातव्यमिदं यदिमे शब्दार्था प्रायशः विश्वलोचनकोशाधारिताः सन्ति।

शब्दकोशानुसारं ''कानीन'' शब्दार्थः कन्या-पुत्र इत्यस्ति, किन्तु-प्रकृतमहाकवेर्ज्ञान- सागरस्य साहित्ये 'कानीन-जन'' शब्दप्रयोगः कन्या-पक्षीय-जनानां कृते कृतः, 'प्रतीप-पत्नी' पदप्रयोगः शत्रुपत्नी-इत्यर्थे विधीयते किन्तु अस्य काव्ये ''सपत्नी''त्यर्थेऽपि प्रयुक्तः। कुज धातुः पक्षी-रव'इत्यर्थे प्रयुक्तः, किन्तु जयोदयमहाकाव्येहुडकवाद्य-नादस्याप्यर्थे प्रयक्तः- ''हुडकश्चुकूज''।

महाकविरसौ मुनिर्ज्ञानसागरः जैनधर्मानुयायी आसीत्, अतस्तेन जैनधर्माभिमत- साहित्य-सागरे यो विशालः शब्दकोशस्तस्य मुक्तहृदयेन प्रयोगः कृतः यतः एवंविधाः शब्दाः जैनेतर-साहित्येऽप्रचलिताः आसन्, अतस्तदल्पज्ञ-समालोचकैरीदृशः शब्दप्रयोगो- ऽप्रयुक्तत्वदोषपूर्णो मतः। किन्तु नैतदुचितम्। यतः एतादृशशब्दप्रयोगः शब्दशास्त्रसम्मतः, व्याकरणसम्मतः, तस्मादत्र एतादृश-शब्दप्रयोगविषये अप्रयुक्तत्व-दोषाक्षेपः सर्वथाऽनुचितः।

आचार्यज्ञानसागरः व्याकरणशास्त्रस्य प्रगल्भपण्डितो विद्वान् आसीत्। अतस्तद- वाग्वैदग्ध्यस्य विविधायामेषु- व्याकरणस्य विशिष्टं महत्त्वमस्ति। शब्दज्ञानम्, शब्दनिर्माणं, सुष्ठु-साधु-शब्दप्रयोगः, कोश-व्याकरणज्ञानं विना न भवितुमर्हति। अत एवोक्तं पतञ्जलिना- ''एकः शब्दः सम्यग्ज्ञातः सुष्ठु सम्यक प्रयुक्तः स्वर्गे लोक च कामधुग्भवति''-

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।**[2]

वाक्पदीय ब्रह्मकाण्ड असौ महाकविर्महामुनिर्ज्ञानसागरः स्वरचनासु कदाचित् काव्यमाध्यमेन व्याकरणस्य, कदाचिच्च व्याकरणमाध्यमेन काव्यस्य हि प्रतिपादनं करोति। जयोदयकाव्ये यतिवर्णनप्रसंगे व्याकरणसम्बद्ध-शब्दावल्याः उत्तमप्रयोगः कृतः, यथा-

**न वर्णलोपः प्रकृतेर्न भङ्गः कृतोऽन प्रत्ययवत् प्रसङ्गः।**

**यत्र स्वतो वा गुणवृद्धिसिद्धिः प्राप्ता यदीयापदुरीति ऋद्धिम्।।**

- जयो. 1//31

एतदतिरिक्तं क्वचिदनेककर्तृणामेकक्रियाप्रयोगेण, क्वचिदनेकक्रियाप्रयोगेण, क्त-तन्-तृच्-ण्वुल्-मतुब्ल्युट्णिनि-मनिन्-क्विप्-क्तिन्-आदिकृदन्तानां, यत्-ष्यञ्-तल्- टाप्-ङीबादि तद्धित-प्रत्ययान्त शब्दानां तथा च सम्यगार्थ-व्यञ्जकतायाः कृते प्रेरणेच्छा- वीप्सातिशयाद्यर्थ-प्रकाशनाय प्रक्रियाभाग-प्रयोगाय, नामधात्वविकृत-शब्दप्रयोगेण, अपि- खल्वधुना-तु-हि-इव-वै-आशु- यथा-तथाऽव्ययादिप्रयागेणास्य मुनेराचार्यज्ञानसागरस्य व्याकरण-ज्ञान-वैभवं प्रकटीभवति।

एवमेव क्वचिन्नवशब्दप्रयोगेण, यथा- समर्थिनी-आसिका-सशम्भुक्-रक्ताक्षिका- मार्गण-प्रमादी-वपुष्मदादिभिः शब्दै, क्वचिच्च लोकव्यवहारागत-संस्कृतेतरशब्दैरपि संस्कृत-शब्द-भण्डारं समार्द्धयत्। वामन-रचित-काव्यालङ्कार-सूत्रवृत्यनुकूलं-साहित्ये ते शब्दा ग्राह्याः, ये लोकभाषायां पुनः पुनर्व्यवह्रियन्ते।

आचार्यो ज्ञानसागरोऽर्थापकर्षोत्कर्षबोधाय प्र-पराद्युपसर्गाणां च वा ह-प्रभृति-निपातानां समुचित-प्रयोगमकरोत्, येन काव्यार्थे सरसता-वैशद्ययोः समावेशो जातः। तदुपसर्गवक्रतायाः चामत्कारिकप्रयोगः स्तुत्यः।

पूज्याचार्यवर्यस्याप्रतिमप्रतिभासमृद्ध-व्याकरण-वैदुष्येन तदीय-भाषिक-प्रागल्भ्यं पाण्डित्यं सौन्दर्यं चापि प्रकाशिते अभूताम्। कतिपयशब्दप्रयोगाः पाणिनीतर-विविध-व्याकरणैरपि साधिताः सन्ति।

आचार्यज्ञानसागरस्य साहित्ये नैके शब्दाः पाणिनिव्याकरणविरुद्धाः सन्ति, किन्तु तेषां सिद्धिरन्यव्याकरण-प्रक्रिया-सम्मताऽस्ति। यथा- सेवन्तामित्यात्मनेपदप्रयोगः पाणिनीयः, किन्तु प्रकृत-कवेः काव्येष्वस्य स्थाने सेवन्त्विति पाणिनिविरुद्धः पस्मैपदप्रयोगो बहुत्र दृश्यते। तथैव क्वचिदात्मनेपदिनः षह-मर्षणे इति धातोः सहन्ते इति इति प्रयोगस्य स्थाने सहन्ति इत्यपाणिनीयः प्रयोगो दृश्यते। भुजधातुः पालनेऽर्थे परस्मैपदीमक्षणार्थे चात्मनेपदी अस्ति, किन्तु ज्ञानसागर-काव्ये भक्षणार्थक-भुज-धातोरपि प्रयोगः परसमैपदे भुनक्ति इति रूपेण कृतः। एवमेव सेक्तुमित्यस्य स्थाने सिञ्चितुं, मार्ष्टुम् इत्यस्य स्थाने म्रष्टु, कामित- पदानामपाणिनीयः प्रयोगो दृश्यते। नपुंसकलिङ्गपठित-शब्दाः पुँल्लिंगे वा पुंम्पठिताः शब्दाः नपुंसकलिंगे प्रयुक्तास्तत् पाणिनेरनभिमतम्। एतादृशाः अपाणिनीय-पद-प्रयोगाः कविना कृताः।

अस्मिन् प्रसंगे एवं वक्तुं शक्यते- स्यात् सः संस्कृतभाषायाः सरलीकरणाय समुत्साहितः लिङ्ग-सन्धि -च्छन्दोरचना-व्यवसीाः नाऽपालयदिति सम्भवति। क्वचित्सन्धयो न विहिताः, क्वचिद्विसर्गाभावो न कृतः, यतः एतत् सर्व विवक्षाधीनं भवति।

महाकविर्बहुश्रुत आसीत्। पद्येषु भाव-पल्लवनाय वा छन्दोरचनादृष्ट्या शब्दभाण्डार- समृद्धये प्राचीनग्रन्थानां भृशम् अध्ययनमकरोत्। वीरोदयकाव्ये पुत्रपदार्थप्रकाशनाय 'तुज'' शब्दप्रयोगः कृतः।[3] अयं शब्दः वैदिकसात्यि विशेषतः ऋग्वेदे पुत्रेऽर्थे प्रयुक्तः। ''तुज'' शब्दः सायणेन व्याख्याता- ''गच्छत्यनेन आनृण्यं पिता'' इति ''तुक्'' पुत्रः''।

शब्दप्रयोगे व्युत्पतिगता, निरुक्तिगता वाऽन्वर्थता वा प्रसंगानुकूलचरितार्थता पूज्याचार्यस्यापरं वैशिष्ट्यमस्ति। स्त्रीमुखं दोषाकरः मिथ्याभाषणादिदोषैरस्ति, न तु चन्द्रवस्सुन्दरम्। अवगुणग्रहणात् स्त्री-अबला भवति, सा विपरीत-चेष्टाभिर्वामा भवति। पङ्के जायमानत्वात् कमलं पङ्कजं भवित- इत्यथमुपेक्ष्य वा तिरस्कृत्य, कविः- ''सुलोचनाहस्त-सृजनावशिष्ट- पङ्केनावर्जनेन सृष्टत्वात् तत् पङ्कजमस्ति।दुहिता च पितृपक्ष-पतिकुलयोर्द्विहितकारकत्वाद् दुहिता भवति। इत्थमेव जयोदयमहाकाव्ये बहुरूपार्ककीर्ति-करेणु-रञ्जनी-लक्ष्मी-कमला- पुरुषप्रभृति-पदानां विशिष्टाः व्युत्पत्ति-निरुक्तयः प्रयुक्ताः। यास्कपरम्परायां बहून्यार्थिक- निर्वचनानि प्राप्यन्ते, यथा- सुदर्शन-धर्म-सम्यगादिपदानि-निरुक्तानि। सम्यक् समञ्चतीत्येव हि सम्यगस्ति इत्यादि।

साहित्य-सौन्दर्य-दृष्ट्या जयोदयमहाकाव्ये भक्तिभाव- शृङ्गार-वीर-शान्तादिरस- परिपाकेन भवपक्षः प्राबल्यमगात्। तथा चात्र-अनुप्रास-यमकोपमोत्प्रेक्षापह्नुति-रूपक-विरोध- चित्राद्यलंकारप्रयोगो विविधच्छन्दः प्रयोगश्च कलापक्षं समर्द्धयत्।

वीरोदयमहाकाव्ये शान्तरसोऽङ्गीरसः, अन्येषां च शृङ्गाराद्भुत-वात्सल्य-भक्त्यादि- रसानां हृदयाकर्षिका योजना कृताऽस्ति। छन्दोनिर्वाहोऽपि सुरम्यः। अनुष्टुबिन्द्रवज्रोपेन्द्र-वज्रोपजाति-शार्दूलविक्रीडित-वसन्ततिलकादिच्छन्दांसि प्रयुक्तानि सन्ति। अलंकारप्रयोगः श्लाघनीयः। अनुप्रासान्त्यानुप्रासातिरिक्तं यमकोपमोत्प्रेक्षापह्नुति- भ्रान्तिमान्-परिसंख्याद्य- लंकारच्छविः प्रशस्त-श्लाघ्याऽस्ति।

कविनाऽमुना स्वकीय-समग्रसाहित्येऽधिकांशतया यमक-श्लेषोपमोत्प्रेक्षाऽनुप्रासा- द्यलंकाराः परमनैपुण्येन प्रयुक्ताः महाकवेर्वर्णनकौशलं परमप्रशंसनीयामस्ति।

अलंकारवत् कवेश्छान्दस-प्रौढिरपि प्रशंसनीया। समग्र-काव्य-साहित्ये छन्दाःप्रयोगोणा-नत्यानुप्रासेन, गयेतया, ध्वनिमैत्री-वर्णमात्रा-मैत्र्यादिकारणैरागत-सौष्ठवेन वाक्सौष्ठवं समपद्यत। स्व-भावानुरूपं यथाशक्ति प्रायः सर्वेषाः प्रचलितच्छन्दसां प्रयोगमकरोदेष महानुभावो महाकविः।

भाषा-शैल्योरविनाभाव-सम्बन्धो भवतिं भावपक्ष-कलापक्षयोः संयोजनस्य साधनं भवति शैली। काव्यशास्त्रे रीतिपदेन बुध्यते शैली। रीति रूपेण वैदर्भि-गौडि-पांचाली-लाटीति रीतयः (शैल्यः) काव्ये कविना ज्ञानसागरेण प्रयुक्ताः।

भाषाया: काव्यात्मकप्रभावमयत्व-सम्पादने लक्षणाव्यञ्जनोपेत- सूक्ति-लोकोक्तयोऽपि महत्त्वशालिन्यो भवन्ति। आभि: भाषायां समीवत्वं सशक्तत्वं चापि काव्ये विलसति। आचार्यवर्य: स्वकीय-साहित्ये सूक्तलोकोक्तीनां भृशं विशदं प्रयोगमकरोत्। लोकोक्तीनां संस्कृतीकृतं रूपं भाषिक-व्याकरणात्मकवैदग्ध्यं युष्णाति। 'या हिंस्यात् सर्वभूतानि', ''काकप्रहाराय यथैव रत्नम्'' ''तीर एवाद्य यावत्कलित: समीर:'' - इत्याद्युद्धरणानि कविना यथायथं श्लोकबद्धतया विरचितानि। (सोने में सुहागा) इति लाकोक्ते: संस्कृतरूपमस्ति- ''सुगन्धयुक्तापि सुवर्णमूर्ति:''।

वक्तुं शक्यते निष्कर्षरूपेण यज्ज्ञानसागरस्य समग्र-साहित्ये यत!-असाधारणं सोष्ठवं तत्र शब्दशक्ति-रीति-रसालंकारच्छन्द: प्रयोग-विलसित-वाग्वैदग्थ्यं, तद् या थार्थ्येन भृश-प्रशंसो वन्दनीयमसाध ारण-प्रतिभाद्योतकं चास्ति।

**सन्दर्भ-ग्रन्था:-**


1. सुदर्शनोदयमहाकाव्य पृष्ठ सं. 23, श्लोक सं.-2
2. वाक्पदीयम् ब्रह्मकाण्ड- 36
3. वीरोदयमहाकाव्य- 9/21, पृ. 91, 11/13 पृ. 107



शोधच्छात्र साहित्यविभाग

राष्ट्रिय संस्कृत संस्थान (मानित विश्वविद्यालय)

लखनऊ परिसर, लखनऊ-226010

# नाट्यशास्त्र उत्पत्ति एवं आचार्य परम्परा की समीक्षा

– डा. नीरज तिवारी

नाट्यशास्त्र विश्वसाहित्य का अप्रतिम ग्रन्थ है। नाट्यशास्त्र के उत्पत्ति तथा आचार्य पारम्परा की समीक्षा को दृष्टिगत रव कर समीक्षा की जा रही। वस्तुतः नाट्यशास्त्र को पञ्चम वेद भी कहा गया है।[1] नाट्यशास्त्र प्राप्तकर्ता या विस्तारक आचार्य भरतमुनि हैं। इस मे कुल 36 अध्याय या किन्ही किन्ही संस्करणों में 37 अध्यायो में नाट्यवेद के विविध पक्षों का प्रतिपादन है। नाट्यवेद के उत्पत्ति के सन्दर्भ मे कहा गया है कि देवलोक से मनुष्य लोक मे किस प्रकार आया इस विन्दु पर शास्त्र प्रमाण से मुख्य 3 सिद्धान्त प्राप्त होते हैं– प्रथम भरत द्वारा प्राप्त विचार जो की नाट्य शास्त्र मे वर्णित है, दूसरा सिद्धान्त शारदायन का है जो की अपने भावप्रकाशन् ग्रन्थ मे बताया है। तीसरा सिद्धान्त आचार्य नन्दिकेश्वर का है जो कि अपने ग्रन्थ अभिनयदर्पण मे प्रतिपादित किया है। मानव जगत मे नाट्यवेद के उत्पत्ति एवं परम्परा को लेकर आदि परम्परा को उल्लेखित करते हुए तथा क्रमवार उक्त तीनों सिद्धान्तो की समीक्षा निम्नवत् हैं–

**आचार्य भरत का सिद्धान्त**– नाट्यशास्त्र के साक्ष्यों अनुसार पता चलता है कि कदाचित् अनाध्याय काल के समय आचार्य भरत नित्य सन्ध्योपसान करके बैठे थे उसी समय अत्रि आदि ऋषियों ने आकर इन से पूछा कि आप ने वेद समान सामान्य नाट्यशास्त्र को बनाया है उसकी उत्पत्ति एवं आचार्य परम्परा का अतीत क्या है–

**समाप्तजप्यं व्रतिनं स्वसूतैः परिवारितम्।**
**अनध्याये कदाचित्तु भरतं नाट्य कोविदम्।**
**मुनयः पर्युयास्यैनमात्रेय प्रमुखाः पुरा।**
**प्रपच्छुस्ते महात्मानो नियतेन्द्रियबुद्धयः।**
**योऽयं भगवता सम्यग्ग्रथितो वेदसम्मितः।**
**नाट्य वेदः कथं ब्रह्मन्नुपत्पन्नः कस्य वा कृते।**
**तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनिः।**
**प्रत्युवाच ततो वाक्यं नाट्य वेद कथां प्रति।**[2]

आचार्य भरत ने ऋषियों के जिज्ञासा के अनुरूप बताते हुए उन्हें एकाग्रचित्त से सुनने के लिऐ कहा–

**पूर्व कृतयुगे विप्राःवृत्ते स्वायम्भुवेऽन्तरे।**

**त्रेतायुगेऽथ सम्प्राप्ते मनोर्वैवस्वतस्य तु।**[3]

और बताते है कि कृतयुग के समाप्ति के बाद तथा त्रेतायुग के आरम्भ मे नाट्य वेद का निर्माण हुआ। कालगणना शास्त्र के अनुसार कृतयुग के सन्दर्भ मे विचारणीय विषय यह है कि 71 महायुगो का एक मन्वन्तर होता है। दो मन्ववन्तर के बीच एक कृतयुग के तुल्य सन्धि होती है। ससन्धि मनु के अन्त में पृथ्वी जलपूर्ण हो जाती है अर्थात् प्रलय हो जाता है–

**युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते।कृताब्दसङ्ख्यस्तस्यान्ते सन्धिःप्रोक्तो जलप्लवः।।**4

श्लोक मे प्रयुक्त अन्तर शब्द का  अर्थ मन्वन्तर ही है जिसकों कोषादि मे अवधि भी कहा गया है तथा स्वयम्भुव आदि चौंदह मनुओं के अवधियो को मन्वन्तर कहा गया है अवबोधनार्थ 14 मनुओं का नाम निम्नवत हैं–

**स्वांभुवाख्यो मनुराद्य आसीत् स्वारोचिषश्चोत्तम-तामसाख्यौ।**

**जातौ ततो रैवत चाक्षुषौ च वैवस्वतः सप्तम् सम्प्रति सप्तमोऽयम्।।**

**सावर्णिर्दक्षसावर्णिर्ब्रह्मसावर्णिकस्ततः। धर्मसावर्णिको रूद्रपुत्रो रोच्यश्चभौत्यकः।।**[5]

अर्थात् 1. स्वायम्भुव 2. स्वारोचिष 3. उतम् 4. तामस 5. रैवत 6. चाक्षुष 7. वैवस्वत 8. सावर्णि 9. दक्षसावर्णि 10. ब्रह्मसावर्णि 11. धर्मसावर्णि 12. रूद्रपुत्र 13. रौच्य 14. भौत्यक, ये चौदहों ब्रह्मा के पुत्र है तथा मनु नाम से प्रसिद्ध हैं इन्ही के अवधियो को ससन्धियों सहित शास्त्रों मे एक कल्प कहा गया है तथा इन मनुओं की सन्धि कृतयुग के तुल्य होती है एक कल्प मे कुल 15 सन्धियॉ बताई गयी हैं।

**ससन्धयस्ते मनवः कल्पे ज्ञेयाश्चतुर्दश।**

**कृतप्रमाणःकल्पोदौ सन्धिःपन्चदशस्मृतः।।**[6]

विष्णुमहापुराण अनुसार चौदह मनुओं का पूरा समय 4 अरब 320000000 करोड़ है। इसी को एक कल्प कहते हैं। यह ब्रह्मा का एक दिन है जिनमें 6 मनु बीत गये सातवॉ मनु वैवस्वत चल रहा है। इस तरह 1, 95, 42, 92, 250 वर्ष 7 महीना 8 दिन 15 घड़ी 14 पल बीत गये और 2, 36, 57, 07, 789 वर्ष 4 महीना 21 दिन 44 घड़ी 46 पल बाकी है। आज ब्रह्मा के दिन अर्धप्रहर बीत रहा है। उपर्युक्त कालक्रम की गणना ज्योतीष शास्त्र से की गई है, भरत इसकी चर्चा केवल करते है। नाट्यशास्त्र मे ऋषियों को बताते समय नाट्यवेद की आवश्यकता क्यों पड़ी इस सन्दर्भ मे बताते है कि जब प्रपञ्च के लोग पारस्परिक ईर्ष्याद्वेषादि से समूढ हुए सुख-दुख मय की अवस्था को पार कर रहे थे तब इन्द्रादि देवताओं ने पितामह ब्रह्मा जी से कहा कि भगवन ऐसी क्रीड़ा हम लोग चाहते है जो दृश्य और श्रव्य दोनों ही प्रकार की हो क्यो कि यह वेद शूद्र जातियों के व्यवहार का विषय न होने से वे इसे पढ़ एवं सुन नही सकते अतः आप पाँचवां वेद बनाईये–

**महेन्द्र प्रमुवैर्देवेरूक्तः किल पितामह।**

**क्रीड़ानीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत्।।**

**न वेद व्यवहारोऽयं संश्राव्यः शुद्र जातिषु।**

**तस्मात् सृजापरं वेदं पञ्चमं सार्ववणिकम्।।**[7]

ब्रह्मा जी ने देववचनो को मानते हुऐ कहा जो वेद सर्ववर्णोपगी एवं हितकारी होगा उसकी रचना करता हूँ, तथा इसे निर्माण करने के लिये चारों वेदों का स्मरण किया–

**एवं मस्त्वितितानुक्त्वा देवराजं विसृज्य च।**

**सस्मार चतुरों वेदान्योगमास्थाय तत्त्ववित।।8**

**एवं ऋगादि वेदों से नाट्यवेद के अंशो को लिया–**

**नाट्यवेदंततश्चक्रे चतुर्वेदसम्भवम्।**[9]

चारों वेदों से किन किन अंशो को ब्रह्मा ने नाट्य वेद के लिऐ लिया इसका निरूपण करते हुए बताते है कि ऋग्वेद से पाठ, यजुर्वेद से अभिनय, सामवेद से संगीत तथा अथर्ववेद से रस को लिया।

**जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च।यजुर्वेदादभिनयान् रसानाथर्वणादपि।।**[10]

इन सामग्रियों को वेदों से ही क्यों लिया इसकी भी परमरहस्यात्मक तथ्य है लेकिन उसकी विवेचना यहाँ नही की जा रही है, किन्तु एक महत्वपूर्ण संकेत जरूर करता हूँ जिसे भरत भी स्पष्ट करते है । साधरण जनमानस की बोलचाल की भाषा आचार एवं व्यवहार तथा शैली की अपेक्षा नाटकीय पात्रों की भाषा शैली भिन्न भिन्न होती है। प्रयुक्त भाषाओं का वर्णन क्रमशः अधो लिवित श्लोक मे की गई है–

**देवाद्याः संस्कृतं प्राहुः प्राकृतं किन्नारादयः।**

**पैशाची च पिशाचाद्याःमागधीं हीन जातयः।।**[11]

अर्थात् देवताओं की बोल चाल की भाषा संस्कृत थी तथा किन्नरादि की प्राकृत, पिशाच की पैशाची एवं हीनजाति वाले की मागधी मे बोलते थे, तदनुरूप ही व्यवस्था करके ब्रह्मा ने नाट्यवेद को ऋगादिवेद से अंश ग्रहण करके निर्मित किया। उक्त तथ्यों से यह स्पष्ट होता कि ब्रह्मा ने नाट्यवेद का प्रथमोपदेश आचार्य भरत मुनि को दिया।

**नाट्यवेदं ददौ पूर्वं भरताय चतुर्मुखः।12**

नाट्य वेद प्राप्ति के बाद भरत ने अपने 100 पुत्र शिष्यों को परम्परा के विस्तार हेतु पढ़ाया जिनका नाम क्रमशः नाट्य शास्त्र के अनुसार निम्नवत् है–

**शाण्डिल्यं चौव वात्स्यं च कोलहं दत्तिलं यथा।**

**जटिलावष्टकौ चौव तण्डुमग्नि शिवं तथा।।**

सैन्धवं सपुलोमानं शाड्वलिं विपुलं तथा।
कपिञ्जलिं वादिरं च यमध्नप्रायणौ तथा।।
जम्बुधंवजं काकजङ्घं स्वर्णकं तापसं तथा।
कैदारिं शालिकर्णं च दीर्घगात्रं च शालिकम्।।
कौत्सं ताण्डायनिं चौव पिङ्गलं चित्रकं तथा।
बन्धुलं भल्लकं चौव मुष्टिकं सैन्धवायनम्।
तैतिलं भार्गवं चौव शुचिं बहुलमेव च।
अबुधं बुधसेनं च पाण्डुकर्णं सुकेरलम्।।
ऋजुकं मण्डकं चौव शम्बरं बञ्जुलं तथा।
मागधं सरलं चौव कर्तारं चोग्रमेव च।।
तुषारं पार्षदं चौव गौतमं बादरायणम्।
विशालं शबलं चौव सुनाभं मेषमेव च।।
कालियं भ्रमरं चौव तथा पीठमुवं मुनिम्।
नवकुट्टाश्मकुट्टौ च षट्पदं सोत्तमं तथा।।
पादुकोपानहौ चौव श्रुतिं चाषस्वरं तथा।
अग्निकुण्डाज्यकुण्डौ च वितण्ड्यं ताणड्यमेव च।।
कर्तराक्षं हिरण्याक्षं कुशलं दुस्सहं तथा।
लाजं भयानकं चौव बीभत्सं सविलक्षणम्।।
पुण्ड्राक्षं पुण्ड्रनासं चाप्यसितं सितमेव च।
विद्युज्जिह्वं महाजिह्वं शालङ्कायनमेव च।।
श्यामायनं माठरं च लोहिताङ्गं तथैव च।
संवर्तकं पञ्चशिवं त्रिशिवं शिवमेव च।।
शङ्ववर्णमुवं षण्डं शङ्कुकर्णमथापि च।
शक्रनेमिं गभस्तिं चाप्यंशुमालिं शठं तथा।।
विद्युतं शातजङ्घं च रौद्रं वीरमथापि च।
पितामहाज्ञयाऽस्माभिर्लोकस्य च गुणेप्सया।।
प्रायोजितं पुत्रशतं यथाभूमिविभागशः।
यो यस्मिन्कर्मणि यथा योग्यस्तस्मिन् स योजितः।।[13]

इसके बाद नाट्यवेद स्वर्ग से पृथ्वी पर कैसे आया तथा आप का( भरत का)वंश नट क्यों कहलाया इस रहस्य को जानने के लिए अत्रि वशिष्ठ प्रभृति ऋषियों ने भरत से पुछा जिसे आचार्य भरत ने सम्यक रूप से बताया ।

**आत्रेय वशिष्टश्च पुलल्त्यःपुलहक्रतुरिति।**
**कथमुर्वीतले नाट्यं स्वर्गान्निपतितं विभो।**
**कथं तवायं वंशर्श्च नट संज्ञःप्रकीर्तितः॥**[14]

नाट्यवेद के प्राप्ति के बाद अभिनयादि के अभिमान वस भरत पुत्रों को ऋषि शाप लगा किन्तु ऋषियों ने विद्या विलुप्त का शाप न देकर शाप ज्यों का त्यों रहेगा ऐसा आशीर्वाद भरत को दिया। जिसे कालान्तर मे राजा नहुष ने पृथ्वी लोक पर नाट्यवेद देवताओं के आज्ञा से नाट्याचार्यो के माध्यम से मानवों के ज्ञानार्थ लाने हेतु कहा। नहुष ने मुझसें प्रार्थना किया तब मैंनें अपने पुत्र शिष्यों को आज्ञा दिया की पृथ्वी लोक पर नाट्य का विस्तार करो जिससे कि तुम्हारें शाप का भी अन्त हो जायेगा।[15] उक्त प्रसंग की चर्चा यहाँ हम बहुत विस्तार से न करके केवल मण्डुकप्लुतिन्याय के आश्रय को लेकर विवेचना किया हूँ। अतः यह स्पष्ट हो जाता है कि भरत के शत् पुत्र शिष्यों ने ही भू लोक पर नाट्यवेद का विस्तार किया जिन्हें भरतनाम भी से जाना गया।

**आचार्य शारदायन का सिद्धान्त**- इनके भावप्रकाशन् ग्रन्थ के अनुसार जो आख्यायिका नाट्याचार्यो के सन्दर्भ मे प्राप्त होती है वे इस प्रकार है कि सूर्यवंशी राजा मनु पृथ्वी के शासन भार से क्लान्त हो गये तब चिन्तन किया कि क्या उपाय करूं कि जिससे सुखानुभूति मिले तथा अपने पिता भगवान भास्कर से मिल कर कष्ट को बताया।

**पुरामनुर्महिपालः सप्त द्वीपवतीं भुवम्।**
**पालयर्न्भरेणास्या भारेण श्रान्तचेतनः॥**
**केनास्य भूमिभारस्य विश्रान्तिसुवमाप्नुयाम्।**
**इति संचित्य पितरं सवितार मुदैक्षत॥**
**तदैवाभ्यागमत्तत्र भास्करः पुत्रवत्सलः।**
**मनुर्न्यवेदयत्तस्मै भूभारक्लेशशमात्मनः॥**[16]

भगवान दिनकर ने बताया कि ब्रह्मा जी को भी सृष्टि करते करते दुःखानुभूति हुई तो उन्हों ने भगवान नारायण को बताया उत्तर स्वरूप नारायण ने भगवान शिव के समीप जाने के लिए कहा।

**स मनोर्भारविन्नस्य विश्रामोपायमब्रवीत्।**
**पुरा दुग्धाब्धि नाथस्य नाभीकमलसम्भवः।**
**ब्रह्मासृजदिमान् लोकान् जङ्गमस्थावरात्मकान्।**
**एतेषां पालनायासव्यापारपरिवेदितः।**

**विश्रान्ति सुवमन्विच्छन्नुपागच्छ्रिय:पतिम्।**
**प्रजापालनवेदस्य विश्रामायव्यजज्ञिपत्।।**
**अचिन्तयद्देव देव:श्रान्तं वीक्ष्यात्मसंभवम्।**
**केनैवास्यविनोदेन विश्राम: सम्भवेदिति।।**
**विचिन्त्य भावं स्वक्षेत्र भाविनं विधिमब्रवीत्।**
**गच्छ ब्रह्मन्पुरारातिमम्बिकापतिमीश्र्वरम्।।**
**स ते विश्रान्ति सुवदमुपायमुपदेक्ष्यति।**[17]

भूतभावन शिव ने समीपस्थ ब्रह्मा को पाकर नन्दिकेश्वर को आज्ञा दी कि मैंनें जो नाट्यवेद पढ़ाया वह सब ब्रह्मा जी को पढ़ा दो। तदनुरूप नन्दिकेश्वर ने नाट्यवेद को पढ़ा कर बताया कि इसके प्रयोग से ही सृष्टि करने का श्रम दूर होगा तथा सुव की प्राप्ति होगी।

**इत्थमा ज्ञापितो ब्रह्मा देवदेवमुमापतिम्।।**
**अभिष्ट्यात्मन: वेदं सर्व तस्मै व्यजज्ञिपत्।**
**विज्ञाय शम्भुस्तत्वेदं नन्दिकेश्वर मभ्यधात्।।**
**मत्सकाशादधीतं त्वं नाट्यवेदमशेषत:।**
**अध्यापयैनं ब्रह्माणं सप्रयोगं सविस्तरम्।।**
**स तथेत्यब्ज जन्मानमध्यापयदशेषत:।**
**अध्याप्यावोचदेतस्य वेदस्यैव प्रयोगत:।।**
**जगतां सर्जनायासविश्रान्ति सुवमामुहि।**[18]

इसके पश्चात् ब्रह्मा जी स्वलोक जाकर नाट्यवेद के विस्तार हेतु भगवती सरस्वती के साथ मनन ही कर रहे थे कि तभी पाँच शिष्यों के साथ कोई मुनि वहाँ उपस्थित हुऐ जिन्हें नाट्यवेद को भरण अर्थात् धारण करने के लिऐ ब्रह्मा ने कहा तदनारूप इन शिष्यों ने नाट्यवेद ग्रहण कर ब्रह्मा के सम्मुख प्रस्तुत किये। इन शिष्यों के प्रयोग विधा से प्रसन्न ब्रह्मा ने आशीर्वाद दिया कि आप सभी लोगों ने नाट्यवेद का भरण किया है। अत: आप लोग भरत नाम से प्रसिद्ध होंगे और नाट्यवेद भी आप लोगो के नाम से ख्याति प्राप्त करेगा ।

**इत्थं स नन्दिनाज्ञप्त: समागम्य स्वमन्दिरम।।**
**नाट्यवेद प्रयोक्तारं भारती-सहितोऽस्मरत।**
**स्मृतमात्रे मुनि: कश्चिच्छिष्यै: पञ्चभिरन्वित:।**
**पुरोऽवतस्थे भारत्या: सहितस्याब्जजन्मन:।**
**तानब्रवीन्नाट्यवेदं भरतेति पितामह**

**तेऽधीत्य नाट्यवेदं तत्प्रयोगाँश्र्च पृथग्विधाप्**

**रसैर्भावैरभिनयः प्रयोगश्र्च पृथग्विधैः**

**नाट्यवेदोदितैः सम्यगब्जयोनिमतूतुषप्**

**तुष्टस्तेभ्यो वरं प्रादादभीष्टं पद्मविष्टरः**

**नाट्यवेदमिमं यस्माद्भरतेति मयेरितम।**

**तस्माद्भरत नामानों भविष्यथ जगत्त्रये**

**नाट्यवेदोऽपि भवतां नाम्ना ख्यातिं गमिष्यति।**[19]

इस लिऐ हे मनु तुम ब्रह्मा जी की प्रार्थना करो। एतदानरूप मनु ने ब्रह्मा के पास जाकर सभी वृतान्तों को बताया जिसके कारण ब्रह्मा ने भरतों को बुलाया और मनु के साथ पृथ्वी लोक मे जाकर वहीं रहकर नाट्यवेद का प्रचार प्रसार करने के लिऐ निर्देश दिया। आज्ञानुसार वे लोग मनु के साथ अयोध्या में आये।

**त्वमाराधय तं देवं मनो ब्रह्माणमच्युतम्**

**इत्थंमादिश्य च मनु दिनेशस् त्रिदिवं ययौ**

**मनुर्ब्रह्मसदोभ्येत्य प्रणिपत्य पितामहम्म्**

**आत्मनो भूभरश्रान्तिं व्यजिज्ञपदशेषतः**

**चतुर्मुवोऽपि विज्ञाय मनोर्भूमिभरक्लमम्।**

**आहूय भरतान् सर्वानिदं वचनंमब्रवीत्।**

**यातं यूयं महीं विप्राः मनुना त्रिदिवादितः।**

**भारतं वर्षमाश्रित्य वर्त्तध्वं मनुना सह**

**इति संचोदितास्तेन भरताः पद्मयोनिना**

**अयोध्यां मानवेन्द्रेण मनुना सार्धमाययुः।**[20]

इनके सिद्धान्तों की समीक्षा से ज्ञात होता है कि उत्पत्ति एवं प्राच्य परम्परा के आदि नाट्यवेद प्रदायक शिव हैं और इन्हों ने नन्दिकेश्वर को दिया, नन्दिकेश्वर ने ब्रह्मा को, ब्रह्मा ने पञ्च शिष्य स्वरूप भरतों को दिया जिससे कि नाट्यशास्त्र पृथ्वी लोक पर आया।यहाँ पर विशेष बात यह पता चलता है कि पाँच भरतों की मान्यता स्वीकारते हैं।किन्तु वर्तमान मे हम सभी लोग एक ही भरत को नाट्यशास्त्र प्रणेता के रूप मे जानते है, वैसे संस्कृत साहित्य मे कई भरतों की चर्चा मिलती है लेकिन उन सभी का विवरण यहाँ प्रस्तुत न करके केवल शारदायन का मत उल्लेव किये हैं।

आचार्य नन्दिकेश्वर का सिद्धान्त–इनके ग्रन्थ अभिनयदर्पण के अवलोकन से तीसरी परम्परा का जो ज्ञान हमे मिलता है वे इस प्रकार है । ब्रह्मा ने नाट्यवेद भरत मुनि को पढ़ाया तथा भरत ने

इसका प्रयोग शिव के समक्ष किया शिव ने तण्डु अर्थात् नन्दिकेश्वर को भरत को ताण्डव सिवाने के लिऐ कहा। भरत ने ताण्डव सिवकर इसका प्रचार मृत्यु लोक मे किया।

**नाट्यवेदं ददौ पूर्व भरताय चतुर्मुवः।**

**ततश्र्च भरतः सार्ध गन्धर्वाप्सरसां गणैः।।**

**नाट्य नृत्तं तथा नृत्यमग्रे शंभोः प्रयुक्तवान।**

**प्रयोगमुद्धतं स्मृत्वा स्वयुक्तं तु ततो हरः।।**

**तण्डुना स्वगणाग्रण्या भरताय न्यदीदिशत्।**[21]

इसके बाद शिव ने पार्वती को आज्ञा दी की लास्य अर्थात् लोक परम्परा सिवलाओ।पार्वती ने बाण की पुत्री उषा को लास्य प्रयोग बताया तथा इनसे द्वारका के गोपियों ने सिवा एवं इन से सौराष्ट्र देश की महिलाओं ने सिवा।इस प्रकार लास्य परम्परा भूलोक पर आया।

**लास्य मस्यग्रतः प्रीत्या पार्वती समदीदिशत्**

**बुध्वाऽथ ताण्डवं तण्डो मर्त्येभ्यो मुनिरब्रवीत्**

**पार्वती त्वानुशास्ति स्म लास्यं वाणात्मजामुषाम्**

**तया द्वारवती गोप्य ताभिः सौराष्ट्रयोषितः**

**एवं परम्पराप्राप्तमेत( लास्यं )ल्लोक प्रतिष्ठितम्।**[22]

इन्हों ने जो उत्पत्ति एवं आचार्य परम्पर माना है उसकी समीक्षणीय दृष्टि थोड़ी भिन्न होते हुऐ भी पूर्वोक्त सिद्धान्तों की पुष्टि हो जा रही है।

इसके अतिरिक्त आचार्य शाङ्गर्देव ने संगीतरत्नाकर मे प्राच्य नाट्य परम्परा के संवाहक आचार्यो का नामोल्लेख निम्न प्रकार से किया है–

**सदाशिवः, शिवा, ब्रह्मा, भरतः, कश्यपो मुनिः**

**मतंगो याष्टिको दुर्गाशक्तिः शार्दूल कोहलौ**

**विशाविलो दत्तिलश्र्च कम्बलोर्श्वतरस्तथा**

**वायुर्विश्वावस् रम्मारजुननारद तुम्बराः**

**आञ्जनेयो मातृगुप्तो रावणो नन्दिकेश्वरः**

**स्वातिर्गुणो विन्दुराजःक्षेत्रराजश्र्च राहलाः।**

**रूद्रटो नाम भूपालो( रूद्रसेनश्र्च भूपालो )भोजभूवल्लस्तथा**

**परमर्दीच सोमेशो जय देवो महीपतिः।**

**व्याख्यातारो भारतीये लोल्लटोद्भट शंकुकाः**

**भट्टाभिनव गुप्तौ च श्रीमत्कीर्तिधरोऽपरः।**[23]

**आचार्य धनंजय का सिद्धान्त**– इन्हों ने दशरूपक नामक ग्रन्थ मे नाट्य की उत्पत्ति का प्रतिपादन कुछ इस प्रकार  से किया है? जिसकी रचना ब्रह्मा ने चारों वेदों से सार ग्रहण कर की भरतमुनि ने हाथ पैर के समायोग एवं अंगविक्षेप के द्वारा अभिनय प्रयोग को पल्लवित किया जिसमें भगवान शिव ने ताण्डव नृत्त तथा भगवती पार्वती ने लास्य नृत्त का समावेश किया यथा–

**उद्धृत्योद्धृत्य सारं यमविलनिगमान् नाट्यवेदं विरिञ्चिश्–**
**चक्रे यस्य प्रयोगं मुनिरपि भरतस्ताण्डवं नीलकण्ठैः।**
**शर्वाणी लास्यमस्य प्रतिपदमपर्णं लक्ष्म कः कर्तुमीष्टे,**
**नाट्यानां किं तु किञ्चित् प्रगुणरचनया लक्षणं संक्षिपामि।।**24

**निष्कर्ष**– प्राच्य उत्पत्ति तथा आचार्य परम्परा के समीक्षणार्थ प्रतिपदित मुख्य तिनों पक्षों एवं विविध ग्रन्थों के सार तत्त्वों के अवलोकन से नाट्यशास्त्र के आदि उपदेष्टा आचार्य भगवान शिव हैं, भले ही नाट्यशास्त्र के मंगलाचरण मे आचार्य भरत ने, पितामहमहेश्वरौ,[25] का प्रयोग कर पहले ब्रह्मा को प्रणाम करते हैं इसके बाद शिव को वन्दन करते हैं। अतः उत्पत्ति एवं आचार्य परम्परा दोनों पर ही सविस्तार क्रम से ऊपर बहुत से पक्ष स्पष्टता के लिऐ दिया है। इन विविध प्रमाणो के आधार पर हमे स्वविवेक से भी प्रमाणिकता एवं अप्रमाणिकता मान लेनी चाहिए।

सन्दर्भ सूची–


1 नाट्यशास्त्र .अ.1,15  2 नाट्यशास्त्र– अ.1,2.3.4.6  3 नाट्यशास्त्र अ.1,8.

4 बृहदावकहडा चक्रम्– काल विवेक प्रकरण, श्लोक सं.30

5 बृहदावकहडा चक्रम्– काल विवेक प्रकरण, श्लोक सं.31.32

6 बृहदावकहडा चक्रम्– काल विवेक प्रकरण, श्लोक सं.33

7 नाट्यशास्त्र अ. 1,11.12  8 नाट्यशास्त्र अ. 1,13.  9 अभिनयदर्पण 7,8  10 नाट्यशास्त्र अ. 1,17.

11 नाट्यशास्त्र भूमिका  12 अभिनयदर्पण 2,7  13 नाट्यशास्त्र अ. 1

14 नाट्यशास्त्र अ. 1.  15 नाट्यशास्त्र अ. 36.  16 भावप्रकासन् 10,2–3

17 भावप्रकासन् 10,4–8  18 भावप्रकासन् 10,9–12  19 भावप्रकासन् 10,13–17

20 भावप्रकासन् 10,18–21  21 अभिनयदर्पण 7,8  22 अभिनयदर्पण 2,7

23 संगीत रत्नाकर 7,3–8  24 दशरूपक 1.4  25 नाट्य शास्त्र– अ. 1.1



– अस्सिटेन्ट प्रोफेसर, साहित्य विभाग

राष्ट्रिय संस्कृत संस्थान  (मानित विश्वविद्यालय)

लवनऊ परिसर, लखनऊ

# अरविन्द की दृष्टि में वाल्मीकीय रामायण

**डॉ. हेरम्ब पाण्डेय**

वाल्मीकि रामायण का प्रचार-प्रसार विश्व के बड़े भूभाग पर दृष्टिगत होता है। प्रसिद्ध पाश्चात्त्य आलोचक विद्वान् ओफ्रेक्ट के अनुसार विश्व की अनेक भाषाओं में अनुदित 24000 श्लोक वाले इस विपुलकाय ग्रन्थ पर विभिन्न कालों में लिखी गयी 30 टीकाएँ इसकी लोकप्रियता का प्रमाण हैं।[1] इस महान् ग्रन्थ ने असंदिग्ध रूप से विश्व-साहित्य, कला एवं संगीत को समृद्ध किया है। विश्वभर में वाल्मीकीय रामकथा के आधार पर असंख्य रचनाओं का निर्माण हुआ। सहस्रों वर्षों से प्रवाहित वह परम्पराधारा अद्यावधि पर्यन्त अक्षुण्ण बनी हुई है। आज भी वाल्मीकि की रामकथा विद्वानों की गवेषणा का रुचिकर विषय है। विद्वान् अपने-अपने वैचारिक धरातल पर वाल्मीकीय रामकथा का मूल्यांकन करते हैं। विद्वानों की सुदीर्घ परम्परा में महर्षि अरविन्द का नाम विशेष उल्लेखनीय है। अरविन्द आधुनिक भारत के मान्य तत्त्व-चिन्तक हैं, इन्होंने रामायण को अपनी विशिष्ट दार्शनिक दृष्टि से देखा है।

अरविन्द के अनुसर वेद सर्वोच्च आध्यात्मिक ज्ञान एवं सत्य के अनुभव की अभिव्यक्ति है। वही सत्य भारतीय संस्कृति का प्राणतत्त्व, उच्चतम विचार एवं परमध्येय रहा है।[2] भारतीय संस्कृति का प्राणतत्त्व सत्य परवर्ती श्रेष्ठ साहित्यों में संरक्षित मिलता है। वेदों के पश्चात् समृद्धि एवं बौद्धिक विकास का युग आया। उस युग के भारतीय मस्तिष्क ने सर्जना से सम्बद्ध हो अधिक चिन्तनात्मक प्रयास किया। वह दो रूपों में प्रकट हुआ- एक श्रमसाध्य दार्शनिक विचारधारा, जिसने न्याय, मीमांसा, वेदान्त जैसे गम्भीर दर्शन शास्त्रों का निर्माण किया, दूसरी ओर वेदों के अनुसार व्यक्तिगत एवं सामाजिक जीवन की सुसंगत एवं व्यवस्थित प्रणाली को कठोरता से निर्धारित करने का प्रबल प्रयत्न हुआ। इस प्रयत्न के फलस्वरूप ऋषितुल्य आचार्यों के द्वारा प्रामाणिक-सामाजिक ग्रन्थों और शास्त्रों का निर्माण हुआ, जिनमें सर्वाधिक महान् एवं प्रामाणिक कृतियों मे से एक है- वाल्मीकि रामायण।

अरविन्द के अनुसार रामायण अपने मूल हेतु और भावना में तो महाकाव्य है परन्तु यह संसार के किसी भी महाकाव्य से सादृश्य नहीं रखता। यह मूलतत्त्व की दृष्टि से अन्यों से भिन्न है। रामायण में यद्यपि एक वीरतापूर्ण कथा का आद्योपान्त विस्तार है, परन्तु यह कथा अत्युन्नत बौद्धिक, नैतिक और सामाजिक संस्कृति के युग से सम्बद्ध है। कथा में नैतिकता तथा गम्भीरता की ऊँचाई है। अरविन्द के अनुसार यह महाकाव्य आइसलैण्ड के सुप्रसिद्ध प्राचीन काव्य-संग्रह और वीरगाथावालि एडा (Edda) और सागा (Saga) से सर्वथा भिन्न है और दृष्टिकोण, सारवस्तु की विशालता, उद्देश्य की उच्चता में महान् ग्रीक रचनाकार होमर के ओडिसी से अधिक महान् है। इतना ही नहीं,

इसमें प्रत्यक्ष सरलतापूर्ण तेजी भी है, जीवन की ताजगी, महत्ता और प्रस्पन्दना है और है ओज तथा सौन्दर्य की सरलता, जो इसे वर्जिल या मिल्टन अथवा फिरदौस या कालिदास के द्वारा विरचित साहित्यिक महाकाव्यों से सर्वथा भिन्न प्रकार की कृति बना देती है।[3] अरविन्द के समकालिक रवीन्द्रनाथ टैगोर ने रामायण के सन्दर्भ में लिखा है कि किसी आधुनिक काव्य में रामायण की व्यापकता नहीं है। कालिदास अथवा मिल्टन की रचनाओं में भाषा का गाम्भीर्य, छन्दों का औचित्य, रसों का परिपाक कितना ही क्यों न हो, वे देश का धन नहीं हैं, उनसे केवल पुस्तकालय की शोभा हो सकती है। रामायण समस्त देशों एवं सारी जातियों की सरसवती का आश्रय है। इसमें वाल्मीकि नहीं भारत की छवि दिखती है। रामायण की कविताएँ एक जाति के यौवन की वाणी है, परन्तु एक ऐसे यौवन की जो नवीन, सुन्दर और प्रफुल्ल ही नहीं, अपितु पूर्णता प्राप्त, ज्ञानमय और अत्यन्त श्रेष्ठ भी है।[4]

रामायण का अन्य साहित्यिक रचनाओं से भेद दिखाने के लिए इसे इतिहास कहा गया है। साहित्य की दृष्टि में इतिहास का अर्थ है– कोई प्राचीन ऐतिहासिक या उपाख्यानात्मक परम्परा, जिसे एक अर्थपूर्ण कथा के रूप में चरित्र निर्माण के लिए प्रयुक्त किया गया हो। कथा आध्यात्मिक या धार्मिक अथवा नैतिक या आदर्शात्मक अर्थ को प्रकट करती है। रामायण इस निष्कर्ष पर खरा है। जिसने इसकी रचना की, उसका उद्‌देश्य केवल एक प्राचीन कथा का श्रेष्ठता से वर्णन करना न था और न ही रस, भाव से परिपूर्ण कोई कविता रचना था, यद्यपि कवि इन दोनों कार्यों के सम्पादन में भी सफल रहा है। वास्तव में कवि ने वेद के सत्य के वक्ताओं, जीवन के शिल्पियों और मूर्तिकारों तथा राष्ट्रीय चिन्तन, धर्म, नैतिकता और संस्कृति के अर्थपूर्ण आकारों के निर्माताओं एवं व्याख्याकारों के रूप में अपना कर्तव्य समझते हुए इसका प्रणयन किया। जीवन–विषयक चिन्तन का गहरा दबाव, धर्म एवं समाज के सम्बन्ध में एक व्यापक और जीवनप्रद दृष्टिकोण तथा दार्शनिक विचार का एक विशेषस्वर इन कविताओं में सर्वत्र ओत–प्रोत है। रामायण में भारत की प्राचीन संस्कृति को बौद्धिक कल्पना के साथ साकार रूप दिया गया है। यह रूप शाश्वत है। रवीन्द्रनाथ टैगोर कहते हैं कि रामायण इतिहास तो है, परन्तु प्राचीन इतिहास है। नवीन परिवर्तनशील है, परन्तु प्राचीन नहीं। इतिहास ग्रन्थ रामायण का कथ्य अपरिवर्तित है। भारतवर्ष की जो साधना, जो आराधना और जो संकल्प है, उसी का इतिहास इस विशालकाय काव्य–प्रासाद में चिरकालिक सिंहासन पर विराजमान है।[5]

अरविन्द के अनुसार रामायण काव्य नहीं धर्मशास्त्र है। प्राचीन व्याख्या–परम्परा भी इसी विचारधारा की प्रतिष्ठा करती है। यह एक व्यापक धार्मिक, नैतिक, सामाजिक और राजनैतिक शिक्षा का ग्रन्थ है। भारतीय जाति के मन तथा जीवन पर इसका विस्मयजनक प्रभाव है। इस महाकाव्य ने उच्च दार्शनिक और नैतिक विचार तथा सांस्कृतिक आचार को जनता में प्रचारित किया। भारत की अन्तरात्मा और विचारधारा में जो भी वस्तु सर्वश्रेष्ठ थी, जीवन के लिए यथार्थ थी, जो सर्जनशील कल्पना आदर्श मन के लिए उपयुक्त थी या फिर भारत की सामाजिक, नैतिक, राजनैतिक और ध

ार्मिक संस्कृति के विशिष्ट स्वरूप को प्रकाशित करने वाली थी, उन सभी को स्पष्ट रूप से हृदयग्राही प्रभाव के साथ काव्यात्मक कथा की पृष्ठभूमि में प्रस्तुत किया गया है। यह भारत की गौरवशाली परम्परा की अभिव्यक्ति है। ये परम्पराएँ कुछ काल्पनिक और कुछ ऐतिहासिक थीं, परन्तु आगे चलकर लोगों ने उन्हें अत्यन्त गम्भीर एवं जीवन्त सत्य मानक, अपने धर्म की भाँति स्वीकार किया। यह मूल संस्कृत में अथवा प्रादेशिक भाषाओं में कथकों या व्याख्याताओं के द्वारा जनसाध ारण तक पहुँचकर लोकशिक्षा और लोकसंस्कृति का मुख्य साधन बना। इसने भारतवासियों के विचार, चरित्र, सौन्दर्यात्मक और धार्मिक मन का घटन किया। यहाँ तक कि अशिक्षित लोगों पर भी ग्रन्थ के दर्शन, नीतिशास्त्र, सामाजिक एवं राजनैतिक विचारों, सौन्दर्यात्मक भाव, काव्य एवं उपन्यास का गहरा प्रभाव पड़ा। जो विचार सुशिक्षित वर्गों के लिए वेद, उपनिषद्, गम्भीर दार्शनिक सूत्र, धर्मशास्त्र एवं अर्थशास्त्र में प्रतिपादित थे, उसे रामायण सर्जनक्षम और सजीव अलंकारों के रूप में प्रस्तुत करता है, जो काव्यमय वचन के रूप में एक ही साथ अन्तरात्मा, कल्पनाशक्ति और बुद्धि को उत्कृष्ट करता था।[6]

अरविन्द के अनुसार रामायण मूलतः महाभारत के समान ही रचना है। दोनों में पार्थक्य यह है कि इसकी योजना अपेक्षाकृत अधिक सरल है। इसमें आदर्शात्मक प्रकृति अधिक सुकुमार है और काव्यात्मक ऊष्मा तथा रंग की आभा अधिक चटक। रामायण में क्षेपक हैं, तथापि अधिकांश एक ही व्यक्ति द्वारा निर्मित हैं। इसमें रचना की एकता कम जटिल है। इसमें दार्शनिक की मनोवृत्ति कम है और शुद्ध कवि की अधिक। इसमें कलाकार अधिक है, निर्माता कम। सम्पूर्ण कथा आदि से अन्त तक एक ही है। कवि कथानक की मूलधारा से कहीं पृथक् नहीं हैं साथ ही इसमें अन्तर्दृष्टि की वैसी ही विशालता है। परिकल्पना की महाकाव्योचित उदात्तता में यह महाभारत की अपेक्षा और अधि क उन्मुक्त उड़ान है। इसका विषय महाभारत जैसा ही है। पार्थिव जीवन में दानवीय शक्तियों के साथ दैवी शक्तियों का संघर्ष, परन्तु यहाँ इसे अधिक शुद्ध आदर्शवादी रूपों तथा स्पष्ट परिणाम में प्रस्तुत किया गया है। रामायण में मानव चरित्र के शुभ और अशुभ दोनों प्रकार की वृत्तियों को बढ़ाकर दिखाया गया है। एक ओर धर्म के शिखर पर प्रतिष्ठित, नैतिक आदर्श के अत्युच्च शिखर पर विद्यमान सभ्यता है, दूसरी ओर अमानुषी अहंकार, स्वेच्छा, अराजकता, उल्लासमयी हिंसा पर आध ृत प्रायः अनिश्चित आकार वाली शक्तियां हैं। ग्रन्थ में उन दोनों विचारों एवं शक्तियों को साकार रूप देकर इनका परस्पर संघर्ष कराया गया। अन्त में परिणाम के रूप में देवता स्वरूप मानव की राक्षस पर विजय दिखायी गयी है।[7]

महाकवि वाल्मीकि ने जो छाया काव्य के प्रधान विचार की ऐकान्तिक शुद्धता को, पात्रों की रूपरेखा में प्रदर्शित प्रतिनिधि शक्तियों को, स्वभाव के विशिष्ट रंग के महत्त्व को क्षीण कर सकती थीं– उन सबका परित्याग कर दिया है। कवि हमारे जीवन के पीछे विद्यमान अपरिमेय शक्ति से हमारा परिचय कराता है। उसने घटनाक्रम के विकास के लिए महाकाव्योचित दृश्यावली–विस्तृत

राजकीय नगरी, पर्वत, सागर, वन और मरुस्थल को आधार बनाया है। यह वर्णन कवि ने इतनी कुशलता से किया है, जैसे सम्पूर्ण जगत् ही उसके काव्य का दृष्टि-पट है।

भारत के सांस्कृतिक मानस को ढालने में वाल्मीकि की कृति ने एक दिव्यशक्ति से युक्त साधन के रूप में कार्य किया है। इस ग्रन्थ ने राम, सीता, भरत, लक्ष्मण या हनुमान् जैसे पात्रों के रूप में अपने नैतिक आदर्शों की स्थापना की है। इस काव्य ने जीवन की साधारण वस्तुओं को भी पति-पत्नी, माँ-बेटे और भाई-भाई के पारस्परिक प्रेम को, राजा और नेतृत्वकर्ता के कर्तव्य और प्रजा तथा अनुयायी की राजभक्ति एवं निष्ठा को, महान् व्यक्तियों की महत्ता और सरल के सच्चे स्वरूप को तथा अन्य मानवीय मूल्यों को एक प्रकार की उच्च दिव्यता प्रदान की है। कवि के महत्त प्रयास के पीछे कारण यह था कि लोग उनके पात्रों से प्रेम कर सकें और उनका अनुकरण करें। राम, सीता और भरत को तो दिव्यता के साथ तथा मूल सत्य की अभिव्यक्ति के साथ इसप्रकार चित्रित किया गया है कि वे स्थायी भक्ति एवं पूजा के पात्र बन गये। इस सन्दर्भ में रवीन्द्रनाथ टैगोर ने आलोचना की दिशा का निर्देश करते हुए कहा है कि आलोचक को रामायण के पात्र अच्छे लगते हों या बुरे, इतनी ही आलोचना यथेष्ट नहीं समझी जायेगी। उन्हें संयम के साथ यह विचार करना होगा कि समस्त भारत हजारों वर्ष से इन महापुरुषों को किस दृष्टि से देखता आ रहा है।[8]

अरविन्द कहते हैं कि राम, सीता जैसे पात्रों की आदर्शवादिता कोई निर्जीव और निस्तेज अवास्तविकता नहीं है, उसमें आदर्श जीवन के सत्य की सजीवता है। साधारण मनुष्य भी अपनी अन्तरात्मा को पवित्र कर उनकी महानता को प्राप्त कर सकता है। मनुष्य की प्रकृति की क्षुद्रता अधिक समय तक उसके मार्ग में बाधा नहीं बन सकती।[9]

सन्दर्भ-

1. बलदेव उपाध्याय - संस्कृत साहित्य का इतिहास, पृ. 27
2. श्री अरविन्द - वेद रहस्य (पूर्वार्द्ध) पृ. 8
3. श्री अरविन्द - भारतीय संस्कृति के आधार, पृ. 340
4. रवीन्द्र नाथ टैगोर - प्राचीन साहित्य, पृ. 2
5. वही, पृ. 3
6. श्री अरविन्द - भरतीय संस्कृति के आधार, पृ. 342
7. Aurobindo - The future Poetry- P. 74
8. रवीन्द्र नाथ टैगोर - प्राचीन साहित्य, पृ. 04
9. श्री अरविन्द, भारतीय संस्कृति के आधार, पृ. 350

प्रवक्ता- संस्कृत,
श्रीमती इन्दिरा गांधी राजकीय स्नातकोत्तर महाविद्यालय, लालगंज, मीरजापुर

# महाकवि अश्वघोष

– डॉ. मोहन मिश्र

अश्वघोष, बौद्ध महाकवि तथा दार्शनिक थे। चीनी परम्परानुसार कुषाणनरेश कनिष्क के समकालीन महाकवि अश्वघोष का समय ईसवी प्रथम शताब्दी का अन्त और द्वितीय का आरम्भ है। इन्होंने अभिधर्म की व्याख्या 'विभाषा' का भी लेखन किया था।

**जीवन वृत्त**– उनका जन्म साकेत (अयोध्या) में लगभग 2000 वर्ष पूर्व हुआ था। उनकी माता का नाम सुवर्णाक्षी था।[1] चीनी परम्परा के अनुसार महाराज कनिष्क पाटलिपुत्र के अधिपति को परास्त कर वहाँ से अश्वघोष को अपनी राजधानी पुरुषपुर (वर्तमान पेशावर) ले गए थे। एक परम्परा कनिष्क द्वारा बुलाई गई चतुर्थ बौद्ध-संगीति की अध्यक्षता का श्रेय महास्थविर पार्श्व को और दूसरी परम्परा महावादी अश्वघोष को प्रदान करती है। सर्वास्तिवादी 'विभाषा' की रचनानुसार ये सर्वास्तिवादी बौद्धाचार्य थे। ये परमत को परास्त करनेवाले सम्भवतः प्रथम 'महावादी' दार्शनिक एवं कवि थे। सामान्य जन को बौद्धधर्म के प्रति आकृष्ट करने लिए इन्होंने काव्य और संगीति का आश्रय लिया। चीनी तीर्थयात्री इत्सिंग, जिसने 671 ई० से 695 ई० तक भारत भ्रमण किया था, कहता है कि अश्वघोष बौद्धधर्म के प्रबल समर्थक थे, उस समय बौद्ध मठों में उनकी रचनाओं का गायन हुआ करता था।[2]

विण्टरनिट्ज सम्राट कनिष्क के सिंहासनारूढ़ होने का समय 125 ई. मानते हैं। तदनुसार अश्वघोष का काल भी द्वितीय शताब्दी ई. कहा जा सकता है। अधिकांश विद्वान् कनिष्क को शक संवत् का प्रवर्तक मानते हैं। शक संवत्सर का आरम्भ 78 ई. से हुआ था। कीथ के अश्वघोष का समय 100 ई. के लगभग मानने का आधार भी यही है। यदि कनिष्क का राज्यकाल 78 ई. से 125 ई. मान लिया जाए तो महाकवि अश्वघोष का समय भी प्रथम शताब्दी मान लेने में कोई आपत्ति नहीं होनी चाहिए। अनेक बौद्धग्रन्थों में भी ऐसे प्रमाण उपलब्ध हैं, जो अश्वघोष को सम्राट कनिष्क कालीन सिद्ध करते हैं। चीनी परम्परा भी सम्राट कनिष्क के द्वारा काश्मीर के कुण्डलव में आयोजित अनेक अन्तःसाक्ष्य के आधार पर अश्वघोष को कनिष्क कालीन सिद्ध करती है।[3] डॉ. जौन्स्टन के अनुसार अश्वघोष का समय 50 ईसा पूर्व और 100 ई. मध्य का रहा होगा।[4] अश्वघोषकृत 'बुद्धचरित' का उपलब्ध चीनी अनुवाद सम्भवतः पाँचवीं शताब्दी ईस्वी का है। इससे यह सपष्ट है कि भारत में प्रसिद्ध होने के पश्चात् ही इस ग्रन्थ का चीनी अनुवाद किया गया। ऐतिहासिक साक्ष्यों के आधार पर सम्राट अशोक के राज्यकाल की अवधि 269 से 232 ई. पू. मानी जा सकती है। अशोक का उल्लेख 'बुद्धचरित' के अन्त में हुआ है, जिससे यह निश्चित है कि आचार्य अश्वघोष सम्राट अशोक के परवर्ती थे। चीनी परम्परा अश्वघोष को कनिष्क का दीक्षा-गुरु भी मानती है।

कनिष्क के ही समय में रची गयी अश्वघोषकृत 'अभिधर्मपिटक' की विभाषा नामक एक व्याख्या भी प्राप्त है। इनके द्वारा रचित ग्रन्थ 'शारिपुत्रप्रकरण' के अनुसार इसका रचनाकाल हुविष्क का शासनकाल भी मानते हैं। हुविष्क के राज्यकाल में अश्वघोष की विद्यमानता ऐतिहासिक दृष्टि से अप्रामाणिक है। इनका राज्यकाल कनिष्क की मृत्यु के बीस वर्ष बाद का है। हुविष्क के प्राप्त सिक्कों पर कहीं भी बुद्ध का नाम नहीं मिलता, किन्तु कनिष्क के सिक्कों पर बुद्ध का नाम अंकित है। कनिष्क बौद्धधर्मावलम्बी और हुविष्क ब्राह्मण धर्म का अनुयायी था। अतः अश्वघोष का उनके दरबार में विद्यमान होना सिद्ध नहीं होता।

रचनाएँ- आचार्यरचित अनेक प्रख्यात रचनाएँ प्राप्त हैं- (1) बुद्धचरितम् (2) सौन्दरनन्दकाव्यम् (3) गण्डीस्तोत्रगाथा (4) शारिपुत्रप्रकरणम् (5) सूत्रालंकारशास्त्र (6) महायानश्रद्धोत्पादशास्त्र (7) वज्रसूची।

